Boys-B

K.K. Sharma
11-3-79

सिद्धान्तकौमुदीतत्त्वप्रकाशः

(पंचमो भागः)

स्वरवैदिक–प्रश्नोत्तरी

सम्पादकः

रामगोविन्दशुक्लः

न्याय–व्याकरण–साहित्याचार्यः

मोतीलाल बनारसीदास

दिल्ली :: वाराणसी :: पटना

© मोतीलाल बनारसीदास

प्रधान कार्यालय : बंगलो रोड, जवाहर नगर, दिल्ली-७
शाखाएँ : (१) चौक, वाराणसी (उ० प्र०)
(२) अशोक राजपथ, पटना (बिहार)

प्रथम संस्करण : वाराणसी १९७६
मूल्य रू० ३.५०

सुन्दरलाल जैन, मोतीलाल बनारसीदास, चौक, वाराणसी द्वारा प्रकाशित तथा
आचार्य मुद्रणालय, ए १/१२ गायघाट, वाराणसी द्वारा मुद्रित

दो शब्द

'सिद्धान्तकौमुदीतत्त्वप्रकाश' का यह पांचवाँ तथा अन्तिम भाग छात्रों के हाथ में देकर मैं हर्ष का अनुभव कर रहा हूँ। क्योंकि यह कार्य कई वर्ष पूर्व आरम्भ हुआ था। बीच-बीच में अन्य कार्यों में व्यस्त होने से यह पिछड़ जाता था। इस भाग में यद्यपि बहुत लिखना रह गया जो लिखना आवश्यक तथा व्युत्पादक था तथापि परीक्षा के क्रम को ध्यान में रखकर संक्षिप्त लिखकर सन्तोष करना ही था। कहीं-कहीं प्रश्नोत्तर के लिए आवश्यक न होते हुए भी कुछ बढ़ा दिया है फिर भी बोझिल नहीं हुआ है। अन्त में कुछ वर्षों के प्रश्न पत्र जोड़ दिये गये हैं। जिससे छात्रों को कौन प्रयोग कितना अधिक महत्त्व रखता है समझ में आ जायगा।

अन्त में हम श्री विश्वनाथ जी के चरणों में पुष्पांजलि अर्पित करते हुए इस ग्रन्थ को समर्पण करते हैं।

बसन्त पंचमी
२०३२ विक्रम

रामगोविन्दशुक्लः

विषय-सूची

विषय	पृष्ठ
१ वैदिकप्रकरणम्	१
२ साधारणस्वरप्रकरणम्	५१
३ धातुस्वरप्रकरणम्	५८
४ प्रातिपदिकस्वरप्रकरणम्	६०
५ फिट्स्वरप्रकरणम्	६३
६ प्रत्ययस्वरप्रकरणम्	६८
७ समासस्वरप्रकरणम्	७३
८ तिङन्तस्वरप्रकरणम्	९३
९ स्वरसंचारप्रकारप्रकरणम् ।	९९
परिशिष्टम्	
प्रश्नपत्राणि ।	१०१

सिद्धान्तकौमुदीतत्त्वप्रकाशः

वैदिकप्रकरणे प्रथमोऽध्यायः ।

रामभद्रपदद्वन्द्वं भक्त्याराध्यमनोहरम् ।
रामगोविन्दशुक्लेन प्रकाशस्तन्यते मुदा ॥

प्रश्नः—लौकिकप्रक्रियातो वैदिकप्रक्रियाया भेदे हेतुं लिखत । (४६)

उत्तरम्—ननु 'रक्षोहागमलघ्वसन्देहाः प्रयोजनम्', इति वदता भाष्यकारेण वेदरक्षाया व्याकरणाध्ययनस्य प्रयोजनत्वेन मुख्यतयाभिधानात्, ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च' इति श्रुतेश्च वेदार्थज्ञानोपायतया वेदाङ्गत्वेनैव व्याकरणाध्ययनविधानाच्च, निखिलस्य व्याकरणस्य वैदिकशब्द-साधुत्वार्थं प्रवृत्ततया वैदिकशब्दानां लौकिकंशब्दाभिन्नतया तदनुशासनेनै-वेष्टसिद्धेः लौकिकप्रक्रियातः वैदिकप्रक्रियायाः पृथग् अनुशासनं किमर्थमिति चेन्न, लौकिकशब्देभ्यः आत्मना, जहार, देवाः, देवैः, गृहाण प्रभृतिभ्यः भिन्नानां त्मना, जभार, देवासः, देवेभिः, गृभाण प्रभृतिवैदिकशब्दानां सत्त्वेन लौकिकेभ्यः वैदिकान् भेदेन व्यपदिशति । 'अथ शब्दानुशासनम्' इत्यत्र केषां शब्दानां लौकिकानां वैदिकानां चेति वैदिकशब्दमात्रव्युत्पादनाय वैदिक-प्रक्रियायाः पृथक्करणौचित्यादिति दिक् ।

पुनर्वसुः । पुनर्वसुशब्दः नक्षत्रद्वयस्य वाचकः अतः उद्भूतावयवस्य ज्योतिः समुदायस्याभिधानात् द्वयोर्द्विवचनं लोके दृश्यते किन्तु छन्दसि एकवचनस्यापि दर्शनेन 'छन्दसि पुनर्वसोरेकवचनम्' इत्यनेन वैकल्पिके एकवचनत्वे सौ रुत्वे विसर्गे पुनर्वसुः इति, द्विवचने पुनर्वसू इति । लोके तु द्विवचनमेव । तेन गां गताविव दिवः पुनर्वसू इति प्रयोगः संगच्छते ।

क्षेत्रस्य पतिना (३५)—पतिशब्दः 'पतिः समास एव' इति नियमेन

समासे एव घीसंज्ञां लभते । वेदे तु 'षष्ठीयुक्तश्छन्दसि वा' इति सूत्रेण समासा-भावेऽपि घीसंज्ञायां, घीत्वाद् 'आङोनाऽस्त्रियामिति' आङो नादेशे पतिना इति सिद्धम् । क्षेत्रस्येति पदं तु पतिना इत्यत्र समासाभावप्रदर्शनार्थमिति बोध्यम् ।

नभस्वत् (४९)—नभसा तुल्यमिति विग्रहे तृतीयान्तात् नभसूटा इत्यस्मात् 'तेन तुल्यं क्रिया चेद्वतिः' इति वतिप्रत्यये नभसः पदान्तत्वात् 'ससजुषोरुः' इति रुत्वे प्राप्ते 'नभोङ्गिरोमनुषां वेत्युपसंख्यानम्' इति भत्वे पदत्वाभावात् रुत्वाभावे सौ तस्य लोपे नभस्वत् इति, लोके तु पदत्वात् रुत्वे उत्वे गुणे नभोवत् इति ।

अङ्गिरस्वत् (२७)—अङ्गिरसा तुल्यमिति विग्रहे तृतीयान्तात् अङ्गिरस्-शब्दात् 'तेन तुल्यं क्रियाचेद्वतिः' इति सूत्रेण वतिप्रत्यये प्रातिपदिकत्वेन सुपो लुकि सस्य रुत्वे प्राप्ते 'नभोङ्गिरोमनुषां वेत्युपसंख्यानम्' इति वार्तिकेन भत्वे पदत्वाभावात् रुत्वाभावे सौ तस्य लोपे अङ्गिरस्वात् इति । लोके तु सस्य रुत्वे उत्वे गुणे अङ्गिरोवत् इति ।

मनुष्वदग्ने (४३)—मनुषा तुल्यमिति विग्रहे 'जनेरुसिः' इत्यत्र बाहुलकानुवृत्तेः मनेरपि उसि मनुस् इत्यत्र 'तेन तुल्यं क्रिया चेद्वतिः' इति वतिप्रत्यये पदत्वेन सस्य रुत्वे प्राप्ते 'नभोङ्गिरोमनुषां वेत्युपसंख्यानन्' इति भत्वे पदत्वाभावात् रुत्वाभावे 'आदेशप्रत्यययोः' इति षत्वे सोर्लोपे मनुष्वदिति ।

वृषण्वसुः (५१)—वृषन् वर्षुकं वसु यस्य स इति विग्रहे बहुव्रीहिसमासे प्रातिपदिकत्वेन सुपो लुकि अन्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वे नलोपे प्राप्ते 'वृषण्वस्वश्वयोः' इत्यनेन भत्वेन तन्निषेधे णत्वे, भत्वात् 'पदान्तस्य' इति णत्वनिषेधाप्रवृत्तेः । 'अल्लोपो नः' इत्यस्याङ्गाधिकारीयत्वात् वृषन् इत्यस्याङ्गत्वाभावेन अल्लोपाप्रवृत्तेः सौ रुत्वे विसर्गे वृषण्वसुः इति । लोके तु पदत्वेन नलोपे वृषवसु; इति ।

वृषणश्वः (४६)—वृषा अश्वो यस्यासौ इति विग्रहे बहुव्रीहिसमासे सुपो लुकि अन्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वेन नलोपे प्राप्ते 'वृषण्वस्वश्वयोः' इति भत्वेन नलोपाभावे पदान्तत्वाभावेन 'पदान्तस्य' इति णत्वनिषेधाप्रवृत्त्या णत्वे वृषणश्वः इति । न च 'अल्लोपोनः' इति अल्लोपः कुतो नेति वाच्यम्

अत्र सूत्रे 'अङ्गस्य' इत्यस्याधिकारात् वृषन् इत्यस्य च अङ्गत्वाभावात् । लोके पदत्वेन दीर्घत्वे नलोपे वृषावसुः इति सिद्धम् ।

ऋक्वता गणेन (३१)—ऋच् शब्दात् मतुपि 'झयः' इति मतोर्मकारस्य वत्वे पदत्वात् 'चोः कुः' इति कुत्वेन चकारस्य ककारे 'झलां जश् झशि' इति जश्त्वे प्राप्ते 'अयस्मयादीनि च्छन्दसि' इति सूत्रस्थेन 'उभयसंज्ञान्यपि भवन्ति' इति वार्तिकेन भत्वे च कृते तेन जश्त्वाभावे ऋक्वता इति सिद्धम् । तदाह सूत्रे ऋक्वता इत्यत्र पदत्वात् कुत्वम्, भत्वाद् जश्त्वाभावः, जश्त्वविधानार्थायाः पदसंज्ञायाः भत्वसामर्थ्येन बाधात् ।

षष्ठीयुक्तश्छन्दसि वा—अयमर्थः—अत्र योगो विभज्यते 'षष्ठीयुक्तश्छन्दसि' इति एको योगः 'वा' इत्यपरो योगः । तत्र षष्ठ्यन्तेन युक्तः पतिशब्दः छन्दसि घीसंज्ञो भवति, इति प्रथमयोगार्थः । द्वितीये तु छन्दसीत्यनुवर्तते तेन छन्दसि सर्वेऽपि विधयः विभाषया भवन्ति इति सूत्रार्थः । न च घस्तान्नूनम् इत्याद्यर्थं विहितानां 'बहुलं छन्दसि' 'व्यत्ययो बहुलम्' इत्यादीनां वैयर्थ्यमिति वाच्यम् फलितार्थकथकत्वेन सार्थकत्वसिद्धेः ।

नैनं हिन्वन्त्यपि वाजिनेषु (४८)—वाजिनेषु इत्यत्र वाचामिनाः प्रभवः तेष्वप्येनं विद्वांसः न हिन्वन्ति, इत्यर्थे वाचामिनाः इति विग्रहे समासे अस्य अयस्मयादिगणे पाठात् 'अयस्मयादीनि च्छन्दसि' इति सूत्रे 'उभयसंज्ञान्यपि भवन्ति' इति वार्तिकेन भत्वे पदत्वे च कृते पदत्वाज्जश्त्वेन वाचश्चकारस्य जकारे भत्वात् कुत्वाभावे वाज्जिनेषु इति सिद्धम् ।

इन्धिभवतिभ्यां च (४४)—प्रत्याख्यातमिदं सूत्रम् । प्रत्याख्यानप्रकारश्च—इदं सूत्रं इन्धिभवतिभ्यां परस्य लिटः कित्वं शास्ति । तेन समीधे इत्यत्र समपूर्वात् इन्धधातोः लिटि तप्रत्यये एशादेशे 'असंयोगाल्लिट् कित्' इत्यनेन संयोगात् परत्वात् कित्वाप्राप्तौ 'इन्धिभवतिभ्यां च' इत्यनेन कित्वे अनिदितामिति नलोपे द्वित्वादिकार्ये समीधे इति सिद्ध्यति ।

अत्र नलोपार्थं कित्वविधानं व्यर्थम् । यतः इन्धधातोः लोके 'इजादेश्च गुरुमतोनृच्छः' इति लिटि आमः विधानात् कित्करणमनर्थकम् । वेदे तु 'कास्प्रत्ययादामन्त्रे लिटि' इति सूत्रे 'अमन्त्रे' इति प्रतिषेधात् आमोऽभावेऽपि 'छन्द-

स्युभयथा' इति सूत्रेण लिटः सार्वधातुकत्वेन ङित्वात् नलोपेन रूपसिद्धेः न च लिटः सार्वधातुकत्वे श्नुमापत्तिरिति वाच्यम् 'छन्दसि उभयथा' इति नियमेन छन्दसि दृष्टानुविधित्वात् आर्धधातुकत्वेन श्नमोऽभावसिद्धेः।

न च लिटः कित्वेन वृद्धिनिषेधात् बभूव इत्यत्र वुक्सिद्धिरिति वाच्यम्, कृताकृतप्रसङ्गेन वुकः नित्यत्वात् 'परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः' इति न्यायेन बलीयस्त्वाच्च वुका वृद्धिबाधेन रूपसिद्धेः तदर्थं कित्करणं व्यर्थमिति सूत्रं भाष्यकारेण प्रत्याख्यातम् इति दिक्।

समीधे दस्युहन्तमम् (५२)—सम्पूर्वकात् इन्धधातोः लिटि उत्तमपुरुषैकवचने इटि एत्वे द्वित्वे अभ्यासकार्ये 'इन्धिभवतिभ्यां च' इति कित्वात्। अनिदिताम्—' इति नलोपे दीर्घे समीधे इति सिद्धम्।

सूत्रप्रत्याख्यानपक्षे तु 'छन्दस्युभयथा' इति सार्वधातुकत्वेन ङित्वात् नलोपे रूपसिद्धेः।

बभूव (५०)—भूधातोर्लिटि तिपि णलि 'इन्धिभवतिभ्यां च' इति कित्वेन 'अचोञ्णिति' इति वृद्ध्यभावे वुकि द्वित्वे अभ्यासकार्ये चर्त्वे बभूव इति सिद्धम्।

सूत्रप्रत्याख्यानपक्षे तु—वुकः नित्यत्वात् वृद्धिं प्रबाध्य वुकि रूपसिद्धेः।

इति प्रथमोऽध्यायः।

अथ द्वितीयोऽध्यायः

यवाग्वाग्निहोत्रं जुहोति (४३)—अत्र हुधातोः कर्मणि यवागूशब्दात् अग्निहोत्रशब्दाच्च 'कर्मणि द्वितीया' इति द्वितीयायां प्राप्तायां 'तृतीया होश्छन्दसि' इति सूत्रेण हुधातोः कर्मणि द्वितीयायाः तृतीयायाश्च विधाने यवाग्वा इत्यत्र तृतीया अग्निहोत्रशब्दाच्च द्वितीया सिद्ध्यति। अत्र अग्निहोत्रशब्दः हविषि वर्तते। यस्याग्निहोत्रमधिश्रितममेध्यमापद्येत' इत्यादि प्रयोगदर्शनात्

अग्नये हूयते इति व्युत्पत्तेश्च। तेन यवाग्वाख्यं हविः देवतोद्देश्येन प्रक्षिपतीत्यर्थः सम्पद्यते।

न च अभेदान्वयबोधः समानविभक्तिकयोरेवेति नियमेन तृतीयान्तेन यावाग्वा द्वितीयान्तस्य अग्निहोत्रमित्यस्य कथमभेदान्वय इति वाच्यम् भिन्न-विभक्त्यवरुद्धत्वेऽपि भिन्नार्थकविभक्त्यनवरुद्धत्वाद् नामार्थयोरभेदान्वयोपपत्तेः।

भाष्ये तु—'यस्याग्निहोत्रं प्रज्ज्वलितम्' इति दर्शनात् हूयतेऽस्मिन्निति व्युत्पत्तेश्च अग्निहोत्रशब्दः अग्नावपि वर्तते। अतः यदा यवागूशब्दात् तृतीया तदा अग्निहोत्रशब्दो अग्नौ वर्तते जुहोतिश्च तर्पणे। यवाग्वा अग्निं प्रीणयती-त्यर्थः। यदा यवागूशब्दात् द्वितीया तदा अग्निहोत्रशब्दः हविषि वर्तते जुहोतिश्च प्रक्षेपणे। यवाग्वाख्यं हविर्द्रव्यं प्रक्षिपतीत्यर्थः। इत्थं अर्थभेदेन द्वितीया तृतीया च सिद्धयतीति 'तृतीया च होश्छन्दसि' इति सूत्रं न कर्तव्यम् इति प्रतिपादितम्।

गामस्य तदहः सभायां दीव्येयुः (३७)—अत्र सभायां इत्यपेक्ष्य गामस्येत्यत्र शेषे षष्ठी। 'तदहः' इत्युदाहरणम्, दिवधातोः कर्मणः अहः 'दिवस्तदर्थस्य' इति षष्ठीप्राप्तौ 'द्वितीया ब्राह्मणे' इत्यनेन द्वितीयायां अहन्-शब्दात् अमि 'स्वमोर्नपुंसकात्' इत्यमो लुकि 'रोऽसुपि' इति नकारस्य रुत्वे विसर्गे अहः इति सिद्धयति।

या खर्वेण पिबति तस्यै खर्वः (३१)—अयं रजस्वलायाः खर्वपानप्रति-षेधार्थोऽर्थवादः। या रजस्वला खर्वेण पिबति तस्याः खर्वः पुत्रो भवतीति वाक्यार्थः। अत्र 'षष्ठयर्थे चतुर्थीति वाच्यम्' इति तस्याः इति वक्तव्ये चतुर्थीविधानेन' 'तस्यै खर्वः' इति सिद्धयति।

पुरुषमृगश्चन्द्रमसः—अत्र 'चतुर्थ्यर्थे बहुलं छन्दसि' इति षष्ठी विधीयते तेन चन्द्रमसः इति। पक्षे चन्द्रमसे इत्यपि।

दार्वाघाटस्ते वनस्पतीनाम्—अत्र 'चतुर्थ्यर्थे बहुलं छन्दसि' इति पक्षे षष्ठी विधीयते तेन वनस्पतीनामिति। पक्षे चतुर्थी वनस्पतिभ्यः इत्यपि सिद्धयति।

घृतस्य यजते (४५)—अत्र यजिः देवपूजायां वर्तते, तत्र घृतं करणम् । ततः नित्यं तृतीया प्राप्ते 'यजेश्च करणे' इति बहुलं षष्ठी विधीयते । तेन घृतस्य घृतेन वा यजते' इति सिद्ध्यति ।

घस्तान्नूनम् (५०)—अदेर्लुङि तसि तस्य तामादेशे च्लौ 'बहुलं छन्दसि' इति अदो घस्लादेशे 'मंत्रे घसह्वरणस्—' इति च्लेः लुकि अडागमे प्राप्ते 'बहुलं छन्दसि' इति तस्य निषेधे घस्ताम् इति सिद्धम् । यदि 'लुङ्सनोः घस्लृ' इत्यनेनैव सिद्धे नेदमुदाहरणमित्युच्यते तदा लङः रूपमिदमिति बोध्यम् ।

सग्धिश्च मे (१९ २९, ४४, ४७, ५०)—अदनं ग्धिः । अदेः क्तिनि "बहुलं छन्दसि" इति सूत्रेण घस्लादेशे "घसिभसोर्हलि च" इत्युपधालोपे "झलो झलि" इति सूत्रेण सलोपे "झषस्तथोर्धोऽधः" इति सूत्रेण धत्वे घस्य जश्त्वे ग्धिरिति । नच जश्त्वे कर्तव्येऽल्लोपस्य स्थानिवत्त्वमिति वाच्यम्, "न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णाऽनुस्वारदीर्घजश्चर्विधिषु" इति सूत्रेण जश्त्वे कर्तव्ये तन्निषेधात् । ततः समाना ग्धिः सग्धिरिति समानशब्देन 'पूर्वापर-प्रथम—' इति समासे "समानस्य च्छन्दस्यमूर्द्धप्रभृत्युदर्केषु" इति सूत्रेण समानस्य सादेशे विभक्तिकार्ये 'सग्धिः' इति भवति ।

वृत्रं हनति वृत्रहा (३८)—अत्र वाक्यांशे हनतीत्यत्र हन्धातोः लटि तिपि शपि "अदिप्रभृतिभ्यः शपः" इति शपो लुकि प्राप्ते 'बहुलं छन्दसि" इत्यनेन बाहुलकात् शपो लुगभावे 'हनति' इति, लोके तु 'हन्ति' इति भवति ।

त्राध्वं नो देवाः (३५)—पालनार्थक-ङकारेत्संज्ञकात् 'त्रै' धातोर्लोटि ध्वमि शपि "बहुलं छन्दसि" इति सूत्रेण अदादिभिन्नस्यापि शपो लुकि एतत्सामर्थ्यादेव "आदेच उपदेशेऽशिति" इति सूत्रेणात्त्वे 'त्राध्वम्' इति सिद्धम्, लोके तु 'त्रायध्वम्' इति भवति ।

दाति प्रियाणि (३२)—दाधातोः लटि तिपि शपि "बहुलं छन्दसि" इति अदादिभिन्नेऽपि क्वचिल्लुक् विधानाद् जुहोत्यादावपि शपो लुकि 'दाति प्रियाणि', इति, । लोके तु 'ददाति' इति भवति ।

पूर्णां विवष्टि (२९)—वश् धातोः लटि तिपि अत्र जुहोत्यादिभिन्नेऽपि श्लुर्भवतीत्यर्थकेन "बहुलं छन्दसि" इति सूत्रेण आदादिकादपि वश्धातोः परस्य

शपः श्लौ 'श्लौ' इति द्वित्वे हलादिः शेषे "भृञामित्" 'बहुलं छन्दसि' इति सूत्रेणाभ्यासस्येकारे "व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः" इति सूत्रेण शस्य षत्वे "ष्टुना ष्टुः" इति ष्टुत्वे 'विवष्टि' इति।

अक्षन्नमीमदन्त हि (४३)—अत्तेर्लुङि अनुबन्धलोपे झि—आदेशे "लुङ्सनोर्घस्लृ" इति घस्लादेशे च्लि—प्रत्यये च्लेस्सिजादेशे प्राप्ते तम्प्रबाध्य "मन्त्रे घसह्वरणशवृदहाद्वृच्कृगमिजनिभ्यो लेः" इति च्लेर्लुकि घस्लादेशस्य "गमहनजनखनघसां लोपः क्ङित्यनङि" इति सूत्रेणोपधालोपे "शासिवसिघसीनां च" इति षत्वे चर्त्वे झेरन्तादेशे "इतश्च" इति सूत्रेणेकारस्य लोपे अडागमे तकारलोपे 'अक्षन्' इति भवति।

प्रणङ्मर्त्यस्य (३०)—प्रपूर्वान्नशेर्लुङि तिपि च्लौ "मन्त्रे घसह्वरणशवृदहाद्वृच्कृगमिजनिभ्यो लेः" इति च्लेर्लुकि "इतश्च" इतीकारस्य लोपे 'बहुलं छन्दस्यमाङ्योगेऽपि' इत्यनेन अडागमाऽभावे "हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्" इति सूत्रेण तकारस्य लोपे "उपसर्गादसमासेऽपि णोपदेशस्य" इति णत्वे "नशेर्वा" इति कुत्वे मर्त्यस्य इति मकारेऽनुनासिके परे "यरोऽनुनासिकेऽनुनासिको वा" इति ङकारे प्रणङ्मर्त्यस्य इति सिद्धम्, पक्षे व्रश्चेति षत्वे 'प्रनड्' इति। लोके 'प्राणशत्' इति भवति।

आवः (५०)—आङ्पूर्वकवृञ् धातोर्लुङि तिपि अनुबन्धलोपे च्लौ 'मन्त्रे घसह्वरणश०' इत्यादिसूत्रेण च्लेर्लुकि अडागमे गुणे रपरे "इतश्च" इतीकारलोपे 'हल्ङ्याब्भ्यो दीर्घात्०' इति तकारस्य लोपे विसर्गे "आवः" इति सिद्धम्।

मान आधक् (१९२८, ४८)—आङ्पूर्वकदहधातोर्लुङि तिपि च्लौ "मन्त्रे घस०" इत्यादिसूत्रेण च्लेर्लुकि 'इतश्च' इतीकारस्य लोपे हल्ङ्यादिना तकारस्य लोपे अडागमे "दादेर्धातोर्घः" इति सूत्रेण हस्य घत्वे "एकाचो बशो भष् झषन्तस्य स्ध्वोः" इति सूत्रेण भष्भावे जश्त्वे चर्त्वे च 'मान आधक्' इति भवति।

आप्रा द्यावा पृथिवी (१९३६)—आङ्पूर्वक–प्राधातोर्लुङि सिपि च्लौ "मन्त्रे घसह्वरणशवृदहाद्वृच्कृगमिजनिभ्यो लेः" इति सूत्रेण च्लेर्लुकि "इतश्च" इतीकारस्य लोपे सस्य रुत्वे यत्वे यलोपे च "आप्रा द्यावा पृथिवी" इति।

अक्रन्नुषासः (१९३४, ४६, ४९)—कृधातोर्लुङि झिप्रत्यये च्लौ "मन्त्रे घसह्वरणशवृदहाद्वृच्कृगमिजनिभ्यो लेः" इति सूत्रेण च्लेर्लुकि "सार्वधातुकमपित्" इति ङिद्वद्भावेऽडागमेऽनुबन्धलोपे 'झोन्तः' इति झस्यान्तादेशे झेर्ङित्वाद् गुणाभावे यणि "इतश्च" इतीकारस्य लोपे संयोगान्तलोपे 'अक्रन्' इति सिद्धम् ।

इति द्वितीयोऽध्यायः

अथ तृतीयोऽध्यायः

प्रजनयामकः (४२)—प्रपूर्वकात्–ईकारेत्संज्ञकात्–जन्धातोः णिचि लुङि "अभ्युत्सादयां प्रजनयां चिकयां रमयामकः पावयां क्रियाद्विदामक्रन्निति च्छन्दसि" इति सूत्रेण निपातनाण्ण्यन्ताज्जनेराम्प्रत्ययेऽकोऽनुप्रयोगे गुणेऽयादेशे "आमः" इति सूत्रेण लुङो लुकि "प्रजनयामकः" इति, लोके प्राजीजनत् इत्यर्थः ।

विदामक्रन् (४७)—विदधातोर्लुङि "अभ्युत्सादयां प्रजनयां चिकयां रमयामकः पावयां क्रियाद्विदामक्रन्निति च्छन्दसि" इति सूत्रेण आमि लुङन्त करोत्यनुप्रयोगे तस्य झि–आदेशे "झोऽन्तः" इत्यन्तादेशे विदाम्+कृ+अन्ति इति जाते निपातनाद् गुणाभावे यणि "लुङ्लङ्लृङ्क्ष्वडुदात्तः" इत्यडागमे "इतश्च" इतीकारलोपे संयोगान्तलोपे "विदामक्रन्" इति सिद्धम् । लोके तु 'अवेदिषुः' इति भवति ।

मात्वाग्निर्ध्वनयीत् (४६)—ण्यन्तात् ध्वन् धातोर्लुङि तिपि च्लौ च्लेः "णिश्रिद्रुस्रुभ्यः कर्तरि चङ्" इति च्लेश्चङादेशे प्राप्ते "नोनयतिध्वनयत्येलयत्यर्दयतिभ्यः" इति तन्निषेधे "च्लेस्सिच्" इति सिजादेशे इचोरित्त्वे इडागमे 'इतश्च' इतीकारस्य लोपे "अस्तिसिचोऽपृक्ते" इति सूत्रेण तकारस्य ईडागमे ध्वनि+इ+स्+ईत् इति जाते गुणेऽयादेशे 'इट ईटि' इति सलोपे

अडागमे प्राप्ते 'न माङ्योगे' इति तन्निषेधे दीर्घे 'ध्वनयीत्' इति, माध्वान्निध्वंनयीत् इति, लोके तु घटादेरदिध्वनत् चुरादेरदध्वनत् इति भवति।

छन्दसि निष्टर्क्यं० (५२)—"छन्दसि निष्टर्क्यदेवहूयप्रणीयोन्नीयोच्छिष्यमर्यस्तर्याध्वर्यखन्यखान्यदेवयज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्यभाव्यस्ताव्योपचाय्यपृडानि" इति सूत्रस्वरूपम्। निष्टर्क्यादयः शब्दाश्छन्दसि निपात्यन्ते इति सूत्रार्थः। कृन्ततेर्निस्–पूर्वात् "ऋदुपधाच्च" इति सूत्रेण क्यपि प्राप्ते निपातनात् ण्यत्, आद्यन्तयोर्विपर्यासः, निसः षत्वं च–'निष्टर्क्यं चिन्वीत पशुकामः'। देवशब्दे उपपदे ह्वयतेर्जुहोतेर्वा क्यप् दीर्घश्च–स्पर्धन्त वा उ 'देवहूये'। प्र उत् आभ्यां नयतेः क्यप्–'प्रणीयः' 'उन्नीयः'। उत्पूर्वाच्छिषेः क्यप्–'उच्छिष्यः'। मृङ्स्तृञ्ध्वृभ्यो यत्–'मर्यः' 'स्तर्या, स्त्रियामेवायम्' 'ध्वर्यः'। खनेर्यण्यतौ–'खन्यः' 'खान्यः'। यजेर्यः–शुन्धध्वं दैव्याय कर्मणे 'देवयज्यायै'। आङ्पूर्वात् ज्ञीप्सार्थकपृच्छेः क्यप् 'ग्रहिज्या०' इति सम्प्रसारणम्–'आपृच्छ्य' धरुणं वाज्यर्षति। प्रतिपूर्वक–तन्तुसन्तानार्थकषिवु–धातोः क्यपि षत्वे 'हलि च' इति दीर्घे विभक्तिकार्ये च 'प्रतिषीव्यः' इति। ब्रह्मणि वदेर्ण्यत्–'ब्रह्मवाद्यम्'। लोके तु "वदः सुपि क्यप् च" इति क्यप्ण्यतौ। भवतेः स्तौतेश्च ण्यत्—'भाव्यः' 'स्ताव्यः'। उपपूर्वात् चिनोतेर्ण्यत् आयादेशश्च पृडे उत्तरपदे–'उपचाय्यपृडम्'।

निष्टर्क्यम् (३१)—निसुपसर्गपूर्वककृत्–धातोः "ऋदुपधाच्च" इति सूत्रेण क्यपि प्राप्ते तम्प्रबाध्य "छन्दसि निष्टर्क्यदेवहूयप्रणीयोन्नीयोच्छिष्यमर्यस्तर्याध्वर्यखन्यखान्यदेवयज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्यभाव्यस्ताव्योपचाय्यपृडानि" इति सूत्रेण निपातनात् ण्यति प्रत्ययेऽनुबन्धलोपे आद्यन्तयोर्विपर्यासे निसः षत्वे गुणे रपरे ष्टुत्वे विभक्तिकार्ये 'निष्टर्क्यम्' इति भवति।

मर्यः (४१)—ङकारेत्संज्ञक–मृधातोः "छन्दसि निष्टर्क्यदेवहूयप्रणीयोन्नीयोच्छिष्यमर्यस्तर्याध्वर्यखन्यखान्यदेवयज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्यभाव्यस्ताव्योपचाय्यपृडानि" इति सूत्रेण निपातनात् यत् प्रत्यये गुणे रपरे प्रातिपदिकत्वे सौ रुत्वे विसर्गे च कृते 'मर्यः' इति।

स्तर्या (४३)—स्तृञ् धातोः "छन्दसि निष्टर्क्यदेवहूयप्रणीयोन्नीयोच्छि-

ष्यमर्यस्तर्याध्वर्यखन्यखान्यदेवयज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्यभाव्यस्ताव्योपचाय्य - पृडानि'' इति सूत्रेण निपातनात् यत् प्रत्यये गुणे रपरे 'अजाद्यतष्टाप्' इति टापि सौ सुलोपे 'स्तर्या' इति भवति ।

देवयज्यायै (३७)—देवशब्दे उपपदे यज् धातोः ''छन्दसि निष्टर्क्यदेवहूय-प्रणीयोन्नीयोच्छिष्यमर्यस्तर्याध्वर्यखन्यखान्यदेवयज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्यभा - व्यस्ताव्योपचाय्यपृडानि'' इति सूत्रेण निपातनात् यत् प्रत्यये टापि 'देवयज्या' शब्दस्य 'चतुर्थ्येकवचने 'देवयज्यायै' भवति ।

ब्रह्मवाद्यम् (३२)—ब्रह्मणि वदेः''छन्दसि निष्टर्क्यदेवहूयप्रणीयोन्नीयोच्छिष्य-मर्यस्तर्याध्वर्यखन्यखान्यदेवयज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्यभाव्यस्ताव्योपचाय्य - इति पृडानि'। इति सूत्रेण निपातनात् ण्यंति अनुबन्धलोपे उपधावृद्धौ णिलोपे सौ अमि पूर्वरूपे ''ब्रह्मवाद्यम्'' इति, । लोके तु 'वदः सुपि क्यप् च' क्यप्यतौ तेन 'ब्रह्मोद्यम्' 'ब्रह्मवद्यम्' इति रूपद्वयम् ।

पृतनाषाट् (५२)—मर्षणार्थक-षह्धातो सुप्युपपदे सहेर्ण्विः स्यादित्यर्थ-केन ''छन्दसि सहः'' इति सूत्रेण ण्विप्रत्यये सर्वापहारे ''धात्वादेः षः सः'' इति सत्वे प्रातिपदिकादिकार्ये हस्य ढत्वे सुलोपे ''सहेः साडः सः'' इति षत्वे 'पृतनाषाट्' इति ।

दित्यवाट् (५१)— दित्योपपदात् वहधातोः ''वहश्च'' इति ण्विप्रत्यये प्रातिपदिकादिकार्ये उपधावृद्धौ हस्य ढत्वे जश्त्वे न डत्वे चर्त्वे न टत्वे सुलोपे 'दित्यवाट्' इति सिद्धम् ।

अब्जाः (४२)—अप्सु जाताः इति विग्रहे अबुपपदाज्जन् धातोः ''जनसनखनक्रमगमो विट्'' इति सूत्रेण विट् प्रत्यये विटः सर्वापहारे ''विड्व-नोरनुनासिकस्यात्'' इति सूत्रेणात्त्वे जश्त्वे विभक्तिकार्ये 'अब्जाः' इति सिद्धम् ।

दधिक्राः (३६)—दधि क्रामति दधिक्राः इत्यत्र ''जनसनखनक्रमगमो विट्'' इति सूत्रेण विटि सर्वापहारे ''विड्वनोरनुनासिकस्यात्'' इति सूत्रेणादादेशे सौ रुत्वे विसर्गे 'दधिक्राः' इति सिद्धम् ।

अग्रेगाः (१९५०)—अग्रे गच्छति अग्रेगा अत्र ''जनसनखनक्रमगमो विट्'' इति सूत्रेण विटि सर्वापहारे ''विड्वनोरनुनासिकस्यात्'' इति सूत्रेणा-

दादेशे "हलदन्तात् सप्तम्याः" इति सूत्रेण सप्तम्यलुकि सौ रुत्वे विसर्गे 'अग्रेगाः' इति सिद्धम् ।

उक्थशासः (२९)—उक्थानि उक्थैर्वा शंसन्ति इति उक्थशासः यजमानाः । अत्र उक्थोपपदात् शंसधातोः "मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन्" इति सूत्रेण ण्विनि प्रत्यये नलोपे "अत उपधायाः" इति सूत्रेण वृद्धौ जसि विभक्तावनुबन्धलोपे सस्य रुत्वे विसर्गे "उक्थशासः" इति भवति ।

अवयाः (३१)—अवपूर्वकयज् धातोः "अवयाः श्वेतवाः पुरोडाश्च" इत्यनेन निपातनात् डस् प्रत्ययेऽनुबन्धलोपे डित्वाट्टिलोपे सम्बुद्ध्येकवचने सौ निपातनात् दीर्घे सुलोपे रुत्वे विसर्गे च 'अवयाः' इति भवति ।

नन्विदं सूत्रं व्यर्थम्—"मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन्" इति सूत्रस्थेन 'श्वेतवहादीनां डस्पदस्येति' वार्तिकेन डसि कृते सौ "अत्वसन्तस्य चाधातोः" इति दीर्घे रुत्वे विसर्गे 'अवयाः' श्वेतवाः, इत्यादि सिद्धमिति चेन्न 'सर्वनामस्थाने चासम्बुद्धौ' इत्यतः असम्बुद्धिपदस्य "अत्वसन्तस्य चाधातोः" इति सूत्रेऽधिकारात् सम्बुद्धौ 'अवयाः, श्वेतवाः' इत्यादौ 'अत्वसन्तस्य०' इति सूत्रस्याऽप्रवृत्तेरिति दिक्।

उपयट् (५१)—उपोपपदात् यज्धातोः "विजुपे छन्दसि" इत्यनेन सूत्रेण विच् प्रत्यये सर्वापहारे प्रातिपदिकत्वे विभक्तिकार्ये 'उपयट्' इति भवति।

चक्राणा वृष्णिम् (३३)—'कृ' धातोः लिटि तस्य स्थाने "लिटः कानज्वा क्वसुश्च" इति सूत्रेण कानजादेशेऽनुबन्धलोपे द्वित्वे "उरत्" इत्यत्वे "हलादिः शेषः" इति रेफस्य लोपे "कुहोश्चु" इति चुत्वे यणादेशे णत्वे टापि विभक्तिकार्ये "चक्राणा वृष्णिम्" इति सिद्धम् ।

अघायुः (३५, ३८, ५२)—परस्याघमिच्छतीत्यर्थे 'छन्दसि परेच्छायां क्यज् वक्तव्य' इति क्यचि प्रत्ययेऽनुबन्धलोपे "अश्वाघस्यात्" इति सूत्रेणादादेशे 'अघाय' इति जाते "क्याच्छन्दसि" इति उप्रत्ययेऽकारस्य लोपे 'अघायु' इत्यस्य प्रातिपदिकत्वे सौ रुत्वे विसर्गे 'अघायुः इति सिद्धम् ।

वीरुधः पारयिष्णवः (१९२९,४६)—पारीतिण्यन्तात् "णेश्छन्दसि" इति सूत्रेण इष्णुच् प्रत्ययेऽनुबन्धलोपे णेरयादेशे जसि विभक्तावनुबन्धलोपे गुणेऽवादेशे सस्य रुत्वे विसर्गे 'पारयिष्णवः इति सिद्धम् ।

इयं ते नव्यसी मतिः (४१)—अत्र वाक्यांशे मन् धातोः "मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः" इति सूत्रेण क्तिन् प्रत्यये क्तिनः उदात्तत्वे च "लशक्वतद्धिते" इति ककारस्येत्संज्ञायां लोपे च जाते नकारस्य "हलन्त्यम्" इतीत्त्वे जाते "अनुदात्तोपदेश०" इति अनुनासिकस्य नकारस्य लोपे प्रातिपदिकत्वे सौ रुत्वे विसर्गे च 'मतिः' इति सिद्धम् ।

अद्य ममार (४७)—अत्र 'ममार' इत्यत्र वर्त्तमानकालिकलट्प्रयोगस्थानेऽपि "छन्दसि लुङ्लङ्लिटः" इति सूत्रेण वैकल्पिके लिटि लिण्निमित्तककार्ये 'ममार' इति । पक्षे 'म्रियते' इति भवति ।

प्रण आयूंषि तारिषत् (४५) तॄधातोः "लिङ्र्थे लेट्" इति लेटि "सिब्बहुलं लेटि" इति लेटि परे मध्ये सिपि ततः लेटः स्थाने तिपि प्रत्यये चानुबन्धलोपे "लेटोऽडाटौ" इति अडागमे "इतश्च लोपः परस्मैपदेषु" इति इतो लोपे "सिब्बहुलं णिद्वक्तव्यः" इति वार्तिकेन सिपः णिद्वद्भावे इडागमे धातोॠकारस्य वृद्धौ षत्वे तारिषत् इति रूपं सिद्धम् ।

पताति विद्युत् (३४)—पतनार्थकलृकारेत्संज्ञकपत्धातो छन्दसि लेटि तिपि "लेटोऽडाटौ" इति सूत्रेण तिपः आडागनेऽनुबन्धलोपे 'पताति' इति सिद्धम् ।

प्रियः सूर्ये प्रियो अग्ना भवाति (१९४६)—भूधातोश्छन्दसि लेटि तिपि 'लेटोऽडाटौ" इति सूत्रेणाडागमेऽनुबन्धलोपे गुणेऽवादेशे 'भवाति' इति भवति ।

मादयैते (३९)—हर्षार्थकमदी धातोः णिचि णिजन्तात् लेटि आतामि शपि गुणेऽयादेशे मादय आतामिति स्थिते "आत ऐ" इति सूत्रेण प्रथमाकारस्य 'ऐ' आदेशे "टित आत्मनेपदानां टेरे" इति द्वितीयाकारस्यैत्वे 'मादयैते' इति ।

उपसंवादाऽऽशङ्कयोश्च (३९)—पणबन्धे आशङ्कायाञ्च लेट् स्यात् इत्यर्थः । अहमेवपशूनामीशै । अहं दास्यामीति 'समयकरणं पणबन्धः' सम्भावनमाशंका । अत्र ईशधातोरनेन लेटि इटि रूपम् । नेज्जिह्मायन्तो नरकं पताम । इत्युदाहरणे । अत्र नेत् इत्यत्र न इत् इतिच्छेदः । इत् शब्दः आशंकायां तेन पताम् इत्यत्र लेट ।

गृभाय जिह्वया मधु (४८)—ग्रहधातोः लोटि सिपि सेर्हौ श्नाप्रत्यये शानजादेशे प्राप्ते—"छन्दसि शायजपि" इति सूत्रेण श्नः शायजादेशेऽनु-

बन्धलोपे सम्प्रसारणे पूर्वरूपे "हृग्रहोर्भश्छन्दसि" इति हस्य भावरे गृभाय इति सिद्धम् । लोके 'गृहाण' इति भवति ।

गृभ्णामि ते (४६)—ग्रहधातोर्लटि मिपि सार्वधातुकत्वे श्नाप्रत्ययेऽनुबन्धलोपे सम्प्रसारणे 'गृह्णामि' इत्यत्र "हृग्रहोर्भश्छन्दसि" इत्यनेन हकारस्य भकारे 'गृभ्णामि' ते इति सिद्धम् । लोके 'गृह्णामि' इति भवति ।

मध्वा जभार (३४)—हरणार्थकाकारेत्संज्ञकहृधातोः लिटि तिपि णलि द्वित्वे अभ्यासकार्ये वृद्धौ रपरत्वे 'जहार' इति, अत्र "हृग्रहोर्भश्छन्दसि" इत्यनेन हकारस्य भकारे 'जभार' इति । लोके तु 'जहार' इति भवति ।

व्यत्ययो बहुलम् (१९२७)–विकरणानां बहुलं व्यत्ययःस्याच्छन्दसि, इति सूत्रार्थः। 'आण्डा शुष्मस्य भेदति, अत्र भेदतीत्यस्य रौधादिकात् श्नमि 'भिनत्ति' इति प्राप्तेऽनेन शपि भेदतीति भवति । 'जरसा मरते पतिः' अत्र तौदादिकश-प्रत्यये रिङ्शयग्लिङ्क्षुइतिरिङ्कृते इयङि 'म्रियते' इति प्राप्ते 'इन्द्रो वस्तेन नेषतु' अत्र नयतु इति प्राप्ते नयतेर्लोट् शप् सिपौ द्वौ विकरणौ । 'इन्द्रेण युजा तरुषेम वृत्रम्' 'तरेम' इत्यत्र तरतेर्विध्यादौ लिङ् उः सिप् शप् च त्रयोविकरणाः ।

जरसा मरते पतिः (४६)—अत्र मृङ् धातोर्लटि तप्रत्यये "तुदादिभ्यः शः" इति प्राप्ते "व्यत्ययो बहुलम्" इति व्यत्ययेन शपि अनुबन्धलोपे गुणे रपरे "टित आत्मनेपदानां टेरे" इत्येत्वे 'मरते' इति सिद्धम् । लोके तु शप्रत्यये सति 'रिङ्शयग्लिङ्क्षु" इति रिङादेशे इयङि 'म्रियते' इति भवति ।

इन्द्रो वस्तेन नेषतु (५०)–'नेषतु' इत्यत्र 'नयतु' इति प्राप्ते नयतेर्लोट निपातनात् शप् सिपौ द्वौ विकरणौ "व्यत्ययो बहुलम्" इति व्यत्यये नि+सिप्+शप्+ति इति जाते इकारपकारयोः शकारपकारयोश्चेत्संज्ञायां नि+स्+अ+ति इति स्थिते गुणे षत्वे एरुत्वे 'नेषतु' इति । लोके तु 'नयतु' इति।

इन्द्रेण युजा तरुषेम वृत्रम् (४२)—अत्र तरतेर्विध्यादौ लिङ् लकारे मसि "व्यत्ययो बहुलम्" इति बाहुलकात् 'उः' 'सिप्' 'शप्' च व्यत्ययेन जाते इकारपकारयोः शकारपकारयोश्चेत्संज्ञायां लोपे गुणे रपरे यासुटि उटावितौ नित्यंङित इति सलोपे "अतो येयः" इति इयादेशे 'लोपो व्योर्वलि' इति यलोपे "आद्गुणः" इति गुणे 'तरुषेम' इति अत्रोप्रत्ययान्तस्य सिपं प्रत्यङ्गत्वात्

"सार्वधातुकार्द्धधातुकयोः इति गुणः प्राप्तः सिबन्तस्य शपि लघूपधगुणश्च प्राप्तो बाहुलकान्न भवति ।

सुप्तिङुपग्रहेति (४४)—

'सुप्तिङुपग्रहलिङ्गनराणां कालहलच्स्वरकर्तृयङां च ।
व्यत्ययमिच्छति शास्त्रकृदेषां सोऽपि च सिद्धयति बाहुलकेन' ॥

अयमर्थः—शास्त्रकृत् पाणिनिः आचार्यः एषां सुप्प्रभृतीनां व्यत्ययमिच्छति सोऽपि तथाविधो व्यत्ययो बाहुलकेन (बहुलस्य भावः बाहुलकं तेन बाहुलकेन। मनोज्ञादित्वाद्वुञ्) सिद्धयति। सुप्तिङादीनां क्रमशः उदाहरणानि—'धुरि दक्षिणायाः' अत्र दक्षिणस्यामिति प्राप्ते इति सुपः व्यत्ययः। 'चषालं ये अश्वयूपाय तक्षति' अत्र 'तक्षन्ति' इति प्राप्ते इति तिङ् व्यत्ययः।

उपग्रहः (३९)—परस्मैपदात्मनेपदे।

'ब्रह्मचारिणमिच्छते' (१९३९)–'इच्छति' इति प्राप्ते परस्मैपदस्ये व्यत्ययः। 'प्रतीपमन्य ऊर्मियु‍ध्यति' 'युध्यते' ईति प्राप्ते, आत्मनेपदस्यव्यत्ययः। 'मधोस्तृप्ता इवासते' मधुनः इति प्राप्ते इति लिङ्गस्यव्यत्ययः। नरः पुरुषः "अधा स वीरैर्दशभिर्वियूयाः' वियूयात् ईति प्राप्ते पुरुषव्यत्ययः। कालः कालवाची प्रत्ययः 'श्वोऽग्नीनाधास्यमानेन' लुटो विषये लृट्। 'तमसो गा अदुक्षत्' 'अधुक्षत्' इति प्राप्ते हल्। 'मित्रवयं च सूरयः' मित्रावयम्' इति प्राप्ते अच्व्यत्ययः। स्वरव्यत्ययस्य फलम्—'गवामिव श्रियसे' ईत्यत्र 'तुमर्थे सेसेन्०' इत्यनेन कसेनि कृते "ञ्नित्यादिर्नित्यम्" इति आद्युदात्ते प्राप्ते व्यत्ययेन मध्योदात्तता भवति। कर्तृशब्दः कारकमात्रपरः तथा च तद्वाचिनां कृत्तद्धितानां व्यत्ययः। 'अन्नादाय' अन्नमत्तीत्यन्नादस्तस्मै अन्ने कर्मण्युपपदेऽदेः कर्मण्यणि प्राप्ते अच्। अवग्रहे विशेष इति (अणि कृते अन्न आदायेति, अचि तु अन्न अदायेति भावः) यङो यशब्दादारभ्य "लिङ्याशिष्यङ्" इति ङकारेण प्रत्याहारः तेन व्यत्ययो भेदतीत्यादि भवति।

मन्त्रं वोचमाग्नये (४४)—वचेराशीर्लिङि मसि "लिङ्याशिष्यङ्" इति सूत्रेण मसोङि अनुबन्धलोपे "वच उम्" इति उमि मित्वादन्त्याद्चः परत्वे 'व+उ+च+म इति जाते गुणे यासुटि उभयसंज्ञात्वात् इयादेशे यलोपे सलोपे 'वोचेम' इति। एवञ्च 'मन्त्रं वोचेमाग्नये' इति भवति।

पितरं च दृशेयं मातरं च (४९)—दृश् धातोर्लिङि अमि "दृशेरग्वक्तव्यः" इत्यगि यासुटि इयादेशे गुणे 'दृशेयम्' इति लोके तु 'पश्येयम्' इति भवति।

पपिः सोमम् (३८)—पा धातोः "आदृगमहनजनः किकिनौ लिट् च" इति सूत्रेण किप्रत्ययेऽनुबन्धलोपे लिड्वदतिदेशेन द्वित्वादिकार्ये आकारस्य लोपे सौ रुत्वे विसर्गे च कृते 'पपिः' इति सिद्धम्।

ददिर्गाः (३३)—दाधातोः "आदृगमहनजनः किकिनौ लिट् च" इति सूत्रेण किप्रत्ययेऽनुबन्धलोपे लिड्वदतिदेशेन द्वित्वे अभ्यासत्वे ह्रस्वे "आतो लोप इटि च" इत्याकारलोपे 'ददि' इति तस्मात् सौ रुत्वे विसर्गे च 'ददिः' इति भवति। अत्र किकिनो स्थाने तिबादयस्तु न लिड्वदतिदेशेन स्वरूपाबाधेनैव कार्यातिदेशात्।

जगुरिः (२६)—गृधातोः "आदृगमहनजनः किकिनौ लिट् च" इति सूत्रेण कि प्रत्यये लिड्वद्भावे द्वित्वात् परत्वात् "बहुलं छन्दसि" इत्युत्वे प्राप्ते "द्विर्वचनेऽचि" इति निषेधादुत्वाऽभावे द्वित्वे "उरत्" इति सूत्रेणात्वे रपरे "हलादिः शेषः" इति रेफस्य लोपे "अभ्यासे चर्च" इति जश्त्वे जगृ+इ इति स्थिते "बहुलं छन्दसि" इति उत्तरस्योत्वे रपरे 'जगुरि' इत्यस्मात् सौ रुत्वे विसर्गे 'जगुरिः' इति सिद्धम्।

ननु लिड्वद्भावादेव सिद्धे किद्ग्रहणं किमर्थमिति चेन्न "ऋच्छत्यृताम्" इति गुणबाधनार्थं कित्त्वस्य चारितार्थ्यात्।

गवामिव श्रियसे (४५)—श्रयतेः "तुमर्थे सेसेनसेअसेनक्सेकसेनध्यै-अध्यैन्कध्यैकध्यैन्शध्यैशध्यैन्तवैतवेङ्तवेनः" इति सूत्रेण तुमर्थे कसेन् प्रत्ययेऽनुबन्धलोपे इयङादेशे 'श्रियसे' इति, अत्र नित्त्वादाद्युदात्तः। इह मन्त्रे मध्योदात्तः पठ्यते तत्र बाहुलकात् प्रत्ययस्वरो बोध्यः।

आहुवध्यै (४१)—आङ्पूर्वकजुहोतेः "तुमर्थे सेसेनसेअसेनक्सेकसेनध्यै-अध्यैन्कध्यैकध्यैन्शध्यैशध्यैन्तवैतवेङ्तवेनः" इति सूत्रेण तुमर्थे कध्यै प्रत्ययेऽनुबन्धलोपे उवङादेशे 'आहुवध्यै' इति। कध्यैन् प्रत्यये कृते सर्वं पूर्ववत् नित्वात् नित्स्वरः (नित्त्वादाद्युदात्तः) इति विशेषः। लोके तु 'आहोतुम्' इति भवति।

वायवे पिबध्यै (३५)—पाधातोः "तुमर्थे सेसेनसेअसेन्—क्सेनसेनध्यै-अध्यैन्कध्यैकध्यैन्शध्यैशध्यैन्तवैतवेङ्तवेनः" इति सूत्रेण तुमर्थे शध्यैन् प्रत्ययेऽनुबन्धलोपे "तिङ्शित्सार्वधातुकम्" इति सार्वधातुकसंज्ञायां शपि 'पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः" इति सूत्रेण पा इत्यस्य पिबादेशे पररूपे नित्त्वादाद्युदात्ते 'पिबध्यै' इति।

दातवा उ (३७)—दाधातोः "तुमर्थेसेसेनसेअसेन्क्सेकसेनध्यैअध्यैन्कध्यैकध्यैन्तवैतवेङ्तवेनः" इति सूत्रेण तुमर्थे तवै प्रत्यये दातवै उ इति जाते आयादेशे "लोपः शाकल्यस्य" इति यलोपे 'दातवा उ' इति भवति।

विभाजं नाशकत् (२८)—विभक्तुमित्यर्थे विपूर्वकात् भज्धातोः "शकिणमुल्कमुलौ च" इति णमुल्प्रत्ययेऽनुबन्धलोपे णित्त्वात् "अत उपधायाः" इति सूत्रेण उपधाकारस्य वृद्धौ विभक्तिकार्ये 'विभाजं नाशकत्' इति भवति। लोके तु 'विभक्तुम्' इति भवति।

अपलुपं नाशकत् (४३)—अपलोप्तुमित्यर्थे अपपूर्वकच्छेनार्थकलुप्धातोः "शकि णमुल्कमुलौ च" इति सूत्रेण कमुल्प्रत्ययेऽनुबन्धलोपे कित्त्वाकित्त्वाद्गुणाभावे विभक्तिकार्ये 'अपलुपम्' इति।

ईश्वरो विलिखः (३३)—अत्र विपूर्वकलिखधातोः "ईश्वरे तोसुन्कसुनौ" इति सूत्रेण तुमर्थे कसुन् प्रत्ययेऽनुबन्धलोपे कित्त्वात् गुणाभावे "क्त्वातोसुन्कसुनः" इति सूत्रेणाव्ययत्वे अव्ययत्वाच्च "अव्ययादाप्सुपः" इति सुपो लुकि 'विलिखः' इति अत्र प्रत्ययलक्षणेन "अत्वसन्तस्य चाऽधातोः" इति दीर्घस्तु न भवति "न लुमताऽङ्गस्य" इति प्रत्ययलक्षणनिषेधात्।

न म्लेच्छितवै (४४)– अत्र म्लेच्छधातोः "कृत्यार्थे तवैकेन्केन्यत्वनः" इति सूत्रेण तवै प्रत्यये इडागमें सौ विभक्तावव्ययत्वात् सुलोपे 'म्लेच्छितवै' इति 'न म्लेच्छितवै' इत्यस्य न म्लेच्छितव्यम्' इत्यर्थः।

उदेतोः (५१)—अत्र उत्पूर्वक-इणधातोः "भावलक्षणे स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन्" इति सूत्रेण तोसुन् प्रत्ययेऽनुबन्धलोपे गुणे अव्ययत्वात् सुपो लुकि सस्य रुत्वे विसर्गे 'उदेतोः' इति सिद्धम्।

इति तृतीयोऽध्यायः

अथ चतुर्थोऽध्यायः

राती व्यख्यदायती—रात्रिशब्दात् 'रात्रेश्चाजसौ' इति ङीपि 'यस्येति च' इति इकारलोपे रात्री इति ततः सौ तस्य हल्ङ्यादिना लोपे रात्री इति। अयं च ङीप् जस्विषये न भवति। तेन जसि गुणे अयादेशे रात्रयः इति सिद्धयति।

ननु जसि तिमिरपटलैरवगुण्ठिताश्च रात्र्यः इति प्रयोगः कथमिति चेत् शृणु; रात्रिशब्दात् 'कृदिकारादक्तिनः' इति वार्तिकसहकारेण 'बह्वादिभ्यश्च' इति ङीषि जसि पूर्वसवर्णदीर्घे प्राप्ते 'दीर्घोज्जसि च' इति निषेधे यणि रात्र्यः इति सिद्धयति। एतेन वेदे रात्र्यः इति प्रयोगो न भवति, लोके तु भवत्येव।

बह्वीषु हित्वा—बहुशब्दात् 'बह्वादिभ्यश्च' इति विकल्पेन ङीषि प्राप्ते वेदे 'नित्यं छन्दसि' इति ङीपि सुपि बह्वीषु इति सिद्धम्। न च पूर्वसूत्रेण विकल्पे सिद्धे आरम्भसामर्थ्यात् नित्यार्थकं भविष्यति इति सूत्रे नित्यग्रहणं व्यर्थमिति वाच्यम्, तस्योत्तरार्थत्वस्वीकारेण दोषाभावात्।

भुवश्च—भुवः स्त्रियां नित्यं ङीष् छन्दसि इति सूत्रार्थः। तेन विभु, प्रभु, शम्भुशब्देभ्यः ङीपि यणि विभ्वी, प्रभ्वी शम्भ्वी इत्यादयः सिद्धयन्ति। न च ह्रस्वोकारान्तः दीर्घोकारान्तश्च भूशब्दः द्विविधः। तत्रभुवः संज्ञान्तरयोः इत्यतः भुवः इत्यनुवर्तमाने 'विप्रशंभ्यो ड्वसंज्ञायाम्' इति भूधातोः डुप्रत्यये भुशब्दः ह्रस्वान्तः निष्पन्नो भवन्ति। ततः पञ्चमी उवङि भुवः इति रूपम्। द्वितीयः दीर्घान्तस्तु भूधातोः क्विपि सर्वापहारिलोपे भू इति रूपम्। तस्मात् पञ्चमी विभक्तौ ङसि घित्वेन 'घेर्ङिति' इति गुणे भोःइति स्यादिति भुवः इति निर्देशः नोपपद्यत इति वाच्यम्। भुवः इति सौत्रनिर्देशस्वीकारेणोपपत्तेः। छन्दसि वर्णव्यत्ययस्य दृष्टत्वात्।

रथीरभून्मुद्गलानी—मुद्गल शब्दात् 'मुद्गलाच्छन्दसि लिच्च' इति ङीषो लित्वमानुगागमश्च विधीयते तेन मुद्गलानी इति सिद्धयति।

दीर्घजिह्वी च छन्दसि—दीर्घजिह्वशब्दात् स्त्रीत्वविवक्षायाम् 'स्वाङ्गाच्चोपसर्जनादसंयोगपूर्वात्' इत्यस्य संयोगोपधत्वात् अप्राप्तौ प्राप्तं टापं

प्रवाध्य 'दीर्घजिह्वी च छन्दसि' इति ङीषि दीर्घजिह्वी इति सिद्धयति। अतएव आसुरी वै दीर्घजिह्वी देवानां यज्ञवाट् इत्यत्र ङीष्।

यस्य पर्णमयी जूहूः—पर्णशब्दात् 'द्व्यचश्छन्दसि' इति विकारेऽर्थे विकल्पेन मयटि पर्णमयशब्दात् ङीषि 'पर्णमयी' इति सिद्धयति। एवं शरमयं वर्हिः इत्यत्रापि विकारार्थे वेदे मयट्।

सभेयः—सभायां साधुरित्यर्थे 'सभाया यः' इति य प्रत्यये सभ्यः इति भवति। वेदे तु 'ढश्छन्दसि' इति ढप्रत्यये तस्त्रयादेशे सभेयः इति सिद्धयति।

मेघ्याय च वैद्युत्याय च। अत्र मेघशब्दात् विद्युत् शब्दात् च भवाद्यर्थ-शैषिकाणादिप्रत्ययानां घादिप्रत्ययानां च प्राप्तौ छन्दसि 'भवे छन्दसि' इति यत्प्रत्यये मेघ्यशब्दात् चतुर्थ्येकवचने ङेविभक्तौ ङेर्यादेशे दीर्घे मेघ्याय इति। एवं वैद्युत्याय इति च सिद्धयति।

नचैवं वेदे घादीनामणादीनां च यता वाधात् प्रवृत्तिरेव न स्यादिति वाच्यम् छन्दसि सर्वविधीनां वैकल्पिकत्वेन सति दर्शने तेषां प्रत्ययानामपि प्रवृत्तौ बाधाभावात्।

सोमस्येव मौञ्जवतस्य भक्षः (४१)—'मौञ्जवतः' इत्यत्र मुञ्जवान् नाम पर्वतः। तत्र भवः मौञ्जवतः तस्य इति विग्रहे मुञ्जशब्दादौत्सर्गिकोऽण्प्रत्ययो भवति। छन्दसि यथायथं शैषिकाणामणादीनां घादीनां चापवादस्वरूपोयं 'भवेच्छन्दसि' इति सूत्रविहितः यत्प्रत्ययः प्राप्तः। परन्तु सर्वविधीनां छन्दसि वैकल्पि-कत्वात् पक्षे तेऽपि प्रत्ययाः भवन्ति। अतः अत्र औत्सर्गिकाण्प्रत्यये णित्वादाद्यचो वृद्धौ षष्ठीविभक्तौ ङसि 'मौञ्जवतः' रूपम् इति।

तमु त्वा पाथ्यो वृषा (५१)—'पाथ्यः' इत्यत्र पाथसि जले भवः पाथ्यः इति विग्रहे "पाथोनदीभ्यां ड्यण्" इति सूत्रेण ड्यण् प्रत्ययेऽनुबन्धलोपे डित्वाट्टिलोपे प्रातिपदिकत्वे विभक्तिकार्ये 'पाथ्यः' इति सिद्धम्।

चनो दधीत नाद्यो गिरो मे (५०)—'नाद्यः' इत्यत्र नद्यां भवः इति विग्रहे "पाथोनदीभ्यां ड्यण्" इति ड्यण्प्रत्ययेऽनुबन्धलोपे णित्वादाद्यचो वृद्धौ डित्वाट्टिलोपे विभक्तिकार्ये 'नाद्यः' इति सिद्धम्।

वैशन्तीभ्यः स्वाहा। वेशन्तः पल्वलम्, तत्र भवा आपः इत्यर्थे 'वेशन्तहिमवद्भ्यामण्' इत्येनन्नाणि 'यस्येति च' इति टिलोपे आदिवृद्धौ प्रातिपदिकत्वेन भ्यसि वैशन्तीभ्यः इति सिद्धम्। एवं हैमवतीभ्यः इत्यपि।

स्रोत्यः। स्रोतसि भव इत्यर्थे 'स्रोतसो विभाषा ड्यड्ड्यौ' इति ड्यति प्रत्यये टिलोपे प्रातिपदिककार्ये स्रोत्यः इति। पक्षे औत्सर्गिके 'भवेच्छन्दसि' इति यति 'स्रोतस्यः' इति रूपम्।

सगर्भ्यः। गृधातोः 'अर्तिगृभ्यां भन्' इति भन् प्रत्यये गुणे 'सगर्भसयूथसनुताद्यन्' इति समानश्चासौ गर्भ इति कर्मधारयसमासे 'समानस्य च्छन्दसि' इति समानस्य सभावे सगर्भे जात इत्यर्थे सगर्भशब्दात् यनि टिलोपे प्रातिपदिककार्ये सगर्भ्यः इति। एवं सयूथशब्दात् सयूथ्यः इति सिद्धयति।

यो नः सनुत्य उत वा जियत्नुः। नु धातोः 'नपुंसके भावे क्तः' क्तप्रत्यये नुतशब्देन समानश्चासौ नुत इति विग्रहे कर्मधारयसमासे 'समानस्य च्छन्दसीति' सभावे सनुतशब्दात् 'भवेच्छन्दसि' इति प्राप्तं यतं प्रबाध्य 'सगर्भसयूथसनुताद्यन्' इति यनि टिलोपे सनुत्यः इति।

आ व शसं वृषभं तुग्र्यासु। अत्राकाशयज्ञवरिष्ठेषु तुग्रशब्दः ततः 'भवेच्छन्दसि' इति। यति टिलोपे तुग्र्यः इति। पक्षे 'तुग्राद्घन्' इति घनि घस्येयादेशे तुग्रिया इति 'अत एव त्वमग्ने वृषभस्तुग्रियाणाम्' इत्यत्र तुग्रियाणामिति सिद्धयति।

अनुसखा सयूथ्यः (३२)—अत्र सयूथशब्दात् "सगर्भसयूथसनुताद्यन्" इति सूत्रेण यन्प्रत्ययेऽनुबन्धलोपे प्रातिपदिककार्ये 'सयूथ्यः' इति।

अग्रियः (५१)—अग्रशब्दात् अग्रे भव इति विग्रहे "अग्राद्यत् घच्छौ" इति घप्रत्यये "आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्' इति घस्येयादेशे अकारस्य लोपे विभक्तिकार्ये 'अग्रियः' इति। पक्षे घप्रत्यये ईयादेशे टिलोपे अग्रीयः इति। 'अग्रात् यत्' इति यति अग्र्यः इति सिद्धम्।

न च 'भवेच्छन्दसि' इति यति सिद्धौ 'अग्रात् यत्' इति सूत्रकरणं व्यर्थमितिवाच्यम् 'घादिना बाधो माभूदिति सूत्रस्य सार्थक्यात्'। न च 'अग्राद् घच्छौ च' इति न्यासेनैव चकारातोऽनुकर्षणेन सिद्धौ योगविभागः किमर्थं इति वाच्यम्

'अग्रपश्चाड्डिमच्' इति चकारेण डिमचोऽनुकर्षणं न स्यात् इति योगविभागस्य यद्ग्रहणस्य च सार्थक्यात् ।

समुद्रिया अप्सरसो मनीषिणः (३५)—समुद्रिया इत्यत्र समुन्दतीति समुद्रः "स्फायितञ्चीति" रगागमे निष्पन्नसमुद्रशब्दात् "समुद्राभ्राद् घः" इति सूत्रेण घप्रत्यये "आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्" इति सूत्रेण घस्येयादेशेऽकारस्य लोपे विभक्तिकार्ये 'समुद्रिया' इति भवति । एवमभ्रियस्येति बोध्यम् ।

बर्हिष्येषु निधिषु प्रियेषु (२७)—बृंहधातोः 'बृंहतेर्नलोपश्च' इति सूत्रेण इस्प्रत्यये बृंहतेर्नलोपे च गुणे रपरे बर्हिस् शब्दात् बर्हिषि दत्तम् इति व्युत्पत्तौ "बर्हिषि दत्तम्" इति सूत्रेण यत्प्रत्ययेऽनुबन्धलोपे षत्वे सुपि 'बर्हिष्येषु' इति सिद्धम् ।

याते अग्ने रक्षस्या तनूः (४४)—हन्यतेऽनया सा हननी रक्षसां हननी रक्षस्येति विग्रहे "रक्षोयातूनां हननी" इति सूत्रेण रक्षस् शब्दात् यत् प्रत्यये विभक्तिकार्ये 'रक्षस्या' इति सिद्धम् ।

रेवत्यम् । रयिरस्यास्तीति रयिशब्दात् मतुपि 'छन्दसीरः' इति मस्य नत्वे 'रयेर्मती बहुलम्' इति सम्प्रसारणे पूर्वरूपे च कृते 'उगितश्चे'ति ङीपि, नक्षत्रेऽर्थे तु गौरादित्वान् ङीषि, 'रेवतीजगती० इति यति प्रातिपदिककार्ये रेवती इति ।

जगत्यम् । एवं जगत् शब्दात् 'वर्तमाने पृषद्बृहन्महज्जगच्छतृवच्च' इत्यनेन शतृवद्भावे 'उगितश्च' इति ङीषि रेवतीजगतीहविष्याभ्यः प्रशस्ये' इति यत् प्रत्यये प्रातिपदिककार्ये जगत्यम् ।

हविष्यम् । हविषे हितम् इति विग्रहे उगवदित्वात् यति हविष्या तासां प्रशंसनं इत्यर्थे 'रेवतीजगती'त्यादिना यति 'यस्येति च' इति टिलोपे 'हलो यमां यमि लोपः' इति यलोपे प्रातिपदिककार्ये सिद्धम् ।

असुर्यं देवीभिर्धायि विश्वम् । न सुरोऽसुरः, अथवा अस्यति अस्यते वा इति विग्रहे अस् धातोः 'असेरुरन्' इति उरन् प्रत्यये असुरशब्दात् 'तस्य स्वम्' इत्यर्थे तस्येदमित्यणं प्रबाध्य 'असुरस्य स्वम्' इति यत् प्रत्यये प्रातिपदिककार्ये असुर्यं इति सिद्धम् । आसुरी माया इत्यत्र तु 'मायायामण्' इति मायार्थेऽण् प्रत्यये 'टिड्ढेति' ङीपि आसुरीति सिद्ध्यति ।

तद्वानासामुपधानो मन्त्र० (४८)—"तद्वानासामुपधानो मन्त्र इतीष्टकासु लुक् च मतोः" इति सूत्रस्वरूपम्। तदस्ति अस्य अस्मिन् वा तद्वान्। उपधीयते अनेनेत्युपधानम्। मत्वन्तात् प्रथमासमर्थादासामिति षष्ठ्यर्थे यत्स्यात् यत्प्रथमासमर्थमुपधानो मन्त्रश्चेत् स भवति, यत्तदासामिति निर्दिष्टमिष्टकाश्चेत्ताः भवन्ति, मतोश्च लुक्। अथवा—मत्वन्तप्रकृतिकात् प्रथमान्तात् उपधानकरणीभूतमन्त्रार्थकादिष्टकारूपसम्बन्धिनि यत् स्यान्मतोश्च लुक् इत्यर्थः। उदाहरणञ्चात्र—'वर्चस्याः'। 'ऋतव्याः'।

वर्चस्याः (३९)—वर्चस्वानुपधानो मन्त्र आसामिष्टकानाम् इति वर्चस् शब्दात् "तद्वानासामुपधानो मन्त्र इतीष्टकासु लुक् च मतोः" इति सूत्रेण यत्प्रत्यये मतुपो लुकि जसि विभक्तिकार्ये 'वर्चस्याः' इति सिद्धम्।

ऋतव्याः (५२)—ऋतुशब्दो यस्मिन् मन्त्रेऽस्ति स ऋतुमान् ऋतुमानुपधानो मन्त्र आसामिष्टकानाम् इति विग्रहे ऋतुशब्दात् "तद्वानासामुपधानो मन्त्र इतीष्टकासु लुक् च मतोः" इति सूत्रेण यत्प्रत्यये मतुपो लुकि विभक्तिकार्ये "ऋतव्याः" इति।

आश्विनीरुपदधाति (४९)—अश्वः अस्ति अस्य इत्यश्वशब्दात् "अत इनिठनौ" इति सूत्रेणेनिप्रत्यये तदन्तात् मतुपि प्रत्यये च कृते अश्विमान् स उपधानो मन्त्र आसामिष्टकानामिति विग्रहे "अश्विमानण्" इति सूत्रेणाणि मतोश्च लुकि टिलोपे प्राप्ते "इनण्यनपत्ये" इति प्रकृतिभावे णित्त्वादाद्यचो वृद्धौ ङीपि विभक्तिकार्ये 'आश्विनीः' इति सिद्धम्।

वयस्यासु मूर्ध्नो मतुप् (४७)—"वयस्यासु मूर्ध्नो मतुप्" इत्यत्र—"तद्वानासामुपधानो मन्त्र इतीष्टकासु लुक् च मतोः" इति सर्वं सूत्रमनुवर्तते। मतोरिति पदमावर्त्य पञ्चम्यन्तं बोध्यम्। तथा च—मतुबन्तो यो मूर्धन्शब्दस्ततो मतुप् स्यात् प्रथमस्य मतोर्लुक् च वयःशब्दवन्मन्त्रोपधेयास्विष्टकासु। यस्मिन् मन्त्रे मूर्धवयः शब्दौ स्तस्तेनोपधेयांसु मूर्धन्वतीरुपदधातीति प्रयोगः।

मूर्धन्वतीरुपदधाति (४४)—मूर्धवच्छब्दात् पूर्वेण 'तद्वानासामिति०' यति प्राप्ते "वयस्यासु मूर्ध्नो मतुप्" इति मतुपि प्रथमस्य मतोर्लुकि च कृते "अनो नुट्" इति नुडागमे उदात्तवतो ङीषि विभक्तिकार्ये "मूर्धन्वतीः इति भवति।

नभस्यो मासः (४७) नभोऽभ्रं तदस्मिन्नस्तीति विग्रहे नभस् शब्दात् मतुपं बाधित्वा "मत्वर्थे मासतन्वोः" इति सूत्रेण यत् प्रत्यये विभक्तिकार्ये 'नभस्यः' इति भवति ।

ओजस्या तनूः (४०)—ओजो यस्याः यस्यां वा अस्ति इति विग्रहे मतुपं बाधित्वा "मत्वर्थे मासतन्वोः" इति सूत्रेण यत्प्रत्ययेऽनुबन्धलोपे टापि सु विभक्तौ दीर्घे सस्य लोपे 'ओजस्या' तनूः इति सिद्धम् । अहनि तु 'ओजसोऽहनि यत् खौ' इति यति ओजस्यम् खे ओजसीनमिति ।

मधव्यः (५२)—मधुशब्दात् "मव्धोर्ब च" इति सूत्रेण चकारात् यत् प्रत्ययेऽनुबन्धलोपे "ओर्गुणः" इति सूत्रेण गुणेऽवादेशे प्रातिपादिकत्वे सौ रुत्वे विसर्गे 'मधव्यः' इति ।

वेशोभगीनः (३६)—वेशो बलं तदेव भगः तदस्यास्तीति वेशोभगीनः । वेशोभाग्यः, अत्र "वेशोयशआदेर्भगाद्यल्खौ" इति सूत्रेण खप्रत्यये "आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्" इति सूत्रेण खस्य ईनादेशेऽकारस्य लोपे सौ रुत्वे विसर्गे "वेशोभगीनः" इति भवति । यति तु वेशोभग्यः ।

ये ते पन्थाः सवितः पूर्व्यासः (५०)—'पूर्व्यासः' अत्र पूर्वैः कृतमिति विग्रहे "पूर्वैः कृतमिनयौ च" इति सूत्रेण यत्प्रत्ययेऽनुबन्धलोपेऽकारस्य लोपे पूर्व्य-शब्दाज्जसि "आज्जसेरसुक्" इति असुकि कित्त्वादन्त्यावयवे अनुबन्धलोपे सस्य रुत्वे विसर्गे च कृते 'पूर्व्यासः' इति सिद्धम् । लोके तु 'पौर्विकाः' इति भवति ।

गम्भीरेभिः पथिभिः पूर्विणेभिः—तृतीयान्तात् पूर्वशब्दात् पूर्वैः कृतमित्यर्थे 'पूर्वैः कृतमिनयौ च' इति इन् प्रत्यये भिसि पूर्विणेभिः इति सिद्धम् ।

यस्येदमप्यं हविः (२९)—अद्भिः संस्कृतम् इति विग्रहे तृतीयान्तादप्-शब्दात् "अद्भिः संस्कृतम्" इति सूत्रेण यत्प्रत्ययेऽनुबन्धलोपे सुपो लुकि विभक्तिकार्ये 'अप्यम्' इति भवति ।

सहस्रियासो अपां नोर्मयः (४८)—अत्र सहस्रेण सम्मिताः (सम्मितः सदृशस्तुल्यः इत्यर्थः) इति विग्रहे तृतीयान्तात्सहस्रशब्दात्सम्मितमित्येतस्मिन्नर्थे घः स्यादित्यर्थेन "सहस्रेण संमितौ घः" इति सूत्रेण घ प्रत्यये "आयनेयीनीयियः०" इति घस्येयादेशे "यस्येति च" इत्यकारस्य लोपे विभक्तिकार्ये सहस्रियासः इति भवति ।

सोम्यो ब्राह्मणः (४४)—सोममर्हतीति विग्रहे "सोममर्हति यः" इति सूत्रेण यप्रत्ययेऽकारस्य लोपे विभक्तिकार्ये "सोम्यः' इति भवति। यज्ञार्हब्राह्मण इत्यर्थः।

सोम्यं मधु (४७)—सोमस्य विकारः सोम्यं मधु इति। अत्र सोमशब्दात् "मये च" इति मयडर्थे यप्रत्यये "यस्येति च" इत्यकारस्य लोपे विभक्तिकार्ये 'सोम्यं' मधु इति भवति। सोममयमित्यर्थः।

मधव्यः (५२)—मधुशब्दात् "मधोः" इति सूत्रेण मयडर्थे यत् प्रत्ययेऽनुबन्धलोपे गुणेऽवादेशो विभक्तिकार्ये 'मधव्यः' इति भवति।

सप्तदशाक्षरश्छन्दस्यः (४५)—छन्दः शब्दात् "अक्षरसमूहे छन्दस उपसङ्ख्यानम्" इति यत्प्रत्यये सौ रुत्वे विसर्गे 'छन्दस्यः' इति।

सर्वतातिः—सर्वदेव एवेति विग्रहे। सर्वदेवात्तातिल्' इति तातिल्प्रत्यये प्रातिपदिककार्ये सर्वतातिः। एवं देवतातिः।

शिवतातिः (५२) शिवं करोति इति विग्रहे 'शिवशमरिष्टस्य करे' इति सूत्रेण शिवशब्दात् तातिल् प्रत्यये विभक्तिकार्ये 'शिवतातिः' इति।

शन्तातिः (४६)—शिवस्य भाव इत्यर्थे 'भावे च' इति सूत्रेण शम्शब्दात् परसवर्णे विभक्तिकार्ये 'शन्तातिः' इति। एवं अरिष्टतातिः।

इति चतुर्थोऽध्यायः समाप्तः।

अथ पञ्चमोध्यायः

सप्त सासानि असृजत्—सप्तन् शब्दात् 'सप्तनोऽनुछन्दसि' इति असि टिलोपे आदिवृद्धौ प्रातिपदिकत्वेन जसि 'जश्शसोः शिः' इति जसः शिभावे 'नपुंसकस्य झलचः' इति नुमि उपधादीर्घे सासानि इति सिद्धम्।

पञ्चदशिनोऽर्धमासः—पञ्चदशाहानि परिमाणमेषां इति विग्रहे 'शन् शतोर्डिनिछन्दसि तदस्य परिमाणमित्यर्थे वाच्यः' इति डिनिप्रत्यये टिलोपे प्रातिपदिककार्ये सिद्धम्।

विंशिनः (१५२)—विंशतिर्गोत्राणि परिमाणमेषामिति विग्रहे "शनशतोर्डिनिश्छन्दसि तदस्य परिमाणमित्यर्थे वाच्यः" तत्र 'विंशतेश्चेति वाच्यम्" इति डिनि प्रत्ययेऽनुबन्धलोपे "तिविंशतेर्डिति" इति तिलोपे विभक्तिकार्ये "विंशिनः" इति भवति । एवं त्रिंशिन इत्यपि ।

यज्ञं विप्रस्य मावतः (५०)—अहमिवेति मावान् तस्य मावतः । अत्र "युष्मदस्मदोः सादृश्ये वतुब्वाच्यः" इति वतुपि "प्रत्ययोत्तरपदयोश्च" इति सूत्रेण मादेशे 'आ सर्वनाम्नः' इत्यात्वे षष्ठीविभक्तौ ङसि रुत्वे विसर्गे च 'मावतः, इति भवति । एवं तावतः इत्यपि ।

सादन्यं विदथ्यम् (५०)—सदनं गृहमर्हति इति विग्रहे 'विदथो यज्ञस्तमर्हति' अत्र सदनशब्दात् "छन्दसि च" इति सूत्रेण यत् प्रत्यये "अन्येषामपि दीर्घः" इति दीर्घे विभक्तिकार्ये 'सादन्यम्' इति । विदथ्यमत्रापि अनेन सूत्रेण यत् ।

इद्वत्सरीयः । इद्वत्सरेण निर्वृत्तः अधीष्टः, भृतः, भूतो, भावी वा इत्यर्थे 'वत्सरान्ताच्छश्छन्दसि,इति छस् प्रत्यये छस्येयादेशे प्रातिपदिककार्ये इद्वत्सरीय इति सिद्धम्।

संवत्सरीणः (५१)—संवत्सरे जातः इति विग्रहे संवत्सरशब्दात् "सम्परिपूर्वात्ख च" इति सूत्रेण खप्रत्यये "आयनेयीनीयियः फ ढ ख छ घां प्रत्ययादीनाम्" इति खस्येनादेशे "यस्येति च" इत्यकारलोपे णत्वे विभक्तिकार्ये 'संवत्सरीणः' इति भवति । एवं परिवत्सरीणः इत्यपि ।

ऋत्वियः । ऋतुः अस्य प्राप्तमित्यर्थे 'समयस्तदस्य प्राप्तम्' इत्यत्र 'ऋतोरण्' इति अण् प्राप्ते 'छन्दसि घस्' इति ऋतुशब्दात् घसि तस्येयादेशे 'सिति च' इति पदत्वेन भत्वस्य बाधे 'ओर्गुणः' इत्यस्याप्राप्तौ यणि प्रातिपदिककार्ये ऋत्वियः इति सिद्धम् ।

यदुद्वतो निवतः (४२)—अत्र "उपसर्गाच्छन्दसि धात्वर्थे" इति सूत्रेण उद् उपसर्गात् नि उपसर्गाद् वति प्रत्यये 'यदुद्वतो निवतः' इति भवति । उद्गतान्निर्गतादित्यर्थः ।

पञ्चथम् (४३)—पञ्चानां पूरणमित्यर्थे डटि कृते मटं बाधित्वा "थट् च छन्दसि" इति थडागमेऽनुबन्धलोपे विभक्तिकार्ये 'पञ्चथम्' इति भवति । मटि 'पञ्चमम्' भवति । लोके तु 'पञ्चमम्' इत्येकमेव रूपम् ।

परिपन्थिनम् । पर्यवस्थातृशब्दात् 'छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि' इति इनि प्रत्यये प्रकृतिभागस्य स्थाने पन्थि परि वा आदेशे परिपन्थिन् शब्दात् प्रातिपदिककार्यें परिपन्थिनम् । एवं परिपरिणम् इत्यपि ।

उभयाविनम् (३०)—उभयशब्दात् "बहुलं छन्दसि" इति विनिप्रत्ययेऽनुबन्धलोपे "छन्दोविन्प्रकरणेऽष्ट्रामेखलाद्वयोभयरुजाहृदयानां दीर्घश्चेति वक्तव्यम्" इति वार्तिकेन दीर्घे विभक्तिकार्ये 'उभयाविनम्' इति ।

ई रथीरभूत् (३१)—रथोऽस्यास्तीति विग्रहे रथशब्दाद् "छन्दसीवनिपौ च वक्तव्यौ" इति सूत्रेण ईप्रत्ययेऽकारस्य लोपे रथीशब्दात् सौ रुत्वे विसर्गे च कृते 'रथीः' इति सिद्धम् । एवञ्च 'रथीरभूत्' इति बोध्यम् ।

सुमङ्गलीरियं वधूः (४९)—सुष्ठु मङ्गलं सुमङ्गलम् "सुः पूजायाम्" इति समासः सुमङ्गलमस्ति अस्या अस्य वेति सुमङ्गलशब्दात् विग्रहे "छन्दसिवनिपौ च वक्तव्यौ" इत्यनेन मत्वर्थे ईप्रत्ययेऽकारस्य लोपे सौ रुत्वे विसर्गे च कृते "सुमङ्गलीः" इति भवति ।

तयोर्दार्हिलौ च छन्दसि (३४)—'इदन्तदोर्यथासङ्ख्यं इदं शब्दाद्दा तत् शब्दात् हिल् प्रत्ययौ स्तः' इति सूत्रार्थः । इदाहि व उपस्तुतिम् । तर्हि इत्युदाहरणम् ।

कथा ग्रामं न पृच्छसि (२९)—केन हेतुना न पृच्छसीत्यर्थः ! 'कथा' इत्यत्र "था हेतौ च छन्दसि" इति सूत्रेण किमस्था प्रत्यये "प्राग्दिशो विभक्तिः" इत्यधिकाराद्विभक्तिसंज्ञायां "किमः कः" इति सूत्रेण किमः कादेशे अव्ययत्वे सुपो लुकि 'कथा' इति सिद्धम् ।

कथा दाशेम (४३)—केन हेतुना दद्याम इत्यर्थे किम् शब्दात् "था हेतौ च च्छन्दसि" इत्यनेन किमस्थाप्रत्यये तस्य "प्राग्दिशो विभक्तिः" इत्यधिकारात् विभक्तिसंज्ञायां "किमः कः" इति कादेशे अव्ययसंज्ञायां सुपो लुकि 'कथा' इति भवति । एवञ्च 'कथा दाशेम' इति ।

आसुतिं करिष्ठः (२८)—कर्तृशब्दात् "तुश्छन्दसि" इति सूत्रेण इष्ठन् प्रत्ययेऽनुबन्धलोपे "तुरिष्ठेमेयस्सु" इति तृलोपे 'करिष्ठ' इत्यस्य प्रातिपदिकत्वे विभक्तिकार्ये 'करिष्ठः' इति भवति ।

तं प्रत्नथा (५२)—प्रत्नशब्दात् "प्रत्नपूर्वविश्वेमात्थाल् छन्दसि" इति सूत्रेण थाल्प्रत्ययेऽनुबन्धलोपेऽव्ययत्वे सुपो लुकि 'प्रत्नथा' इति सिद्धम् ।

प्रतरम् । प्रकर्षे विद्यमानात् प्रशब्दात् प्रकर्षेऽर्थे तरपि 'अमु च छन्दसि' इति अमु प्रत्यये प्रातिपदिकत्वेन सौ स्वरादिगणे अम् शब्दस्य पाठात् अमन्तस्याव्ययत्वेन सुपो लुकि प्रतरम् इति सिद्धम् ।

नच अमुप्रत्यये उदित्करणं व्यर्थमिति वाच्यम् 'इच एकाचोऽम्प्रत्ययवत्' 'इत्यत्रास्य ग्रहणनिषेधायोदित्करणस्यावश्यकत्वात् । तेन स्त्रियं मन्यः इत्यादौ 'यस्येति च' इति लोपो न । अन्यथा-अत्रापि दृष्टं यत् कार्यं तस्यातिदेशे लोपः स्यादेव ।

वृकतिः । वृकशब्दात् प्रशंसोपाधिकेऽर्थे 'वृकज्येष्ठाभ्यां तिल्तातिलौ च छन्दसि' इति तिल् प्रत्यये प्रातिपदिककार्ये वृकतिः । एवं ज्येष्ठशब्दात् तातिल्प्रत्यये ज्येष्ठतातिरिति भवति ।

अनसन्तान्नपुंसकाच्छन्दसि (३६)—इति सूत्रस्वरूपम् । अन्नन्तात् असन्ताच्च नपुंसकात् तत्पुरुषाट्टच् स्यात्, स च समासान्त इत्यर्थः । 'ब्रह्मसामं भवति' । 'देवच्छन्दसानि' इत्युदाहरणम् ।

ब्रह्मसामं भवति (३९)—अत्र "अनसन्तान्नपुंसकाच्छन्दसि" इति सूत्रेण-टचि प्रत्ययेऽनुबन्धलोपे शेषकार्ये 'ब्रह्मसामं भवति' इति भवति ।

उभयतोदतः प्रतिगृह्णाति (२६)—उभयतो दन्ताः यस्येति विग्रहे "छन्दसि च" इति सूत्रेण दन्तशब्दस्य 'दतृ' आदेशेऽनुबन्धलोपे शसि रूपम् । लोके तु 'उभयतोदन्तान्' 'उभयतोदन्तकान्' इति ।

बहुप्रजाः । बह्व्यः प्रजाः येषां ते इति बहुव्रीहिसमासे 'बहुप्रजाश्छन्दसि' इति निपाते बहुप्रजाः इति । लोके तु बहुप्रजः इति ।

हतमाता (५१)—हता माता यस्येति हतमातेत्यत्र "नद्यृतश्च" इति सूत्रेण कपि प्राप्ते "ऋतश्छन्दसि" इति सूत्रेण तन्निषेधे 'हतमाता' इति भवति ।

इति पञ्चमोऽध्यायः ।

अथ षष्ठोऽध्यायः

योजागार (४७)—जागृधातोर्लिटि प्रथमपुरुषैवचने तिपि णलि 'एकाचो द्वे प्रथमस्य' इति नित्ये द्वित्वे प्राप्ते "छन्दसि वेति वक्तव्यम्" इति विकल्पेन विधानात् द्वित्वाभावपक्षे णित्त्वात् वृद्धौ रपरत्वे 'जागार' इति। एवञ्च 'यो जागार' इति वोध्यम्।

दाति प्रियाणि। दाण् धातोः लटि तिपि शपि तस्य श्लौ 'श्लौ' इति द्वित्वे प्राप्ते 'छन्दसि नेति वक्तव्यम्' इति द्वित्वविकल्पपक्षे दाति इति।

तुजादीनां दीर्घोऽभ्यास्य। अत्र आदिशब्दः प्रकारे नतु व्यवस्थायाम्। तेन सतः एव दीर्घत्वमनेन विधीयते। ततः अयं दीर्घः प्रत्ययविशेषे एव साधुः। अत एव भाषायां तुतोज इत्येव। नच 'व्यत्ययो बहुलम्' इत्यनेन गतार्थमिदं सूत्रमिति वाच्यम्, तस्यैव प्रपञ्चत्वस्वीकारेण दोषाभावात्।

आहुव ऊतये। आङ् पूर्वात् ह्वेञ् धातोः लटि आत्मनेपदोत्तमैकवचने 'बहुलं छन्दसि' इति शपो लुकि सम्प्रसारणमुवङादेशश्च।

दाधार यः पृथिवीम् (४६)—अत्र प्रयोगांशे 'दाधार' अत्र धृधातोर्लिटि तिपि णलि द्वित्वेऽभ्यासकार्ये वृद्धौ रपरत्वे 'दधार' इति जाते "तुजादीनां दीर्घोऽभ्यासस्य" इति सूत्रेणाभ्यासदीर्घे 'दाधार' इति सिद्धम्। एवञ्च 'दाधार यः पृथिवीम्' इति भवति।

तूतुजानः। तुर्जेलिट् तस्य कलच् 'तुजादीनां दीर्घोभ्यास्य' इति अभ्यासस्य दीर्घे प्रातिपदिककार्ये सिद्धम्।

स तूताव (५१)—तुः इति सौत्रो धातुस्तस्माल्लिटि तिपि णलादेशेऽनुबन्धलोपे आर्द्धधातुकत्वे द्वित्वे वृद्धौ आवादेशे 'तुताव' इति स्थिते 'तुजादीनां दीर्घोऽभ्यासस्य' इति सूत्रेणाभ्यासस्य दीर्घे 'तूताव' इति।

तृचं साम (३९)—तिस्रः ऋचः यस्मिन् तत् तृचमिति विग्रहे "ऋक्पूरब्धूः पथामानक्षे" इत्यप्रत्यये "ऋचित्रेरुत्तरपदादिलोपश्च च्छन्दसि" इत्यनेन ऋचि शब्दे परे त्रेः सम्प्रसारणे उत्तरपदादेर्लोपे च जाते ततश्च सौ पूर्वरूपे 'तृचम्' इति भवति।

रेवान् (४०)—रयिशब्दात् "तदस्यास्त्यस्मिन्निति मतुप्" इति सूत्रेण मतुपि "रयेर्मतौ बहुलम्" इति संप्रसारणे "सम्प्रसारणाच्च" इति सूत्रेण पूर्वरूपे "छन्दसीरः" इति सूत्रेण मकारस्य वकारे गुणे विभक्तिकार्ये 'रेवान्' इति सिद्धम् ।

श्रितानो ग्रहाः (४६)—पाकार्थकअकारेत्संज्ञक 'श्री' धातोः निष्ठायां क्तप्रत्ययेऽनुबन्धलोपे "अस्पृधेथामानृचुरानृहुश्चिच्युषेतित्याजश्राताश्रितमाशीराशीर्ताः" इति सूत्रेण निपातनात् श्रीणातेर्ह्रस्वत्वे जाते विभक्तिकार्यें 'श्रितानो ग्रहाः' इत्यत्र 'श्रिता' इति सिद्धम् ।

निचिक्युः । चायधातोः लिटि कौ उसि चायः की इत्यनेन की इत्यादेशे द्वित्वे 'कुहोश्चुः' कुत्वे एरनेकाच इति यणि नि इति उपसर्गेण योगे निचिक्युरिति सिद्धम् ।

निचाय्य । चायधातोः क्त्वा प्रत्यये निशब्देन गतिसमासे 'समासेऽनञ्पूर्वे क्त्वो ल्यप्' इति ल्यबादेशे प्रातिपदिककार्ये निचाय्य इति सिद्धम् ।

वसून्यानृहुः । अर्ह धातोः लिटि उसि द्वित्वे अभ्यासकार्ये नुटि अत आदेरिति दीर्घत्वे 'तस्मान्नुड् द्विहलः' इति नुडागमे आनृहुरिति सिद्धम् ।

चिखाद (५२)—दैन्यार्थकखिदधातोर्लिटि व्यत्ययेन परस्मैपदे तिपि णलि द्वित्वेऽभ्यासकार्ये चिखिद्+अ इति जाते "खिदेश्छन्दसि" इति सूत्रेणैचः आत्वे "चिखाद" इति आत्वाभावपक्षे 'चिखेद' इति भवति ।

शीर्ष्णः । शिरः शब्दस्य 'शीर्षश्चन्दसि' इति शीर्षन् आदेशे षष्ठ्येकवचने ङसि 'अल्लोपोनः' इति अल्लोपे रषाभ्यामिति णत्वे विसर्गे सिद्धम् ।

नच शिरः शब्दस्य शीर्षन्नादेशे वेदे शिरः शब्दस्य प्रयोगानापत्तिरिति वाच्यम् अन्यतरस्यामिति पदानुवृत्या उभयरूपसिद्धेः ।

ताता पिण्डानाम् । तत् शब्दात् प्रातिपदिकत्वेन जशि त्यदाद्यत्वे पररूपत्वे 'जश्शसोः शिः' 'इति जशः श्यादेशे' शेश्छन्दसि बहुलम्' इति शेर्लोपे प्रत्ययलक्षणेन नपुंसकस्य झलचः इति नुमि 'सर्वनामस्थाने चासम्बुद्धौ' इति दीर्घे 'नलोपः प्रातिपदिकान्तस्य' इति न लोपे तानि तानि इत्यर्थे ता ता । इति रूपं सिद्धम् ।

भय्यः (४७)—बिभेत्यस्मादिति भय्य इत्यत्र 'कृत्यल्युटो बहुलम्' इत्यनेनापादाने बाहुलकात् यति प्रत्ययेऽनुबन्धलोपे "भय्यप्रवय्ये च छन्दसि" इति

सूत्रेण यतिपरेऽयादेशनिपातनात् 'भय्य' इति जाते सौ रुत्वे विसर्गे 'भय्यः' इति भवति।

प्रकृत्यान्तः पादमव्यपरे। 'एङः पदान्तादति' इति एङः अति इति चानुवर्तते। अन्यस्य कार्यिणोऽसम्भवात्। अत्र पञ्चम्यन्तमेङः पदं प्रथमान्तत्वेन विपरिणम्यते। पादस्य मध्ये इत्यन्तः पादम् इति अव्ययीभावः। अन्तः इति अव्ययमधिकरणशक्तिप्रधानं मध्यमाचष्टे। प्रकृतिस्वभावः कारणं वा भवति। यथा—दुस्त्यजा प्रकृतिः स्वभावे। दुग्धं दध्नः प्रकृतिरिति कारणे। वाच्छन्दसि इति सूत्रात् छन्दसीति आवर्तते तेनात्र पादशब्देन ऋक्पाद एव गृह्यते। ततः ऋक् पादमध्यस्थ एङ् प्रकृत्या स्यात् अति परे नतु वकारयकारपरेऽति इत्यर्थः सम्पद्यते। तेन उपप्रयन्तो अध्वरम्, सुजात अश्व सुनृते इत्यादौ 'एङः पदान्तादति इत्यनेन पूर्वरूपं न भवति। अन्तः पादमित्येव तेन कया मती कुत एतास एतेऽर्चयन्ति शुष्मं वृषणो वसूया, इति मन्त्रस्य ऋक्त्वेऽपि एते इत्यस्य पादान्तत्वेन अर्चयन्ति इत्यस्य द्वितीयपादादित्वेन पादमध्यस्थत्वाभावान्न प्रकृतिभावः किन्तु पूर्वं रूपं भवत्येव। तेऽव्रदन्, इत्यत्र अतः वकारयकारपरकत्वेन न ऋक्पादमध्यस्थत्वेऽपि प्रकृतिभावः।

उप प्रयन्तो अध्वरम् (३३)—अत्र "एङः पदान्तादति" इति सूत्रेण पूर्वरूपे प्राप्ते "प्रकृत्यान्तः पादमव्यपरे" इति सूत्रेण प्रकृतिभावे 'उपप्रयन्तो अध्वरम्' इति भवति।

तेनो अवन्तु (४१)—अवतेर्लोटि प्रथमपुरुषबहुवचने 'अवन्तु' इति ततः ते नो अवन्तु इति दशायां "एङः पदान्तादति" इति सूत्रेण पूर्वरूपे प्राप्ते तम्प्रबाध्य "अव्यादवद्यादवक्रमुरव्रतायमवन्त्ववस्युषु च" इति सूत्रेण प्रकृतिभावे 'ते नो अवन्तु' इति। यद्यपि बहुवृचैः प्रकृतिभावो न क्रियते तथापि बाहुलकात् समाधेयम्।

कुशिकासो अवस्यवः (३१) अवे कसुनि ततः क्यचि उः। अत्र "एङः पदान्तादति" इति पूर्वरूपे प्राप्ते तम्प्रबाध्य "अव्यादवद्यादवक्रमुरव्रतायमवन्त्ववस्युषु च" इति सूत्रेण प्रकृतिभावे 'कुशिकासो अवस्यवः' इति सिद्ध्यति।

उरो अन्तरिक्षम् (४५)—अत्रापि "एङः पदान्तादति" इति पूर्वरूपे प्राप्ते तम्प्रबाध्य "यजुष्युरः" इति सूत्रेण प्रकृतिभावे 'उरो अन्तरिक्षम्' इति भवति।

यजुषि पादाभावादनन्तःपादार्थं वचनम् (४५)अयमाशयः—ननु 'उरो अन्तरिक्षम्' इत्यत्र "प्रकृत्यान्तः पादमव्यपरे" इत्यनेनैव प्रकृतिभावे सिद्धे व्यर्थोयं योग इति चेन्न 'यजुषि पादाभावादनन्तःपादर्थं वचनम्" इति सूत्रस्य सार्थक्यात्।

आपोजुषाणो० (४२)—'आपो जुषाणो वृष्णो वर्षिष्ठेऽम्बेऽम्बालेऽम्बिके पूर्वे।' इति सूत्रेण यजुषि अति परे प्रकृतिभावो भवति। तेन 'आपो अस्मान् मातरः' जुषाणो अग्निराज्यस्य' इत्यादौ प्रकृतिभावः। "अम्बे अम्बाले अम्बिके' अत्र अस्मादेव वचनात् "अम्बार्थनद्योर्ह्रस्वः" इति सूत्रेण ह्रस्वो न भवति।

अङ्ग इत्यादौ च (४०)—प्रकृत्या भवतीत्यस्य सम्बन्धः। अतिक्रान्त-प्रत्यवमर्शिना तच्छब्देन इतिशब्दार्थं प्रकाशयति तदादौ इति। तेन तस्याङ्गशब्द-दिस्तदादिः तद्रूपो योऽकारस्तस्मिन् परे पूर्वो य एङ् स प्रकृत्या भवतीत्यर्थः।

नन्वत्र चकारः किमर्थ इति चेच्छृणु। असति चकारेऽङ्गशब्दस्यैवैङ् तदादावति परतः प्रकृत्या भवतीत्यर्थः स्यात्। तथा च 'अङ्गे अङ्ग' इत्यत्रैव स्यात् 'अङ्ग अदीव्यत्' इत्यत्र न स्यात्। सति तु तस्मिन्नङ्गशब्दस्य य एङ् यत्र कुत्रचित् अति प्रकृत्या भवति तदादौ चाति परतो यः कश्चिदेङ् स प्रकृत्या भवतीत्ययमर्थो भवति। तेन 'अङ्गे अङ्गे अदीव्यत्' 'प्राणो अङ्गे' इत्युभयत्राऽपि भवति प्रकृतिभावः।

अयं सो अध्वरः (३७)—अत्र पूर्वरूपे प्राप्ते "अनुदात्ते च कुधपरे" इति सूत्रेण प्रकृतिभावे 'अयं सो अध्वरः' इति भवति।

त्रीरुद्रेभ्यो अवपथाः—(४२) अत्र वप् धातोर्लिङि थासि शपि अडागमे "तिङ्ङतिङः' इति अनुदात्तत्वेरुत्वे विसर्गे 'त्रिरुद्रेभ्यो+अवपथाः' इति दशायां पूर्वरूपे प्राप्ते "अवपथासि च" इति सूत्रेण प्रकृतिभावे 'त्रिरुद्रेभ्यो अवपथा' इति भवति।

अभ्र आँ अपः (३८)—अत्र "आङोऽनुनासिकश्छन्दसि" इति सूत्रेण अकारे परे आङोऽनुनासिके जाते 'अभ्र आँ अपः' इति भवति। अत्र "उपदेशेऽ-जनुनासिक इत्" इति सूत्रेण इत्संज्ञा तु न भवति, सूत्रे उपदेशग्रहणात्।

ईषा अक्षो हिरण्ययः (३२)—अत्र "ईषा अक्षादीनां छन्दसि प्रकृति-भावो वक्तव्यः" इति वार्तिकेन प्रकृतिभावे 'ईषा अक्षो हिरण्ययः' इति भवति।

ज्या इयम् (३९)—अत्र आद् गुणे प्राप्ते "ईषा अक्षादीनां छन्दसि प्रकृतिभावो वक्तव्यः" इत्यनेन प्रकृतिभावे 'ज्या इयम्' इति भवति।

पूषा अविष्टु (३६)—अत्र सवर्णदीर्घे प्राप्ते "ईषा अक्षादीनां छन्दसि प्रकृतिभावो वक्तव्यः" इति प्रकृतिभावे 'पूषा अविष्टु' इति भवति।

एष स्य भानुः (३५)—अत्र "स्यश्छन्दसि बहुलम्" इति स्योत्तरसु इत्यस्य लोपे 'एष स्य भानुः' इति भवति।

ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे (३२)—इति सूत्रस्वरूपम्। ह्रस्वात्परस्य चन्द्रशब्दस्योत्तरपदस्य सुडागमः स्यात् मन्त्रे इत्यर्थः। 'सुश्चन्द्र दस्म' हरिश्चन्द्रो मरुद्गणः' इत्युदाहरणे।

सुश्चन्द्र दस्म (५०) सु+चन्द्र इति स्थिते "ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे" इति सूत्रेण ह्रस्वात् परस्य चन्द्रशब्दस्योत्तरपदस्य सुडागमे उटावितौ "स्तोः श्चुना श्चुः" इति सूत्रेण श्चुत्वे 'सुश्चन्द्र' इति। एवञ्च 'सुश्चन्द्र दस्म' इति भवति।

सोमः सधस्थम् (३१)—सह तिष्ठतीत्यर्थे "आतोऽनुपसर्गे कः" इति सूत्रेण स्थाधातोः कप्रत्ययेऽनुबन्धलोपे "आर्द्धधातुकं शेषः" इति सूत्रेणार्द्धधातुकत्वे "आतो लोप इटि च" इति सूत्रेणाकारस्य लोपे 'सधमादस्थयोश्छन्दसि' इति सूत्रेण सहस्य सधादेशे विभक्तिकार्ये 'सधस्थम्' इति। लोके 'सहस्थम्' इति भवति। एवञ्च 'सोमः सधस्थम्' इति।

मरुद्भिरुग्रः पृतनासु साह्ला (४८)-अत्र सहेः तृचि अनङादिकार्ये सह+ता इति स्थिते ढत्वधत्वष्टुत्वढलोपादिकार्ये दीर्घे प्रातिशाख्यभाष्येणाचोमध्यस्थस्य डस्य लत्वे ढस्य ह्लश्च विहिते 'साह्ला' इति भवति।

अष्टापदी (५१)—अष्टौ पादा अस्या इति विग्रहे बहुव्रीहिसमासे समासत्वात् सुपो लुकि "छन्दसि च" इति सूत्रेण अष्टन आत्वे "सङ्ख्यासुपूर्वस्य" इति सूत्रेण पादोत्तराकारस्य लोपे "पादोऽन्यतरस्याम्" इति ङीपि अनुबन्धलोपे विभक्तिकार्ये 'अष्टापदी इति भवति'।

नू मर्तः (३६)—अत्र "ऋचितुनुघमक्षुतङ्कुत्रोरुष्याम्" इति सूत्रेण 'नु' इत्यस्य दीर्घे 'नू' मर्तः इति। लोके 'नु' मर्तः इति।

भरता जातवेदसम् (३९)—णकारेत्संज्ञकभृधातोर्लोटि थप्रत्यये सार्वधातुकत्वे शपि अनुबन्धलोपे गुणे रपरे "लोटो लङ्वत्" इति लङ्वद्भावे "तस्थस्थमिपां तान्तन्तामः" इति सूत्रेण तादेशे "ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणाम्" इति दीर्घे "भरता" इति सिद्धम्। लोके तु "भरत" इति भवति।

श्रृणोत ग्रावाणः इत्यत्र ऋचि तुनु० दीर्घत्ववारणप्रकारः (१९३७)–"ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणाम्" अत्र सूत्रे तङिति यादेशस्य ङित्वपक्षे ग्रहणम् तेन 'श्रृणोत ग्रावाणः" अत्र न दीर्घः। यतः श्रृणोत इत्यत्र 'तप्तनप्तनथनाश्च' इति तबादेशेन पित्त्वात् ङित्त्वं नास्ति।

"निपातस्य च" इत्यनेनैवत्वादीनां दीर्घत्वे सिद्धे ऋचि तुनुघ० इति सूत्रे तुनुघेत्यादीनां फलम् (३८)—ननु "ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याम्' इति सूत्रस्थतुनुमेत्यादीनां निपातत्वात् "निपातस्य च" इत्यनेनैव दीर्घे सिद्धे त्वादीनां ग्रहणं व्यर्थमिति चेन्न। अद्रव्यार्थाश्चादयो निपातसंज्ञाः स्युरेवञ्च द्रव्यार्थानां त्वादीनां दीर्घार्थं "निपातस्य च" इति सूत्रस्याऽप्रवृत्त्या त्वादीनां ग्रहणस्याऽवश्यकत्वात्।

यत्रा नश्चक्रा (४६)–अत्र 'यत्रा' अत्र "ऋचि तुनुघमवुतङ्कुत्रोरुष्याणाम्" इति सूत्रेण दीर्घे 'यत्रा' इति एवञ्च यत्रानश्चक्रा" इति।

द्व्यचतिस्तिङः (४५)—द्वौ अचौ यस्मिन् स तस्य द्व्यचः, तिङ् प्रत्याहारः अन्ते यस्य सः तस्य। तथा च द्व्यच्कविशिष्टस्य तिङन्तस्यातो दीर्घः स्यादृचि इति सूत्रार्थः। 'चक्रा जरसम्' इत्युदाहरणम्।

चक्रा जरसम् (४०)—चक्रेतिलोटि मध्यमपुरुषबहुवचनस्य रूपम् अत्र "द्व्यचोऽतस्तिङः" इति सूत्रेण दीर्घे 'चक्रा' इति भवति। एवञ्च 'चक्रा जरसम्' इति भवति।

पूरुषः (५२)—अत्र पुरुषशब्दात् सौ रुत्वे विसर्गे पुरुषः एवं स्थिते अन्येषामपि पूर्वपदस्थानां दीर्घः स्यादित्यर्थके "अन्येषामपि दृश्यते" इति सूत्रेण पकारोत्तरवर्तिन उकारस्य दीर्घे 'पूरुषः' इति। दीर्घाभावपक्षे पुरुषः इति रूपद्वयं मन्त्रे भवति।

बहुल छन्दस्यमाङ् योगेऽपि (३८)—इति सूत्रस्वरूपम्। माङ्योगेऽप्यमाङ्योगेऽपि बहुलमडाटौ भवतः, अमाङ्योगेऽपि न भवतः माङ् योगेऽपि च भवतः इत्यर्थः। जनिष्ठा उग्रः सहसे तुराय। मा वः क्षेत्रे परबीजान्यनाप्सुः। इत्युदाहरणे

'इरयो रे' अत्र द्विवचनग्रहणफलम् (४९)—इर इत्येतस्य रे आदेशः स्याच्छन्दसि इत्यर्थः। अत्र द्विवचननिर्देशात् लक्षणप्रतिपदोक्तपरिभाषा न प्रवर्तते विशेषः उदाहरणेषु द्रष्टव्यः।

प्रथमं दध्र आपः (४७)—अत्र धाञो लिटि झादेशे झस्य "लिटस्तझयोरेशिरेच्" इति सूत्रेण 'इरेचि' कृते द्वित्वेऽभ्यासकार्ये "इरयो रे" इति सूत्रेण 'इरे' इत्यस्य परत्वात् रेभावे कृतेऽनजादित्वादालोपेऽप्राप्ते रेभावस्याभीयत्वेनासिद्धत्वाल्लोपे रेशब्दस्ये टि कृते पुनरपि "इरयो रे" इति रे आदशे 'दध्रे' इति।

ननु 'लक्षणप्रतिपदोक्तपरिभाषया कथमिडागमविशिष्टे "इरयो रे" इत्येतस्य प्रवृत्तिरिति चेन्न; इरयोरिति द्विवचननिर्देशात् लक्षणप्रतिपदोक्तपरिभाषाया: अप्रवृत्तेः ।

शकुना इव पप्तिम (२६)—पतनार्थकपत्लृ-धातोः लिटि मसि आर्द्धधातुकत्वे मादेशे द्वित्वे मस्य इडागमेऽभ्यासत्वे 'हलादिः शेषे' "तनिपत्योश्छन्दसि" इति सूत्रेणोपधालोपे 'पप्तिम' इति सिद्धम् । लोके 'पेतिम' इति भवति ।

श्रुणुधी गिरः (३८)—श्रु धातो लोटि सिपि हौ 'श्रुवः शृ च'' इति सूत्रेण श्रुवः शृभावेश्नुप्रत्यये विधानसामर्थ्यात् "उतश्च प्रत्ययादि" ति हेर्लुगभावे "श्रुशृणुपृकृस्यश्छन्दसि" इति सूत्रेण हेर्धिरित्यादेशे "अन्येषामपि" इति दीर्घे 'शृणुधी' इति भवति ।

उरुणस्कृधि (४३)—कृधातोः लोटि सिपि हौ "नश्च धातुस्थोरुषुभ्यः" इति सूत्रेण णत्वे "कः करत्०" इत्यादि सूत्रेण विसर्जनीयस्य सत्वे 'श्रुशृणुपृकृवृभ्यश्छन्दसि, इति हेर्धौ कृते 'उरुणस्कृधि' इति भवति ।

रारन्धि (३५)—रम्धातोर्लोटि रमेर्व्यत्ययेन परस्मैपदे सिपि तस्य हौ "अङितश्च" इति सूत्रेण हेर्धिरित्यादेशे शपि शपः श्लौ अभ्यासत्वे हलादिः शेषेऽभ्यासदीर्घे 'रारन्धि' अत्र "अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति" इति सूत्रेण मलोपस्तु न हेरङित्त्वात् ।

अस्मे प्रयन्धि (३२)—प्रपूर्वकयम्धातोर्लोटि सिपि "सेर्ह्यपिच्च" इति 'हि' आदेशे शपि छन्दसि पक्षे पित्त्वादङित्त्वे "अङितश्च" इति 'हेर्धि'रित्यादेशे "बहुलं छन्दसि" इति शपो लुकि 'प्रयन्धि' इति ।

त्मना देवेषु (३३) आत्मना देवेषु इत्यवस्थायां "मन्त्रेष्वाङ्यादेरात्मनः" इति सूत्रेण आत्मन्शब्दस्यादेराकारस्य लोपे 'त्मना देवेषु' इति भवति ।

त्वं रजिष्ठमनुनेषि (४९)—अत्र ऋजुशब्दादतिशयार्थे इष्ठन्प्रत्ययेऽनुबन्धलोपे टिलोपे 'ऋजिष्ठ' इति जाते विभक्तिकार्ये अत्र छन्दसि "विभाषर्जोश्छन्दसि" इति सूत्रेण ऋजुशब्दस्य ऋतः स्थाने रकारादेशे 'रजिष्ठम्" रकारादेशाभावपक्षे 'ऋजिष्ठम्' इत्युभयरूपं भवति ।

वास्त्व्यम् (३९)—वास्तुनि भवमिति विग्रहे "ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिण्ययानि छन्दसि" इति सूत्रेण वास्तुशब्दात् निपातनात् यत् प्रत्यये यणादेशे च विभक्तिकार्ये 'वास्त्व्यम्' इति सिद्धम् । तस्येदमित्यर्थेऽणि तु वास्त्वम् ।

हिरण्ययेन सविता—अत्र हिरण्यशब्दात् मयटि तत्र मकारस्य लोपे निपातनेन 'हिरण्ययेन इति सिद्धम् ।

धेनवो दुह्रे—दुह धातोः लटि शपि तस्य अदादित्वाल्लोपे झप्रत्यये टेरत्वे झस्यादादेशे वहुलं छन्दसि इति रुडागमे 'लोपस्त आत्मनेपदेषु' इति विकल्पेन तलोपे दुह्रे इति । लोपाभावपक्षे दुह्रते इति सिद्धम् ।

अदृश्रमस्य । दृशधातोः लुङ व्यत्ययेन प्रथमपुरुषैकवचनस्थाने उत्तमपुरुषैकवचने मिपि तस्याकादेशे श्लौ तस्य 'इरितो वा इत्यादि वहुलं छन्दसि' इति रुडागमे अडागमे अदृश्रम् इति सिद्धम् । इदं वह्वृचानां शाखासु । शाखान्तरेषु अदृश्रन्नस्येति पाठः ।

नचात्र 'ऋदृशोऽङि गुणः' इति गुणः कुतो नेति वाच्यम् क्ङिति चेति निषेधात् । न च तस्य ङित्वेन प्रवृत्यात्र प्राप्तिरेव नासीदिति वाच्यम् सार्वधातुकस्य ङित्तमाश्रित्य प्रवृत्तिरिति । न च एकादेशःरष्य पूर्वनिघो स्थानिवन्न भवतीति वाच्यम् बहुलग्रहणेन गुणनिषेधाय स्थानिवदभावविधानात् ।

इति षष्ठोऽध्यायः

अथ सप्तमोऽध्यायः

नेतराच्छन्दसि (३१)—इतरशब्दात् परयोः स्वमोरद्डादेशो न स्याच्छन्दसि इत्यर्थः। उदाहरणञ्चात्र 'वार्त्रघ्नमितरम्' इति।

वार्त्रघ्नमितरम् (३९)—इत्यत्र "अद्डतरादिभ्यः" इति सूत्रेण स्वमोरद्डादेशे प्राप्ते "नेतराच्छन्दसि" इति तन्निषेधे "अतोम्" इत्यमादेशे पूर्वरूपे 'इतरम्' इति भवति।

यजमानं परिधापयित्वा। धाधातोः हेतुमण्णिच् 'अर्तिह्री इति पुक्ति पुगश्चेति गुणे क्त्वा, इट् अयादेशे प्रातिपदिककार्ये अव्ययत्वेन सुपो लुकि सिद्धम्।

नचात्र परि उपसर्गयोगे 'समासेऽनञ् क्त्वो ल्यप्' इति ल्यप् कुतो नेति वाच्यम्। 'क्त्वापिच्छन्दसि' इत्यनेन क्त्वाऽपि विधानात्।

सुपां सुलुक्० (४५)—"सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः" इति सूत्रस्वरूपम्। सुपां स्थाने सु–लुक्–पूर्वसवर्ण–आ-आत्१शे–या–डा-ड्या–याच्–आल् एते आदेशाः स्युश्छन्दसि इत्यर्थः। उदाहरणानि च यथा 'ऋजवः सन्तु पन्थाः' अत्र पन्थानः इति प्राप्ते सुः।

परमे व्योमन् (४३)—अत्र सप्तम्येकवचने 'व्योमनि' इति प्राप्ते अनेन ङेर्लुकि 'परमे व्योमन्' इति।

धीतीमती सुष्टुती। अत्र धीत्या, मत्या सुष्टुत्या' इति प्राप्ते अनेन पूर्वसवर्णदीर्घः।

या सुरथा रथीतमोभा देवा दिविस्पृशा। यौ सुरथौ दिविस्पृशौ इति प्राप्ते आ भवति।

नताद् ब्राह्मणम्। अत्र नतमिति प्राप्ते आत्।

या देव विद्म तात्वा। अत्र यम् इति प्राप्ते आत्।

नयुष्मे वाज-बन्धवः, अस्मे इन्द्राबृहस्पती इत्यादौ। युष्मासु, अस्मभ्यम् इति प्राप्ते शे।

उरुया धृष्णुया। अत्र उरुणा, धृष्णुना इति प्राप्ते या।

नाभा पृथिव्याः (३७)—अत्र सप्तम्येकवचने नाभौ इति प्राप्ते अनेन सूत्रेण डाकृते डित्वाट्टिलोपे 'नाभा' इति भवति ।

ता अनुष्ठ्योच्च्यावयतात् । अनुष्ठानमनुष्ठा । व्यवस्थावदङ् आङो ड्य ।

साधुया । साध्विति प्राप्ते.याच् ।

वसन्ता यजेत । वसन्ते इति प्राप्त आल् । इत्युदाहरणानि ।

ऊर्विया (५१)—अत्र ऊरुशब्दात् तृतीयैकवचने टाविभक्तौ नादेशं बाधित्वा "इयाडीयाजीकाराणामुपसङ्ख्यानम्" इतीयादेशे यणादेशे ऊर्विया इति ऊरुणा इति प्राप्ते ।

दृति न शुष्कं सरसी शयानम् (४१)—अत्रांशे 'सरसी' अत्र "इयाडीयाजीकाराणामुपसङ्ख्यानम्" इति ङेरीकारे 'सरसी' इति 'सरसि' इति प्राप्ते । लोके 'सरसि' भवति । अत्र ङेरीकारे आद्युदात्ते पदे प्राप्ते व्यत्ययेनान्तोदात्तता ।

'प्र बाहवा सिसृतम्' (४४)—अत्र तृतीयैकवचने 'प्रवाहुना' इति प्राप्ते "आङ्याजयारामुपसंख्यानम्" इति आङि जातेऽनुबन्धलोपे घिसंज्ञात्वात् "घेर्ङिति" इति सूत्रेण गुणेऽवादेशे 'बाहवा' इति भवति । एवञ्च 'प्रवाहवा' इति काशिकायां तु प्रवाहुनेति प्राप्ते इत्युक्तं तत्ससासभ्रमादित्यवधेयम् । प्रेति न समस्तं पृथक्स्वरदर्शनात् पदकारैर्विच्छिद्य पाठाच्च । अत आख्यातान्वयीतिध्येयम् ।

वधीं वृत्रम् (४४)—अत्र 'वधीम्' अत्र हन्धातोर्लुङि "हनो वध लिङि" 'लुङि च' इति सूत्रेण हनो वधादेशे मिपि च्लौ "च्लेः सिचि" इति सूत्रेण च्लेस्सिजादेशे इचावितौ इटि "तस्थस्थमिपां तान्तन्तामः" इति सूत्रेण मिपोऽमादेशे तस्य "अमो मश्" इति मशादेशे शित्वात्सर्वादेशे "अस्तिसिचोऽपृक्ते" इति सूत्रेण ईटि च टकारस्येत्संज्ञायां लोपे च "इट ईटि' सिचोलुकि "अकः सवर्णे दीर्घः" इति सवर्णदीर्घे "बहुलं छन्दसि" इति सूत्रेणाडागमाभावे 'वधीम्' इति साधु । मकाराकारस्तूच्चारणार्थः । लोकेतु 'अवधिषम्' इति ।

लोपस्त आत्मनेपदेषु (३३)—इति सूत्रस्वरूपम् । आत्मनेपदेषु यस्तकारस्तस्य छन्दसि विषये लोपः स्यात् इत्यर्थः । देवा अदुह्र, दक्षिणतः शये इत्युदाहरणे ।

देवा अदुह्र (२५)—दुहधातोर्लुङि तस्य 'झि' रित्यादेशे "आत्मनेपदेष्वनतः" इति सूत्रेण झस्यादादेशेऽडागमे "बहुलं छन्दसि" इति रुडागमेऽनुबन्धलोपे "लोपस्त आत्मनेपदेषु" इति सूत्रेण तकारस्य लोपे अकारयोः पररूपे 'अदुह्र' इति। लोके 'अदुहत' इति भवति।

दक्षिणतः शये (३५)—अत्र शीङ्धातोः प्रथमपुरुषैकवचने 'शेते' इति प्राप्ते तत्र शेतेघटकतकारस्य "लोपस्त आत्मनेपदेषु" इति सूत्रेण तलोपेऽयादेशे 'शये' इति भवति। लोके तु 'शेते' इति।

वारयध्वात् (२५)— वृञ्धातोर्णिच्यनुबन्धलोपे वृद्धौ रपरत्वे वारि इत्यस्य धातुत्वे लोटि तस्य ध्वमादेशे शपि अनुबन्धलोपे गुणेऽयादेशे 'वारयध्वम्' इति जाते "ध्वमो ध्वात्" इति सूत्रेण ध्वमोध्वादादेशे 'वारयध्वात्' इति सिद्धम्। लोके तु 'वारयध्वम्' इति।

नूनं कृणुतात् (१८)—हिंसाकरणार्थकेकारेत्संज्ञक–कृण्धातोः लोटि थप्रत्यये सार्वधातुकत्वे "इदितो नुम् धातोः" इति नुमि उभावितौ 'धिन्विकृण्व्योरच' इति सूत्रेण 'उ' प्रत्यये वकारस्याकारेऽकारस्य लोपे "तस्थस्थमिपां तान्तन्तामः" इति सूत्रेण तादेशे णत्वे 'कृणुत' इति जाते "तस्य तात्" इति सूत्रेण तस्य तात् इत्यादेशे 'नूनं कृणुतात्, इति भवति लोके 'कृणुत' इति।

मरुतस्तज्जुजुष्टन (२७)—जुष्धातोः लोटिध्वमि "तसनसनथनाश्च' इति सूत्रेण ध्वमित्यस्य तनादेशे व्यत्ययेन परस्मैपदत्वे श्लौ च जाते "श्लौ" इति द्वित्वे "पूर्वोऽभ्यासः" इति अभ्याससंज्ञायां "हलादिः शेषः" इति सूत्रेणाभ्यासषकारस्य लोपे ष्टुत्वे 'जुजुष्टन' इति सिद्धम्। लोके तु 'जुषध्वम्' इति।

नभो भरन्त एमसि (५०)—आङुपसर्गपूर्वक–इण्धातोर्मसि सार्वधातुकत्वे शपि शपो लुकि "इदन्तो मसि" इति सूत्रेण मस इकारान्तावयवे गुणे 'एमसि' इति सिद्धम्। लोके तु एमः' इति।

दिवं सुपर्णो गत्वाय (४३)—गम्धातोः क्त्वाप्रत्यये "अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति" इत्यनुनासिकलोपे "क्त्वो यक्" इति क्त्वः यगागमेऽनुबन्धलोपे 'गत्वाय' इति भवति लोके 'गत्वा' इति।

इष्ट्वीनं देवान् (३४)—यज्धातोः क्त्वाप्रत्ययेऽनुबन्धलोपे "वचिस्वपियजादीनां किति" इति सूत्रेण सम्प्रसारणे षत्वे ष्टुत्वे "इष्ट्वीनमिति च" इति सूत्रेण ईनमन्तादेशे 'इष्ट्वीनम्' इति भवति। 'इष्ट्वा' इति लोके।

स्विन्नः स्नात्वी मलादिव (४४)—शौचार्थक ष्णाधातोः क्त्वाप्रत्यये "धात्वादेः षः सः" इति सत्वे "निमित्तापाये नैमित्तिकस्याप्यपायः" इति नियमबलात् णस्य नकारे 'स्नात्वा' इत्यस्याव्ययत्वेऽव्ययत्वात् सुपो लुकि 'स्नात्वा' अत्र "स्नात्व्यादयश्च" इति सूत्रेणाकारस्य 'ईकारे' 'स्नात्वी' इति। लोके 'स्नात्वी' भवति।

पीत्वीसोमस्य वावृधे (३१, ३९)—पिबतेः क्त्वाप्रत्ययेऽनुबन्धलोपे आर्द्धधातुकत्वे "घुमास्थागापाजहातिसां हलि" इति सूत्रेण पकारोत्तराकारस्येकारे पीत्वा इति जाते "स्नात्व्यादयश्च" इति सूत्रेणाकारस्येकारे 'पीत्वी। लोके 'पीत्वा' इति।

देवासः (५१)—देवशब्दाज्जसि विभक्तावनुबन्धलोपे "आज्जसेरसुक्" इति सूत्रेण सुगागमे कित्वात् "आद्यन्तौ टकितौ" इति सूत्रेणान्त्यादचःपरत्वेऽनुबन्धलोपे पूर्वसवर्णदीर्घे सस्य रुत्वे विसर्गे 'देवासः' इति।' लोके तु देवाः इति।

ब्राह्मणासः (५७)—ब्राह्मणशब्दात् जसि विभक्तावनुबन्धलोपे "आज्जसेरसुक्" इति सूत्रेणासुगागमे कित्वादन्त्यादचः परत्वेऽनुन्धलोपे पूर्वसवर्णदीर्घे सस्य रुत्वे विसर्गे 'ब्राह्मणासः' इति। लोके तु 'ब्राह्मणाः' इति।

इन्द्रो दधीचो अस्थभिः (५०) अत्र 'अस्थभिः' अत्र अस्थिशब्दात् भिस्विभक्तौ "छन्दस्यपि दृश्यते" इति सूत्रेणानंङादेशेऽनुबन्धलोपे नकारस्य लोपे 'अस्थभिः' इति भवति लोके 'अस्थिभिः इति।

ततुरिः (५२)—तरतेः "बहुलं छन्दसि" इति बलात् "आदृगमहनजनः किकिनौ लिट् च" इति किनूप्रत्ययेऽनुबन्धलोपे लिटि "बहुलं छन्दसि" इति उत्वे तस्य "द्विर्वचनेऽचि" इति स्थानिवद्भावात् 'तृ' इत्येतस्य द्वित्वेऽभ्यासत्वेऽभ्यासकार्ये 'उरत् इत्यत्वे रपरत्वे लोपे रपरत्वे 'ततुरि' इति जाते सोरुत्वे विसर्गे 'ततुरिः' इति सिद्धम्।

प्रसितस्कभित० (३७)— प्रसितस्कभितस्तभितोत्तभितचत्तविकस्ताविशस्तृशंस्तृशास्तृतरुतृतरूतृवरुतृवरूत्रीरुज्ज्वलितिक्षरितिवमित्यमितीति च। इति सूत्रस्वरूपम्। एतेऽष्टादश निपात्यन्ते। क्षमितेः पाठपक्षे तु एकोनविंशतिः।

तत्र 'असु' अदने 'स्कम्भु' 'स्तम्भु' रोधनार्थौ सौत्रौ। एतेषामुदित्वान्निष्ठायामिति प्रतिषेधे प्राप्ते इण्निपात्यते।

युवं शचीभिर्ग्रसिताममुञ्चतम्। विस्कभिते अजरे। येन स्वः स्तभितम्। सत्येनोत्तभिता भूमिः। स्तभितेत्येव सिद्धे उत्पूर्वस्य पुनर्निपातनमन्योपसर्गपूर्वस्य माभूदिति।

'चते' याचने। 'कस' गतौ आभ्यां क्तस्येडभावः। चत्ता इतश्चत्तामुतः। त्रिधाह श्यावमश्विनाविकस्तम्। उत्तानाया हृदयं यद्विकस्तम्। निपातनबहुत्वापेक्षम् सूत्रे बहुवचनं विकस्ता इति तेनैकवचनान्तोऽपि प्रयोगः साधुरेव।

'शसु' हिंसायाम् 'शंसु' स्तुतौ 'शासु' अनुशिष्टौ एभ्यस्तृच इडभावः। एकस्त्वष्टुरश्वस्याविशस्ता। ग्रावग्राभ उत शंस्ता। प्रशास्ता पोता।

'तॄ' प्लवनतरणयोः। 'वृङ्' संभक्तौ। 'वृञ्' वरणे। एभ्यस्तृच उट ऊट् एतावागमौ निपात्येते।

तरुतारं रथानाम्। तरूतारम्। वरुतारम् वरूतारम्। वरूत्रीभिः सुशरणो नो अस्तु। अत्र ङीबन्तनिपातनं प्रपञ्चार्थम्। वरूतृशब्दो हि निपातितः ततो ङीपा गतार्थत्वात्। उज्ज्वलादिभ्यश्चतुर्भ्यः शपः इकारादेशो निपात्यते।

'ज्वल' दीप्तौ 'क्षर' संचलने। 'टुवम्' उद्गिरणे 'अम्' गत्यादिषु। इह क्षरितीत्यस्याऽनन्तरं क्षमितीत्यपि केचित् पठन्ति। तत्र 'क्षमूष्' सहने इति धातुर्बोध्यः।

भाषायां तु—ग्रस्तस्कब्धस्तब्धोत्तब्धचतितविकसिताः। विशसिता। शंसिता। शासिता। तरिता। तरीता। वरिता। वरीता। उज्ज्वलति। क्षरति। पाठान्तरे क्षमति। वमति। अमति। इत्यादयः प्रयोगाः।

सत्येनोत्तभिता भूमिः (४६) अत्र उत्पूर्वकोकारेत्संज्ञकस्तम्भधातोः निष्ठायां क्तप्रत्ययेऽनुबन्धलोपे "उदितो वा" इति क्त्वायां वेट्कत्वात् "यस्य विभाषा" इतीण्निषेधे प्राप्ते "ग्रसितस्कभितस्तभितोत्तभितचत्तविकस्ताविशस्तृशंस्तृशास्तृतरुतृतरूतृवरुतृवरूतृवरूत्रीरुज्ज्वलितिक्षरितिवमित्यमितीति च" इति सूत्रेण निपातनात् इडागमेऽनुबन्धलोपे परसवर्णादिकार्ये टापि 'उत्तभिता' इति भवति।

अत्र सूत्रे स्तभितेत्येव सिद्धे उत्पूर्वस्य पुनर्निपातनमन्योपसर्गपूर्वस्य स्तभितेः मा भूदिति ज्ञापनार्थम् ।

वियातमुत्सं यत आवभूथ । भू धातोर्लिटि थलि द्वित्ये अभ्यासकार्ये आङ् उपसर्गयोगे भू इत्यस्य । बभूयाततन्थ जगृम्भववर्णेति निगमे' इत्यनेन निपातनादिट् निषेधे आवभूथ इति सिद्धम् ।

प्रमिणन्ति व्रतानि (३६)-मीनातेर्लटि झिप्रत्यये झेरन्तादेशे "हिनुमीना" इति णत्वे "मीनातेर्निगमे" इति सूत्रेण ह्रस्वे णत्वे 'प्रमिणन्ति' इति सिद्धम् लोके तु 'प्रमीणन्ति' इति भवति ।

सर्वमा इदम् (४२)—अस्धातोर्लङि तिपि शपि शपोलुकि "आडजादीनाम्" इति सूत्रेणाटि "आटश्च" इति सूत्रेण वृद्धौ "इतश्च" इतीकारलोपे "अस्तिसिचोऽपृक्ते" इतीडागमे प्राप्ते "बहुलं छन्दसि" इतीडभावेऽपृक्तत्वाद्धल्ङ्यादिलोपे आ+स् इदम् इति जाते सस्य रुत्वे विसर्गे संहितायां "भोभगो०" इति रोर्यत्वे "लोपः शाकल्यस्य" इति यलोपे 'आ इदम्' इति एवम् सर्वमा इदम् इति भवति लोके तु 'आसीत्' इति भवति ।

आनुषग्जुजोषत् (३०)—प्रीतिसेवनार्थक-ईकारेत्संज्ञकजुष्धातोर्लेटि व्यत्ययेन परस्मैपदे तिपि "इतश्च लोपः परस्मैपदेषु" इतीकारस्य लोपे "लेटोडाटौ" इत्यटि व्यत्ययेन शपः श्लौ "श्लौ" इति सूत्रेण द्वित्वे अभ्यासकार्ये लघूपधगुणस्य "नाभ्यस्तस्याचिपिति सार्वधातुके" इति सूत्रेण निषेधे प्राप्ते "नाभ्यस्तस्याचीति निषेधे बहुलं छन्दसीति वक्तव्यम्" इति लघूपधगुणे 'जुजोषत्' इति भवति । लोके लेट्लकारो न भवति लोटि 'जुषताम्' इति भवति ।

नित्यं छन्दसि । ४२ । उर्ऋत् इति सम्पूर्णं सुत्रम् आवर्तते । छन्दसीति विषयसप्तमी । ततश्च । छन्दसि विषयेणौ चङत्युपधाया ऋवर्णस्य स्थाने ऋकारादेशो नित्यं भवतीति सूत्रार्थः । तेन अवीवृधत् पुरोडाशेन इत्यत्र गुण अववर्धत् इति न भवति ।

अवीवृधत् (५२)—भाषार्थकोकारेत्संज्ञकणिजन्तवृधधातोर्लुङि तिपि च्लौ च्लेश्चङि द्वित्वेऽभ्यासत्वे "उरत्" इत्यत्वे रपरत्वे हलादिः शेषे अडागमेऽनुबन्धलोपे अभ्यासस्येत्वे दीर्घे "इतश्च" इतीकारलोपे "नित्यं छन्दसि" इति सूत्रेण

चङ्युपधाया ऋवर्णस्य नित्यं 'ऋत्' इत्यादेशे तेन गुणाभावे 'अवीवृधत्' इति भवति।

जनीयन्तोन्वग्रवः (४०)—जनमिच्छन्त इति विग्रहे क्यचि प्रत्ययेऽनुबन्धलोपे "अपुत्रादीनामिति वाच्यम्" इति बलात् "क्यचि च" इति सूत्रेणावर्णस्येकारे लटि लटः शत्रादेशे जसि विभक्तिकार्ये 'जनीयन्तः' इति भवति।

अश्वायन्तो मघवन् (३२)—अश्वशब्दात् क्यच्यनुबन्धलोपे "अश्वाघस्यात्" इति सूत्रेणादादेशे 'अश्वाय' इति जाते लटि लटः स्थाने शत्रादेशे अनुबन्धलोपे जसि विभक्तिकार्ये 'अश्वायन्तः' इति सिद्धम्।

वृका अघायवः (२७)—अघशब्दात् "छन्दसि परेच्छायां क्यच्" इति सूत्रेण क्यचि प्रत्ययेऽनुबन्धलोपे "क्याच्छन्दसि" इति सूत्रेण क्यजन्तात् उप्रत्यये सति दीर्घे प्राप्ते "न छन्दसि" इति निषेधे "अश्वाघस्यात्" इति सूत्रेण घोत्तरवर्तिनोऽकारस्याऽऽति निष्पन्नादघायुशब्दाज्जसि विभक्तिकार्यें 'अघायवः' इति सिद्ध्यति।

अकृत्सार्वधातुकयोर्दीर्घः इत्यनेनैव दीर्घे सिद्धे 'अश्वाघस्यात्' इत्यस्य फलम् (४०)—ननु 'अश्वायन्तो मघवन्' 'मा त्वा वृकाअघायवः' इत्यादौ "अकृत्सार्वधातुकयोर्दीर्घः" इत्यनेन दीर्घेणैव सिद्धे "अश्वाघस्यात्" इति सूत्रं व्यर्थमिति चेन्न "न छन्दसि" इति निषेधो नेत्वमात्रस्य किन्तु दीर्घस्यापीति ज्ञापनेन 'अश्वायन्तो मघवन्' 'मात्वा वृका अघायवः' इत्यादीनां सिद्धयेऽस्य 'अश्वाघस्यात्' इत्यस्य आवश्यकत्वात्।

देवसुम्नयोर्यजुषि काठके (४१)—इति सूत्रस्वरूपम्। अनयोः देवसुम्नयोः। क्यचि आत् स्याद्यजुषि कठशाखायाम्। इति वाक्यार्थः।

कव्यध्वरपृतनस्यर्चिलोपः (४५)—इति सूत्रस्वरूपम्। कवि-अध्वर-पृतना एषामन्त्यस्य लोपः स्यात् क्यचि परे ऋचि विषये इति सूत्रार्थः। सपूर्वया निविदा कव्यतायोः। अध्वर्युं वा मधुपाणिम्। दमयन्तं पृतन्युम्। इत्युदाहरणानि।

गर्भं माता सुधितं वक्षणासु (४२)—सुपूर्वकदधातेः क्तप्रत्ययेऽनुबन्धलोपे "सुधित वसुधित नेमधित धिष्व धिषीय च" इति सूत्रेण निपातनात् आकारस्येत्वे विभक्तिकार्ये 'सुधितम्' इति भवति।

धिष्व वज्रम् (२६)—धाधातोः लोटि थासि सार्वधातुकत्वे "थासः से" इति सूत्रेण थासः से आदेशे "सुधित वसुधित नेमधित धिष्व धिषीय च" इति सूत्रेण धकारोत्तराकारस्येत्वे "सवाभ्यां वामौ" इति वकारादेशे "आदेशप्रत्यययोः" इति सूत्रेण षत्वे 'धिष्व' इति। लोके तु 'धत्स्व' इति भवति।

दाधर्ति० (३९–५२)—दाधर्तिदर्धर्तिदर्धर्षिबोभूतुतेतिक्तेलर्ष्यापनीफणत्-संसनिष्यदत्करिक्रत्कनिक्रदद्भरिभ्रद्दविध्वतोदविद्युतत्तरित्रतःसरीसृपतंवरीवृजन्म-र्मृज्यागतीगन्तीति च" एते दाधर्तिप्रभृतयः अष्टादश छन्दसि निपात्यन्ते। तत्र यथा आद्यास्त्रयः (दाधर्ति दर्धर्ति दर्धर्षि) अनवस्थानार्थकधृङो धारयतेर्वा णिजन्तस्य धृङो वा रूपम्।

तत्र दाधतीत्यत्र धारयतेर्लेटि शपि शपः श्लौ णिलुकि अभ्यासकार्ये अभ्यासस्य दीर्घत्वं च निपात्यते। धृङो वा शे प्राप्ते व्यत्ययेन शप् तस्य श्लावभ्यासस्य दीर्घत्वं च निपात्यते अत्र परस्मैपदमपि निपात्य तस्यैव यङ्लुक्यभ्यासस्य रुगाद्य-पवादकं दीर्घत्वं निपात्यते।

दर्धर्तीत्यत्र—यङ्लुक्पक्षे दाधर्तीति निपातनेन प्राप्तस्य दीर्घस्याभावो निपात्यते। "रुग्रिकौ च लुकि" "ऋतश्च" इत्येव रुक् सिद्धः। श्लुपक्षे तु रुगपि निपात्यः।

दर्धर्षीत्यत्र यङ्लुक्पक्षे न किञ्चिन्निपातनं किंतु श्लावेव।

भवतेर्यङ्लुगन्तात् लोटि तिबादिकार्ये निपातनात् यङ्लुगन्तस्य गुणाऽभावे बोभूतु इति। भाषायां तेन गुणो लभ्यते ननु "भुसुवोस्तिङि" इत्येव गुणनिषेधे निपातनमनर्थकमिति चेत्सत्यम्। ज्ञापकार्थं तर्हि निपातनम्। एतज्ज्ञापयति अन्यत्र यङ्लुगन्तस्य गुणप्रतिषेधो न भवतीति तेन 'बोभवीति' इत्यत्र भाषायां गुणः सिद्धस्तदेतदाह—तेन भाषायां गुणो लभ्यते इति।

तिजेर्यङ्लुगन्तात्तङ्निपात्यते शेषं कार्यं पूर्ववत् 'तेतिक्ते' इति।

'अलर्षि' युध्म खजकृत्पुरन्दर इति (४७) अलर्षि 'ऋ' गतौ सिपि शपि श्लौ 'श्लौ' इति द्वित्वेऽभ्यासत्वे अभ्यासस्य हलादिः शेषापवादो रेफस्य लत्वं निपात्यते। "अर्तिपिपर्त्योश्च" इत्यभ्यासस्य प्राप्तस्येत्वस्याभावो निपात्यते।

अलर्तिदक्षउत (५०)—इदमपि अलर्षिवत् बोध्यम्। केवलं तिपि रूपमिदं भवति इति विशेषः। सिपा निर्देशो न तन्त्रम्। फणतेराङ्पूर्वस्य यङ्लुगन्तस्य

शतरि' अभ्यासस्य नीगागमो निपात्यते 'अन्वापनीफणत्'। स्यन्देः सम्पूर्वस्य यङ्लुकि शतरि अभ्यासस्य निक् धातुसकारस्य षत्वम्। करोतेर्यङ्लुगन्तस्याभ्यासस्य चुत्वाभावः। 'करिक्रत्' इति।

कनिक्रदज्जनुषम् (३०)—'कनिक्रदत्' अत्र दाधर्ति दर्धर्ति दर्धर्षि बोभूतु तेतिक्ते० इत्यादिसूत्रेण कनिक्रदत् इति निपातनात् क्रन्देर्लुङि तिपि च्लौ च्लेरङि द्विर्वचनेऽभ्यासकार्ये "कुहोश्चु०" इति सूत्रेण प्राप्तस्याभ्यासस्य चुत्वस्याभावे 'इतश्च' इतीकारलोपे निगागमेऽनुबन्धलोपे नकारलोपे च कनिक्रदत् इति ततः संहितायां श्चुत्वे 'कनिक्रदज्जनुषम्' इति भवति। लोके तु 'अक्रन्दीत्' इति। विभर्तेरभ्यासस्य जशत्वाभावः। वि यो भरिभ्रदोषधीषु।

दविध्वतो रश्मयः सूर्यस्य (२८)—'दविध्वतः' इत्यत्र "दाधर्ति०" इत्यादिना यङ्लुगन्तशत्रन्तध्वरतेरभ्यासस्य निपातनात् विगागमे धातोर्ऋकारलोपे च 'दविध्वत्' शब्दस्य 'दविध्वतः' इति भवति। शत्रन्तावस्थायां नुम् तु न भवति "नाभ्यस्ताच्छतुः" इति निषेधात्।

द्युतेर्यङ्लुगन्तस्यद्युते शतरि अभ्यासस्य सम्प्रसारणाभावोऽत्वं विगागमश्च निपात्यते तेन दविद्युतत् दिद्यच्छोशुचानः। तरतेः शतरि श्लौ अभ्यासस्य रिगागमः। सहोर्जा तरित्रतः। सृपेः शतरि श्लौ द्वितीयैकवचने रीगागमोऽभ्यासस्य। वृजेः शतरि श्लावभ्यासस्य रीक्। मृजेर्लिटि णल् अभ्यासस्य रुक् धातोश्च युक्।

वक्ष्यन्ती वेदागनीगन्ति कर्णम् (४६) अत्र गमेराङ्पूर्वस्य लटि श्लावभ्यासस्य चुत्वाभावो नीगागमश्च निपात्यते।

गृष्टिः ससूत्र स्थविरम् (३७)—सूतेर्लिटि "ससूवेति निगमे" इति सूत्रे 'ससूव' इति पाठात् निपातनात् परस्मैपदे तिपि णलादेशेऽनुबन्धलोपे द्वित्वे अभ्यासत्वे निपातनादेव वुगागमेऽभ्यासस्यात्वे 'ससूव' इति। लोके तु 'सुषुवे' इति।

पूर्णा विवष्टि (४९)—कान्त्यर्थकवशधातोर्लटि तिपि शाः श्लौ द्वित्वे "बहुलं छन्दसि" इत्यभ्यासस्येत्वे "व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः" इत्यनेन षत्वे ष्टुत्वे 'विवष्टि' इति भवति।

इति सप्तमोऽध्यायः

अथ अष्टमोऽध्यायः

प्रप्रायमग्निः (२७)—अत्र "प्रसमुपोदः पादपूरणे" इति सूत्रेण द्वित्वे 'प्रप्रायमग्निः' इति भवति। एवंविधस्य भाषायां प्रयोगो नास्तीति छन्दस्ये- वेदं विधानम्।

अक्षण्वन्तः (४६-५०)—अक्षिशब्दान्मतुपि "अस्थिदधिसक्थ्यक्ष्णा- मनङुदात्तः" "छन्दस्यपि दृश्यते" इत्यनङि नुटोऽसिद्धत्वात् पूर्व नलोपे भूतपूर्व- गत्या 'अनो नुट्" इति नुटि उटावितौ णत्वे वत्वे जसि रूपम्। ननु यदि परादि- र्नुट् क्रियते तस्य मतुब्ग्रहणेन ग्रहणात् "मादुपधायाश्च मतोर्वोऽयवादिभ्यः" इति वत्वं मतुपस्तु न स्यात् नुटा व्यवधानात्। यदि तु पर्वान्तो नुट् क्रियते तर्हि णत्वं न स्यात्। 'पदान्यस्य' इति निषेधादिति चेत्सत्यम्। नुटोऽसिद्धत्वान्नोक्तदोषः। नन्वेवमवग्रहे दोषः स्यात्, अक्षणिति णान्तं ह्यवगृह्णाति अक्षेत्यकारान्तमवग्रहीतु- मुचितमिति चेत्सत्यम्, न लक्षणेन पदकारा अनुवर्त्याः पदकारैर्नामिलक्षणमनुवर्तनीयं तस्माद्यथालक्षणं पदं कर्तव्यमिति महाभाष्ये स्थितम्। किं च ईयिवांसम् इत्यादौ पदत्वं विनापि अवग्रहः क्रियते। पूर्वभिरग्निनेत्यादौ सत्यपि पदत्वे न क्रियते इति।

नसत्तनिषत्तानुत्तप्रतूर्तगूर्तानि छन्दसि (४६)—एतानि छन्दसि निपात्यन्ते। सदेर्नञ्पूर्वान्निपूर्वाच्च निष्ठायां नत्वाभावो निपात्यते। नसत्तमञ्जसा, निषत्तमस्य चरतः। उन्देर्नञ्पूर्वस्यानुत्तम् निपातनात् भवति। प्रतूर्तमिति त्वरतेः तुर्वीत्यस्य वा। सूर्तमिति'सृ'इत्यस्य। गूरी इत्यस्य। गूर्तम्-इति एतानि उदाहरणानि।

निषत्तमस्य चरतः (२९)—निपूर्वकल्टकारेत्संज्ञकषद्धातोः "धात्वादेः षः सः" इति सूत्रेण सकारे निष्ठासंज्ञकक्तप्रत्ययेऽनुबन्धलोपे "सदिरप्रतेः" इति सूत्रेण सकारस्य षत्वे "रदाभ्यां निष्ठातो नः पूर्वस्य च दः" इति निष्ठातकारस्य नत्वे प्राप्ते "नसत्तनिषत्ताऽनुत्तप्रतूर्तगूर्तानिच्छन्दसि" इति सूत्रेण निपातनात् नत्वाभावे चर्त्वे विभक्तिकार्ये 'निषत्तम्' इति भवति। एवञ्च निषत्तमस्य चरतः' इति भवति।

भुवश्च महा व्याहृते अत्र शसजुषोरु इत्यतः रोः, रोऽसुपि इत्यतः रु पदस्य अनुवृत्तिः क्रियते तेन भुवस् इति महाव्याहृते छन्दसि विषये रूर वा रेफो वा भवति ततः रेफादेशे भुवरिति रुत्वे पत्व लोपे च कृते भुव इति सिद्धयति।

भुवरिति (२९)—अत्र "भुवश्च महाव्याहृतेः" इति भुवसः सकारस्य रेफे भुवरिति रुत्वपक्षे भुव इति ।

ये ३ यजामहे (४७)—अत्र "ये यज्ञकर्मणि" इति सूत्रेण ये इत्यस्य प्लुते कृते 'ये ३ यजामहे' इति ।

अग्निमा ३ वह (५०)—अत्र "ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः" इति सूत्रेणावहादेः प्लुते जाते 'अग्निमा ३ वह' इति

अग्नीत्प्रेषणेपरस्य च (४२)—अग्नीधः प्रेषणे आदेः प्लुतस्तस्मात् परस्य च प्लुत इत्यर्थः । ओ ३ श्रा ३ वप अत्र अनेन उभयत्र प्लुतो भवति ।

निगृह्यानुयोगे च स्वमतात् प्रच्यावनम निगृहः तस्य मतस्य आविश्करणं अनुयोगः एव च निगृह्यानुयोगे अर्थे यद्वाक्यं तस्य टे प्लुतो भवति विकल्पेन

अद्यासावास्येत्यात्थ ३ (४०)—अत्र प्रयोगे "निगृह्याऽनुयोगे च" इति सूत्रेण वाक्यस्य टेः प्लुतत्वे "अद्यामावास्येत्यात्थ ३" इति भवति ।

अङ्गयुक्तं तिङाकाङ्क्षम (४६)—इति सूत्रस्वरूपम् । अङ्गेत्यनेन युक्तं तिङन्तं तिङ्प्रत्ययान्तमित्यर्थः प्लुततामाप्नोति । अङ्ग कूज ३ इदानीं ज्ञास्यसि जाल्म । अत्र तिङतस्य प्लुतो भवति यत्र तिङन्तस्य आङ्क्षते तत्रैवाच प्लुतः तेन अङ्ग पच इत्यत्र प्लुतः ।

प्रतिश्रवणे च (४६)—इति सूत्रस्वरूपम् । वाक्यस्य टेः प्लुतोऽभ्युपगमे प्रतिज्ञाने श्रवणाभिमुख्ये च इति व्याख्यार्थः । गां मे देहि भोः । हन्त ते ददामि ३ । नित्यः शव्दो भवितुमर्हति ३ । दत्त किमात्थ ३ । प्रतिश्रवणं अभ्युपगमःअङ्गीकारः प्रतिज्ञानं प्रतिज्ञा श्रवणाभिमुख्यं श्रोतुः अभिमुखत्वापादनम् ।

हन्त ददामि ३ (४२–४७) अत्र "प्रतिश्रवणे च" इति सूत्रेण वाक्यस्य टेः प्लुते जाते 'हन्त ते ददामि ३' इति भवति ।

अग्निचिद्भाया३त् (४०)—अत्र "चिदिति चोपमार्थे प्रयुज्यमाने" इति सूत्रेण प्लुते 'अग्निचिद् भाया ३ त्' इति ।

अधः स्विदासीत् (३८)—अत्र "विचार्यमाणानाम्" इति विहितप्लुतस्य "उपरिस्विदासीदिति च" इति सूत्रेणानुदात्तत्वे 'अधः स्विदासी ३ त् इति भवति ।

अभिरूपक ३ अभिरूपक रिक्तं ते आभिरूप्यम् (४६)—अत्र "स्वरितमाम्रे डितेऽसूयासंमतिकोपकुत्सनेषु" इति सूत्रेण स्वरितस्य प्लुतत्वे 'अभिरूपक ३ अभिरूपक रिक्तं ते आभिरूप्यम्' इति भवति ।

क्षियाशीःप्रैषेषु तिङाकाङ्क्षम् इति सूत्रस्वरूपम् । आकाङ्क्षस्य तिङन्तस्य टेः स्वरितः प्लुतः स्यात् इत्यर्थः । त्तिपा आचार्य मेदः इत्यक यम् आसीः नियोगः प्रेषः ।

प्लुतावैं च इदुतौ (२६) इति सूत्रस्वरूपम् । दूराद्धूतादिषु प्लुतो विहितस्तत्रैव ऐचः प्लुतप्रसङ्गे तदवयवाविदुतौ प्लुतौ भवतः । ऐ ३ तिकायन । औ ३ पगव । इत्युदाहरणे ।

अत्र ऐचौ समाहारवर्णौ तत्र मात्रा स अवर्णस्य मात्राइवर्णौ वर्णपौ तत्र इदुतौ प्लुते कृते तयोस्तिस्रोः मात्राः अवर्णस्य च एका मात्रा इति समुदायश्चतुर्मात्रा तदहाः मूले चतुर्मात्रावत ऐचौ सम्पद्येते ।

होतव्यं दीक्षितस्य गृहारे इति अत्र प्रश्नान्ताभिपूजित विचार्यमाण प्रत्यभिवाद याज्यान्ते स्वेव इति वार्तिकेन नियमनात् विचार्यमाणेऽर्थे ।

अग्ना ३ इ पत्नीवः (२८) अत्र प्रयोगे "आमन्त्रिते छन्दसि प्लुतविकारोयं वक्तव्यः" इत्यनेन प्लुतविकारे अग्ना ३ इ पत्नीवः इति भवति । अत्र चतुर्मात्रै ऐचौ सम्पद्येते ।

तयोर्य्वावचि संहितायाम् (३९)—इदुतोर्यकारवकारौ स्तोऽचि संहितायामित्यर्थः ।

अग्ना ३ यिन्द्रम् (४७)—अत्र "तयोर्य्वावचि संहितायाम्" इति सूत्रेणेकारस्य यकारे 'अग्ना ३ यिन्द्रम्' इति भवति ।

तयोर्य्वावचिसूत्रारम्भप्रयोजनम् (४५)—ननु "इको यणचि" इत्यनेनैव सिद्धे लक्ष्ये "तयोर्य्वावचि संहितायाम्" इति सूत्रं व्यर्थमिति चेन्न इदुतोरसिद्धत्वेनास्यावश्यकत्वात् । न च 'सिद्धः प्लुतः स्वरसन्धिषु' कथं ज्ञायते प्लुतप्रगृह्या अचीति प्रकृतिभावविधानात् । यस्य हि विकारः प्राप्तस्तस्य प्रकृतिभावो विधेयः प्लुतस्यासिद्धत्वेन तस्य स्वरसन्ध्याख्यो विकारः प्राप्नोति । अस्तु प्लुतः सिद्धः कियातमिदुतोः ? उच्यते—प्लुतप्रकरणे यत्कार्यं तत् स्वरसन्धिषु सिद्धमिति

सामान्येन ज्ञापकमाश्रयिष्यते ततश्चेदुतोरपि सिद्धत्वात्सिद्ध एव यणादेशः किमर्थमिदमिति वाच्यम् सवर्णदीर्घत्वस्य शाकल्यस्य च निवृत्त्यर्थमस्यावश्यकत्वात्। यदीदं नोच्येत अग्ना ३ इ इन्द्रम्, पटा ३ उ उदकम् इत्यत्र पाक्षिकं यणादेशं बाधित्वा सवर्णदीर्घः स्यात्। अग्ना ३ याशेत्यादौ च "इको सवर्णे शाकल्यस्य ह्रस्वश्च" इति प्रकृतिभावः स्यात्तद्बाधनार्थमिदं वक्तव्यमेव। ननु च तन्निवृत्तये यत्नान्तरमस्ति किं पुनस्तत्प्लुतपूर्वस्य यणादेशो वक्तव्यः सवर्णदीर्घनिवृत्त्यर्थः शाकलनिवृत्त्यर्थश्च तच्चावश्यं वक्तव्यं य इक् प्लुतपूर्वः न च प्लुतविकारः भो ३ इ इन्द्र भोयिन्द्र गायतीति भोशब्दस्य छान्दसः प्लुतः ततः परस्येकारस्य निपातत्वात् प्रकृतिभावे प्राप्ते तम्प्रबाध्य यणादेशार्थं तस्यावश्यं कर्तव्यत्वे तेनैव यणा सिद्धे पुनरपि व्यर्थमेवेति चेन्न यवयोरसिद्धत्वादुदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्येत्यस्य बाधनार्थमस्याऽवश्यकत्वात्।

तदाह—

किन्तु यणा भवतीह न सिद्धं य्वाविदुतोर्यदयं विदधाति।
तौ च मम स्वरसन्धिषु सिद्धौ शाकलदीर्घविधी तु निवर्त्यौ ॥ १ ॥

इक् च यदा भवति प्लुतपूर्वस्तस्य यणं विदधात्यपवादम्।
तेन तयोश्च न शाकलदीर्घौ यण्स्वरबाधनमेव तु हेतुः ॥ २ ॥

अयमर्थः—"इकोयणचि" इति यणादेशेन किं रूपं न सिद्ध्यति यतोऽयमाचार्य्य इदुतोर्य्वौ विदधाति तौ चेदिदुतौ स्वरसन्धिषु सिद्धौ ममेति सूत्रकारेणैकीभूतस्य वचनम्। एवञ्चोदिते परिहरति—"शाकलदीर्घविधौ तु निवर्त्यौ" इति पुनश्चोदयति इक् च यदेति वार्तिककारोऽपि इकः प्लुतपूर्वस्य यणं विदधाति स च प्रकृतिभावस्येव शाकलदीर्घविध्योरपि अपवादः। ततश्च तेनैव यणा एतयोरपि इदुतोः शाकलदीर्घौ न भविष्यत इति नार्थ एतेन। परिहरति 'यण्स्वरेति' यण्स्वरबाधनमेव हेतुः सूत्रारम्भस्येति दिक्।

मतुवसो रु सम्बुद्धौ छन्दसि (३७)—मत्वन्तस्य वस्वन्तस्य च रुः स्यात् सम्बुद्धौ छन्दसि विषये इत्यर्थः। इन्द्र मरुत्व इह पाहि सोमम्। हरिवो मेदिनं त्वा। इत्युदाहरणे।

हरिवो मेदिनं त्वा (४८)—हरयो विद्यन्ते यस्येति विग्रहे "तदस्यास्त्यस्मिन्निति मतुप्" इति मतुपि अनुबन्धलोपे "छन्दसीरः" इति मकारस्य वकारे हरिवच्छब्दात् सम्बुद्ध्येकवचने सौ "उगिदचां सर्वनामस्थानेऽधातोः" इति सूत्रेण नुमि उमावितौ "हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्" इति सूत्रेण सुलोपे संयोगान्तलोपे च कृते "अलोन्त्यस्य" इति परिभाषाबलात् "मतुवसो रु सम्बुद्धौ छन्दसि" इति सूत्रेण नकारस्य रुत्वे "संयोगान्तलोपो रोरुत्वे सिद्धो वक्तव्य" इति बलात् 'हशि च" इत्युत्वे गुणे च 'हरिवो' इति एवञ्च 'हरिवो मेदिनं त्वा' इति भवति।

दाश्वान् साह्वान् मीढ्वांश्च (४६)—इति सूत्रस्वरूपम्। एते (दाश्वान्, साह्वान्, मीढ्वान्, एते) प्रयोगाः क्वसु प्रत्ययान्ताः निपात्यन्ते। उदाहरणं तु स्पष्टमेव।

पशूंस्तांश्चक्रे (५०)—पशून् तानिति स्थिते "नश्छव्यप्रशान्" इति सूत्रेण नित्ये रुत्वे प्राप्ते तम्प्रबाध्य "उभयथर्क्षु" इति सूत्रेण विभाषा रुत्वे पूर्वत्र "अत्राऽनुनासिकः पूर्वस्य तु वा" इति वानुनासिके उत्तरत्र अनुनासिके च रेफस्य विसर्गे सत्वे 'पशूंस्ताश्चक्रे" इति भवति।

महाँ इन्द्रो य ओजसा (४७)—अत्रांशे 'महान्' अत्रत्यनकारस्य रुत्वे यत्वे लोपे "आतोऽटि नित्यम्" इति नित्यमनुनासिके 'महाँ इन्द्रो य ओजसा' इति भवति।

आतोऽटि नित्यम् (२५)—अटि परतो रोः पूर्वस्यातः स्थाने नित्यमनुनासिकः स्यात्। 'महाँ इन्द्रः' इत्यत्र रोः पूर्वस्यातः स्थानेऽनुनासिकः। तैत्तरीयाणां मते तु सूत्रफलं चिन्त्यम्।

छन्दसि वाऽप्राम्रेडितयोः (२५)—'अग्ने त्रातऋतस्कविः' गिरिर्नविश्वतस्पृथुः अत्र विसर्गस्य सकारादेशः।

सुपेशस्करति (४६) अत्र "कः करत्करतिकृधिकृतेष्वनदितेः" इति सूत्रेण 'सुपेशः करति अत्रत्यविसर्गस्य सत्वे 'सुपेशस्करति' इति सिद्धम्।

दिवस्पातु (५२)—अत्र पञ्चमीसमासे "पातौ च बहुलम्" इति सूत्रेण च 'दिवः पातु अत्रत्यविसर्गस्य सकारे 'दिवस्पातु' इति भवति।

तमसस्पारमस्य (३८)—अत्र षष्ठीसमासे "तत्पुरुषे कृति" इत्यलुकि रुत्वे विसर्गे "षष्ठ्याः पतिपुत्रपृष्टपारपदपयस्पोषेषु" इति सूत्रेण षष्टीविसर्गस्य सादेशे "तमसस्पारमस्य" इति सिद्धम् ।

रायस्पोषं यजमानेषु (४१)—षष्ठीसमासेऽलुकि रुत्वे विसर्गे "षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु" इति षष्ठीविसर्गस्य पोषे परे सकारे "रायस्पोषम्' इति ।

निसस्तपतावनासेवने (२५)—निसः सकारस्य मूर्द्धन्यः स्यात् । निष्टप्तं रक्षो, निष्टप्ता अरातयः । अत्रानेन सकारस्य मूर्द्धन्यादेशः ।

त्रिभिष्ट्वं देव सवितः (३७)—'त्रिभिष्ट्वम्' इत्यत्र 'त्रिभिः त्वम्' इति स्थिते सत्वे "युष्मत्तत्ततक्षुष्वन्तः पादम्" इति सूत्रेण सस्य मूर्धन्यादेशे "ष्टुना ष्टुः" इति ष्टुत्वे 'त्रिभिष्ट्वम्' इति भवति ।

तेभिष्ट्वा (५१) तेभिः त्वा इति स्थिते सत्वे "युष्मत्तत्ततक्षुष्वन्तः पादम्" इति सस्य षत्वे 'तेभिष्ट्वा' इति भवति ।

अप्स्वग्ने सधिष्ट्व (४२) 'सधिः तव इति स्थिते सत्वे सस्य "युष्मत्तत्ततक्षुष्वन्तः पादम्" इति सूत्रेण सस्य षत्वे ष्टुत्वे 'सधिष्टव' इति ।

व्यसीदत् (२६)—विपूर्वकऌकारेत्संज्ञक-षद्धातोः "धात्वादेः षः सः" इति सूत्रेण सत्वे लङि तिपि शपि प्राप्ते तम्प्रबाध्य "तुदादिभ्यः शः" इति शेऽनुबन्धलोपे सार्वधातुकत्वे "पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः" इति सूत्रेण सीदादेशे "लुङ्लङ्लृङ्क्ष्वडुदात्तः इति सूत्रेणाडागमे यणादेशे "इतश्च" इतीकारस्य लोपे "सदिरप्रतेः" इति नित्यमूर्द्धन्यादेशे प्राप्ते तम्प्रबाध्य "निव्यभिभ्योऽड्व्यवाये वा छन्दसि" इति वैकल्पिकमूर्द्धन्यादेशे 'व्यषीदत्' इति मूर्द्धन्याभावपक्षे 'व्यसीदत्' इति सिद्धम् । लोके तु 'व्यषीदत्' इत्येकमेव रूपं भवति ।

अभ्यष्टौत् (५१)—स्तुत्यर्थकष्टुधातोः "धात्वादेः षः सः" इति सत्वे "निमित्तापाये नैमित्तिकस्याऽप्यपायः" इति न्यायेन तकारे 'स्तु' इति जाते लङि तिपि शपि शपो लुकि अडागमे 'इतश्च' इतीकारलोपे "उतो वृद्धिर्लुकि हलि" इति

वृद्धौ "निव्यभिभ्योऽड्व्यवाये वा छन्दसि" इति सस्य षत्वे ष्टुत्वे 'अभ्यष्टौत्' इति मूर्द्धन्याऽभावपक्षे 'अभ्यस्तौत्' इति।

नृमणः (४०)—अत्र छन्दस्यृदवग्रहात्" इति सूत्रेण णत्वे 'नृमणः' इति भवति।

पितृयाणम् (४४)—अत्र "छन्दस्यृदवग्रहात्" इति सूत्रेण णत्वे 'पितृयाणम्' इति सिद्धम्।

अभीषु णः (५०)—अत्र अस्मदादेशस्य नस् इति स्थिते "इकः सुञि" इति सूत्रेण दीर्घे नसः नकारस्य "नश्च धातुस्थोरुषुभ्यः" इति णत्वे विसर्गे 'अभीषुणः इति भवति!

मोषुणः (३५)—अत्र अस्मदादेशस्य नसित्यत्रत्यनकारस्य 'नश्च धातुस्थो-रुषुभ्यः' इति सूत्रेण णकारे सकारस्य रुत्वे विसर्गे च 'मोषुणः' इति सिद्धम्।

इत्यष्टमोऽध्यायः॥

इति वैदिकी प्रक्रिया समाप्ता।

अथ स्वरप्रकरणम्

तत्र प्रथमं साधारणस्वरः

अनुदात्तं पदमेकवर्जम्—परिभाषेयं स्वरविधिविषया। तेन यस्मिन् पदे यस्योदात्तः स्वरितो वा विधीयते तमेकमचं वर्जयित्वा शेषं तत्पदमनुदात्ताच्कं द्रष्टव्यम् इति सूत्रार्थः।

न चेदं संज्ञासूत्रम् संज्ञाविधायकसूत्राणां प्रायः प्रथमाध्याये पाठदर्शनेनास्यातथात्वात्, संज्ञासंज्ञिभावस्याप्रतीतेश्च।

नापि विधिसूत्रम्। तथा सति कः एको वर्जनीय इत्यस्याप्रतीत्या विनिगमनाविरहात् तत्तच्छास्त्रविहितोदात्तस्वरितकानां सर्वेषां वर्जनीयत्वापत्तौ 'चत्वारः' इत्यत्र आगमादीनां पृथक् स्वरप्रसङ्गः 'आमलकीजः इत्यत्र' ङीपः प्रत्ययस्वरेणाद्युदात्तत्वम् डप्रत्ययस्य 'गतिकारकोपपदात् कृत्' इति उदात्तत्वम्, 'दीर्घकाशतुषभ्राष्ट्रवटं जे' इति पूर्वपदाद्याकारस्य उदात्तत्वम्, 'अन्त्यात्पूर्वं बह्वचः' इति लकाराकारस्योदात्तत्वम् इति युगपदुदात्तचतुष्टयं श्रूयेत अस्य तु मकाराकारोऽवकाशः स्यात्।

नापि नियमः। अनुदात्तत्वस्य केनाप्यप्राप्तेः।

नाप्यतिदेशसूत्रम्। वतिघटितत्वाभावात्।

नाप्यधिकारसूत्रम्। अस्वरितत्वात्। तत्तत्सूत्रविधेयानां वचनसामर्थ्यादेव निपाताप्रवृत्तौ एकवर्जमित्यस्य वैय्यर्थ्यापत्तेश्च। एवम् 'आद्युदात्ताश्च' 'समानोदरे शयित ओ चोदात्तः' इत्यादीनामसङ्ग्रहापत्तेश्च।

अतः पक्षान्तरासम्भवात् परिभाषेयमिति सिद्धान्तः मूले उक्तः।

गोपायतं नः (४७)—'गुप्' इत्यस्य धातुसंज्ञायाम् "धातोः" इत्यन्तोदात्तत्वे तत आयप्रत्ययः तस्य "आद्युदात्ताश्च" इति प्रत्ययस्वरेणाद्युदात्तत्वे ततः "सनाद्यन्ता धातवः" इति सूत्रेण धातुसंज्ञायां "धातोः" इति यकाराकारस्योदात्तत्वे

प्रागुक्तयोरुदात्तयोः सतोः पश्चात् प्रवृत्तत्वात् 'सति शिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्य इति वाच्यम्' इत्यनेन यकाराकार एवोदात्तः अतोऽयमेव बलवान्। शप तस्य 'अनुदात्तौ सुप्पितौ' इति सूत्रेणानुदात्तत्वे ततः शवकारेण सह "अतो गुणे" इति पररूपे कृते "एकादेश उदात्तेनोदात्तः" इत्युदात्तत्वे घसस्तमादेशे तस्य "तस्यानुदात्तेन्ङिदुपदेशात्०" इत्यनेनादुपदेशात् परत्वादनुदात्तत्वम् तस्य च "उदात्तादनुदात्तस्य स्वरितः" इति स्वरिते, 'स्वरितात्संहितायाम्' इति नकारस्य एकश्रुतौ गोपायतं नः' इति।

नन्वत्र तमिति स्वरितमाश्रित्य 'अनुदात्तं पदमेकवर्जम्" इति परिभाषया शेषनिघातः स्यादिति चेन्मैवम्। यथोद्देशपक्षाश्रयणेनेयं परिभाषा त्रिपाद्यां न प्रवर्तते इत्यत्र ज्ञापकं तव्यतस्तित्वं "यतोऽनावः" इति च।

सतिशिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्य इति वाच्यम् (४६)— यो हि यस्मिन् सति शिष्यते स शिष्टः तस्य बाधको भवतीत्यर्थः। एतच्च सति शिष्टस्य बाधकत्वं न्यायसिद्धम्। तथा हि कार्यकालपक्षे उदात्तस्वरितविधिभिरेक-वाक्यतामापन्नया 'अनुदात्तं पदमेकवर्जम्' इति परिभाषया शेषनिघातः क्रियते तत्रोत्सर्गस्यापवादस्य वा चरमा या प्राप्तिः तेनेकवाक्यतापन्नया अनया पूर्वा प्रवृत्तिर्बाध्यते इति औपगवत्वमित्यत्राण्प्रत्यये त्वप्रत्यये च "आद्युदात्तश्च" इति प्रवर्तमानं स्वस्यैव प्रथमां प्रवृत्तिं बाधते द्वितीयप्रवृत्त्या लक्ष्यं परिनिष्ठापयतीति दिक्। "गोपायतं नः" उदाहरणम्।

ननु यदि सति शिष्टः स्वरो बलीयाँस्तर्हि सति शिष्टत्वात् विकरणस्वरोऽपि बलीयान् स्यात् तथा च 'गृणीत' इत्यादि मध्योदात्तं पदं स्यादत आह-अन्यत्र विकरणेभ्य इति। सति शिष्टोऽपि विकरणस्वरः प्रत्ययस्वरं न बाधते। अत्र च ज्ञापकं तासेः परस्य लसार्वधातुकस्यानुदात्तविधानम्। तथाहि यद्यपि लावस्थायां तासिर्विधीयते तथापि लकारमात्रापेक्षत्वादन्तरङ्गेषु परेषु च लादेशेषु कृतेषु पश्चात्तासिरिति तत्स्वरस्य सति शिष्टत्वात् शेपनिघातेनैव सिद्धेरनर्थकं तत्स्यात् इति अन्यत्र विकरणेभ्य इत्यत्र मानम्।

देवीं वाचम् (४७)—देवशब्दः अच्प्रत्ययान्तत्वेन "चितः" सूत्रेणान्तोदात्तत्वे पचादिषु 'देवट्' इति पाठात् 'टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्-

स्वरपः" इति सूत्रेण ङीपि तस्य "अनुदात्तौ सुप्पितौ" इति सूत्रेणानुदात्तत्वे "यस्येति च" इति सूत्रेणाकारस्य लोपे "अनुदात्तस्य च यत्रोदात्तलोपः" इति सूत्रेण ङीबुदात्तः।

न च 'अनुदात्तस्य च यत्रोदात्तलोपः' इति सूत्रे अनुदात्तस्येति व्यर्थम्, न ह्युदात्ते स्वरिते वा परे उदात्तलोपोऽस्ति। न च प्रसज्यते इति प्रासङ्गः अत्र कर्मणि घञ् "कर्षात्वतो घञोऽन्त उदात्तः" इत्यन्तोदात्तत्वे 'उपसर्गस्य घञ्मनुष्ये बहुलम्" इत्युपसर्गस्य दीर्घे तं वहतीति "प्राग्घिताद् यत्" इति सूत्रेण यति तित्त्वात् 'तित्स्वरितम्' इति स्वरिते तस्मिन् परे "यस्येति च" इति लोपः। एवञ्चात्र स्वरिते परे उदात्तलोपोऽस्त्येवेति वाच्यम्। स्वरिते हि विधीयमाने परिशिष्टम् "अनुदात्तं पदमेकवर्जम्" इत्यनुदात्तं तत्कुत उदात्तलोप इति चेत् न 'मा हि धुक्षाताम्' इत्यत्र दुहेर्लुङि आत्मनेपदे आतामि "शल इगुपधादनिटः क्सः" इति च्लेः क्से आतामित्यस्य "तास्यनुदात्तेन्ङिदुपदेशाल्लसार्वधातुकमनुदात्तमह्न्विङोः" इति लसार्वधातुकाऽनुदात्तत्वं क्सः प्रत्ययस्वरेणोदात्तः। 'क्सस्याचि' इति सूत्रेणाल्लोपः अत्र "कर्षात्वतो घञोऽन्त उदात्तः" इत्यतः 'अन्त' इत्यधिकारादन्त्यस्योदात्तत्वं स्यात् सति तु तस्मिन्नादेर्भवतीति दिक्।

सुबामन्त्रिते पराङ्गवत्स्वरे (५१)—सुबन्तमामन्त्रिते परे परस्याङ्गवत्स्यात् स्वरे कर्तव्ये इति सूत्रार्थः। उदाहरणञ्च-'द्रवत्पाणी शुभस्पती'।

द्रवत्पाणी शुभस्पती (४५) - अत्र "सुबामन्त्रिते पराङ्गवत्स्वरे" इति सूत्रेण परस्याङ्गवत्त्वात् आद्युदात्तत्वे "द्रवत्पाणी शुभस्पती" इति। अत्र शुभ इति शुभेः क्विबन्तात्षष्ठ्यन्तस्य परशरीरानुप्रवेशे पाष्ठिकमामन्त्रिताद्युदात्तत्वम्। न चाष्टमिको निघातः शङ्क्यः पूर्वामन्त्रितस्याविद्यमानवद्भावेन पादादित्वात्।

अयमग्ने जरिता (४१)—"सुबामन्त्रिते पराङ्गवत्स्वरे इत्यत्र "षष्ठ्यामन्त्रितकारकवचनम्" इति परिगणनं कर्तव्यम तेन 'अयमग्ने जरिता' इत्यत्र न पराङ्गवत्स्वरः इति।

आ ते पितर्मरुताम् (४६)—सुबामन्त्रिते पराङ्गवत्स्वरे इति सत्रे पूर्वाङ्गवच्चेति वक्तव्यम्" इति वार्तिकम् तेनात्र मरुतामिति परं पदं पूर्वस्य पितरित्य-

स्याङ्गवद् भवति। पितरित्यामन्त्रितनिघातेनानुदात्तं ततः परं मरुतामित्येतदप्यनुदात्तमेव भवति।

उच्चैरधीयान (४३)—"अव्ययानां न" इति वचनात् 'उच्चैरधीयान' अत्र "आमन्त्रितस्य च" इत्याद्युदात्तत्वं न। न च निषेधवैयर्थ्यम् "निपाता आद्युदात्ताः" इत्याद्युदात्तत्वस्यानिवारणादिति वाच्यम्। स्वरादिष्वन्तोदात्तयोरुच्चैर्नीचैः शब्दयोः पाठात्।

उपाग्न्यधीयान (३०)—अत्र "अव्ययीभावस्य त्विष्यते" इति पराङ्गवद्भावेन "आमन्त्रितस्य च" इति सूत्रेणाद्युदात्तत्वे 'उपाग्न्यधीयान' इति भवति।

न चाव्ययीभावस्याव्ययत्वात् अव्ययानां न इति पराङ्गवत्वनिषेधः स्यादिति वाच्यम् तत्र सूत्रे लुङ्मुखस्वरोपचारा इति परिगणनेनाव्ययत्वाभावेन वार्तिकाप्रवृतेः।

उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य (३७)—इति सूत्रस्वरूपम्। उदात्तस्थाने स्वरितस्थाने च यो यण् ततः परस्यानुदात्तस्य स्वरितः स्यात् इत्यर्थः। 'अभ्यभि हि' स्वरितस्य। यथाः—'खलप्व्याशा'।

खलप्व्याशा (५०)—'खलपूशब्दः कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तः' तस्य "ओः सुपि" इत्यनेन यण् स उदात्तयण् ततः परस्य ङिप्रत्ययस्य सुप्त्वात् "अनुदात्तौ सुप्पितौ" इति सूत्रेणाऽनुदात्तत्वे तस्यानुदात्तस्य "उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य" इति सूत्रेण स्वरिते 'खलप्व्याशा इति। अत्र "उदात्तयणो हल्पूर्वात्" इत्युदात्तत्वं तु न भवति। "नोङ्धात्वोः" इति निषेधात्। तस्य च स्वरितेकारस्य यणि ततः परस्याशाशब्दाकारस्य "उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य" इत्यनेनैव स्वरितः। आशाशब्दो हि "आशाया अदिगाख्या चेत्" इत्यन्तोदात्तत्वादनुदात्तादिः। अत्र आशाशब्दस्य शेषनिघातस्तु न भवति, आशाशब्दप्रथमाकारस्थानिकस्य स्वरितस्य त्रैपादिकत्वेनाऽसिद्धत्वात्।

ननु यणादेशम्प्रति स्वरितस्यासिद्धत्वात् स्थानिन्येव यण्प्रवृत्तेः "औजढत्" इत्यत्र यथा हृत्शब्दे द्वित्वं प्रवर्तते न तु ढशब्दे। न च स्वरितयणः परस्येत्याश्रयणात् सिद्धत्वं वाच्यम् तथा सति "उदात्तादनुदात्तस्य स्वरितः" इत्यनेन यत्र स्वरितः क्रियते तत्रापि ह्यसिद्धत्वं न स्यात्। न चेष्टापत्तिः; लक्ष्यविरोधात्। "प्रत्यग्निरुषसामग्रमख्यत्" इत्यादौ स्वरितादर्शनात् च। न च "नोदात्तस्वरितो-

दयम्" इति निषेधः स्यादिति वाच्यम् "अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा" इति न्यायेन "उदात्तादनुदात्तस्य" इति यत्र प्राप्तिस्तन्मात्रस्य निषेधात्। अन्यथा "खलप्व्याशान्या अग्निर्ग्राह्या अस्मान्" इत्यादावपि निषेधापत्तिरिति चेदत्राहुर्भाष्यकाराः—योगविभागः करिष्यते। उदात्तयणः परस्यानुदात्तस्य स्वरितो भवति। ततः 'स्वरितयणः' 'उदात्तयणः' इत्यनुवर्तते उदात्तयणः इत्येवं योऽभिनिर्वृत्तः स्वरितस्तद्यणः परस्यानुदात्तस्य स्वरितः स्यादिति सूत्रार्थः। एवञ्चास्यैवाश्रयात् सिद्धत्वं नान्यस्येति दिक्।

वोऽश्वाः (५१)—"बहुवचनस्य वस्नसौ" इत्यत्र "अनुदात्तं सर्वमपादादौ" इत्यस्याधिकारात् 'वस्' इत्यस्यानुदात्तत्वे "अशेः क्वन्" इति व्युत्पादनादश्वशब्दस्यापि आद्युदात्ते वसो रुत्वे उत्वे "एङः पदान्तादति" इति पूर्वरूपे "एकादेश उदात्तेनोदात्तः" इति सूत्रेण उदात्तत्वे 'वोऽश्वाः' इति भवति।

क्वावरं मरुतः (४२)—किमोत् इत्यपि 'क्वाति' इति किमः क्वादेशे 'तित्स्वरितम्' इत्यनेन स्वरितः। अवरशब्दः "स्वाङ्गशिटामदन्तानाम्" इत्युदात्तः तयोर्दीर्घः "एकादेश उदात्तेनोदात्तः" इति दीर्घैकादेश उदात्तः 'क्वावरं मरुतः' इति।

स्वरितो वानुदात्ते पदादौ (३६)—अनुदात्ते पदादौ परे उदात्तेन सहैकादेशः स्वरितो वा स्यात् इति सूत्रार्थः। उदाहरणञ्चात्र—वी३दं ज्योतिर्हृदये। अस्य श्लोको दिवीयते।

"स्वरितो वानुदात्ते पदादौ" अत्र व्यवस्थितविभाषाफलम् (४१)—अत्र सूत्रस्थविभाषा "व्यवस्थितविभाषा" अतः एकादेशस्थानिभूतयोः ह्रस्वेकारयोरेव स्वरितः। तेन 'वीदं ज्योतिर्हृदये' विशब्दः निपातत्वादाद्युदात्तः इदं शब्दः फिट्स्वरेणान्तोदात्तयोदेकादेशः अत्र स्वरितः। दीर्घप्रवेशे तु "अस्य श्लोको दिवीयते" अत्र दिविशब्दे ऊडिदंपदादिति विभक्तिरुदात्ता इयते इति 'तिङ्ङतिङः' इति निघातः एकादेशे तु "एकादेश उदात्तेनोदात्तः" इत्युदात्तः। किञ्च "एङः पदान्तादति" इति पूर्वरूपे स्वरित एव "सोऽयमगात्"।

क्षैप्रार्थः (४१)—उदात्तस्वरितस्थाने यो यण् स 'क्षैप्रसन्धिः'।

प्रश्लेषः (४१)—ह्रस्वयोर्यत्र सवर्णदीर्घः स 'प्रश्लेषः' उच्यते।

अभिनिहितार्थः (४१)–यत्र 'एङःपदान्तादति' इति पूर्वरूपं सः–अभिनिहितसन्धिरुच्यते। क्रमशः उदाहरणानि 'वीदं ज्योतिः' 'अभ्यभि हि' 'तेऽवदन्'इति।

अग्निमीले (५.१)– अत्राग्निशब्दः फिट्स्वरेण "फिषोऽन्त उदात्त" इति सूत्रेणान्तोदात्तः। अम् सुप्त्वात् "अनुदात्तौ सुप्पितौ" इति सूत्रेणानुदात्तः। "अमि पूर्वः" इति सूत्रकृतैकादेश "एकादेश उदात्तेनोदात्तः" इत्यनेनोदात्तः। 'इले' इति तु 'ईड' स्तुतौ लटि उत्तमपुरुषैकवचनम्। "द्वयोश्चास्य स्वरयोर्मध्यमेत्य सम्पद्यते स डकारो लकारः" इति प्रातिशाख्येन डस्य लत्वे "तिङ्ङतिङः" इति सूत्रेणातिङन्तादग्निशब्दात् परस्य 'ईले' शब्दस्य निघातः "उदात्तादनुदात्तस्य स्वरितः' इति ईकारस्य स्वरितत्वे 'अग्निमीले' इति। न च मकारेण व्यवधानम् "स्वरविधौ व्यञ्जनमविद्यमानवत्" इति परिभाषणात्। ननु "तित्स्वरितम्" इत्यस्यानन्तरमिदं वक्तव्यम्, स्वरितग्रहणं न कर्तव्यं भवतीत्याशङ्क्याह मूलेऽस्याप्यसिद्धत्वाच्छेषनिघातो न। यदि तत्र क्रियते "अनुदात्तं पदमेकवर्जम्" इत्येतत् प्रवर्तेत, इह प्रकरणे न प्रर्तते स्वरितस्यासिद्धत्वात्। तेन द्वयोरप्युदातष्वरितयोः श्रवणं सिद्धमिति।

तमीशानासः (४६)—तमिति तच्छब्दस्य द्वितीयैकवचनमन्तोदात्तम्। ऐश्वर्यार्थकस्य 'ईश' धातोरस्माच्छानच्। ईशानशब्दाज्जसि "आज्जसेरसुक्" इत्यसुगागमे रूपम्। शानचः चित्वादन्तोदात्तत्वम्। जसः सुप्त्वादनुदात्तत्वम्। "उदात्तादनुदात्तस्य स्वरितः" इति सूत्रेण ईकारस्य सकाराकारस्य च स्वरितत्वम् इति।

प्र य आरुः (४५)—'ये' इति यच्छब्दस्य प्रथमाबहुवचनं फिट्स्वरेणान्तोदात्तम्। आरुरिति अर्तेर्लिटि प्रथमपुरुषबहुवचनं झिः तस्य "परस्मैपदानां णलतुसुस्थलथुसणल्वमाः" इत्युस् प्रत्ययस्वरेणोदात्तः। न च "तिङ्ङतिङः" इति निघातः शङ्क्यः "यद्वृत्तान्नित्यम्" इति निषेधात्। आकारस्य "उदात्तस्वरितपरस्य सन्नतरः" इति वक्ष्यमाणसूत्रेण सन्नतरादेशः। अत्र 'नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम्' इति सूत्रेण अगार्ग्यकाश्यपगालवमते स्वरितनिषेधः। गार्ग्यादिमते तु स्वरितत्वम् इति।

एकश्रुतिः (५०)—उदात्तादीनां स्वराणामविभागेनावस्थानमेकश्रुतिः। आगच्छ भो माणवक।

आगच्छ भो माणवक (५२)—अत्र "दूराद्धूते च" इति वाक्यस्य टेः प्लुत उदात्तः। 'एकश्रुति दूरात्सम्बुद्धौ' इति। प्रत्युदाहरणे तु त्रैस्वर्यमेव भवति। तत्राङ "उपसर्गाश्चाभिवर्जम्" इत्याद्युदात्तः। गच्छेति तिङन्तस्य निघातः। भोशब्दो "निपाता आद्युदात्ताः" इत्याद्युदात्तः। शेषस्यामन्त्रितनिघातः।

अग्निर्मूर्धा दिवः ककुत् (३०)—अत्र "अङ्गेर्निर्नलोपश्च" इत्यनेन निष्पन्नोऽग्निशब्दः प्रत्ययस्वरेण फिट्स्वरेण वाऽन्तोदात्तः। मुर्वी बन्धने 'कनिन् युवृषितक्षिराजिधन्वि' इत्यनेन कनिनि वर्तमाने "श्वन्नुक्षन्पूषन्" इत्यत्र मूर्धन्शब्दः कनिन्प्रत्ययान्तोऽन्तोदात्तो निपातितः। दिव्शब्दात् परस्य षष्ठ्येकवचनस्य "ऊडिदम्पदाद्यप्पुम्रैद्युभ्यः" इत्युदात्तत्वम्। ककुच्छब्दः प्रातिपदिकस्वरेणाऽन्तोदात्तः। एवं "यज्ञकर्मण्यजपन्यूङ्खसामसु" इति सूत्रेणैकश्रुतौ 'अग्निर्मूर्धा दिवः ककुत्' इति भवति। एकश्रुतित्वन्नाम उदात्तादीनाम् स्वराणामविभागेनावस्थानम्। जपो नाम उपांशुप्रयोगः। यथा जले निमग्नस्य। तल्लक्षणञ्च।

शनैरुच्चारयेन्मन्त्रमीषदोष्ठौ न चालयेत्।
अपरैर्न श्रुतः किञ्चित् स 'उपांशु' जपः स्मृतः।

न्यूङ्खाः नाम (३२)—षोडश ओङ्काराः। गीतिषु सामाख्या। जपोऽनुकरणमन्त्रः।

उदात्तस्वरितपरस्य सन्नतरः (४४)—इति सूत्रम्। उदात्तस्वरितौ परौ यस्मात् तस्यानुदात्तस्यानुदात्ततरः स्यादित्यर्थः। सरस्वति शुतुद्रि। व्यचक्षयत्स्वः। इत्युदाहरणे।

सन्नतरः (४४)—'अनुदात्ततरः' इत्यर्थः।

सरस्वति शुतुद्रि (४३)—अत्र मे शब्दमाश्रित्यसरस्वतीत्यस्यामन्त्रितनिघातः। शुतुद्रिशब्दस्य तु न, पादादित्वात्। "आमन्त्रितस्य च" इति षाष्ठेन शुतुद्रीत्यस्योदात्तं प्रथममक्षरं तस्मिन् परे पूर्वस्य सरस्वतीकारस्य "उदात्तस्वरितपरस्य सन्नतरः" इति सूत्रेण सन्नतरे अनुदात्ततरे 'सरस्वती शुतुद्रि' इति भवति।

व्यचक्षयत्स्वः (४५)—वीति उपसर्गत्वादाद्युदात्तः। ततः परस्याचक्षयदितितिङन्तस्य "तिङ्ङतिङः" इति निघातः। स्वरिति "न्यङ्स्वरौ स्वरितौ" इति

स्वरितः तस्मिन् परे "उदात्तस्वरितपरस्य सन्नतरः" इति सूत्रेण यकारस्य सन्नतरः 'व्यचक्षयत्स्वः' इति भवति।

दिवेदिवे—तस्य परमाम्रेडितमित्याम्रेडितसंज्ञायां अनुदात्तं च इत्यनेन परस्यानुदात्तत्वे सिद्धम्।

इति साधारणस्वरः।

अथ धातुस्वरः

असि सत्यः। असधातोः सिपि तासस्त्योः इति संलोपे अकारस्योदात्तत्वे ततः परस्य स्वरितत्वे। सत्यः इत्यत्र सकारोत्तराकारस्य उदात्तस्वरितपरत्वेन अनुदात्ततरत्वम्।

स्वपन्ति (४७)—ञिष्वप्शये धातोः "स्वपादिर्हिंसामच्यनिटि" इति सूत्रेण लसार्वधातुकपरे वैकल्पिकाद्युदात्तो भवति। पक्षे प्रत्ययस्वरेण मध्योदात्तता भवति। स्वपन्ति।

हिंसन्ति (३५) हिसि हिंसायां धातोः "स्वपादिर्हिंसामच्यनिटि" इति सूत्रेण लसार्वधातुकपरे वैकल्पिकाद्युदात्ते 'हिंसन्ति' इति। पक्षे प्रत्ययस्वरेण मध्योदात्तता हिंसन्ति इति।

अभ्यस्तानामादिः (२८)—अनिट्यजादौ लसार्वधातुके परेऽभ्यस्तानामादिरुदात्तः। उदाहरणञ्च—ये ददति प्रिया वसु। दधाना इन्द्रे।

ये ददति प्रिया वसु (४८) दानार्थकदाधातोः लटि 'झि' आदेशे शपि श्लौ द्वित्वेऽभ्यासत्वे "अदभ्यस्तात्" इत्यदादेशे "श्नाभ्यास्तयोरातः" इत्यलोपे अत्र अनिटचजादौ लसार्वधातुके परे "अभ्यस्तानामादिः" इति सूत्रेण अभ्यस्तानामादेरुदात्तत्वे 'ये ददति प्रिया वसु इति।

भीह्रीभृहुमदधनदरिद्राजागरां प्रत्ययात् पूर्वं पिति (४९)—इति सूत्रस्वरूपम्। भीप्रभृतीनामभ्यस्तानां पिति लसार्वधातुके परे प्रत्ययात्पूर्वमुदात्तं स्यात् इत्यर्थः। नन्वत्र प्रत्ययादिति व्यर्थम्, भ्यादिभ्यः परस्य पितः प्रत्ययस्यैव

सत्त्वात् इति चेन्न प्रत्ययात् पूर्व एव उदात्तो यथा स्यात् संघातो माभूदित्यर्थं तदावश्यकत्वात् ।

म॒म॑त्तु॒ नः परिज्मा (४३)—मदेर्लोटि तिपि शपि 'बहुलं छन्दसि' इति शपः श्लौ द्वित्वेऽभ्यासकार्ये उत्वे 'ममत्तु' इत्यत्र "भीह्रीभृहुमदजनधनदरिद्राजागरां प्रत्ययात् पूर्वं पिति" इति सूत्रेण प्रत्ययात्पूर्वस्योदात्तत्वे ममत्तु नः परिज्मा । इति

जागर्षित्वम् (५२)—जागृधातोः लटि सिपि गुणे रपरे जागर्षि इत्यत्र "भीह्रीभृहुमदजनधनदरिद्राजागरां प्रत्ययात्पूर्वंपिति" इति सूत्रेण लसार्वधातुकेपरे प्रत्ययात्पूर्वस्योदात्तत्वम्, तेन स्वरविधौ सप्तम्यास्तदन्तत्वज्ञापनात् लिदन्तस्य स्वरो न ।

चिकीर्षकः (५१)—सन्नन्तात् 'चिकीर्ष' इत्यस्मात् ण्वुल् तस्याकादेशे "लिति" इति सूत्रेण ककारेकार उदात्ते 'चिकीर्षकः' इति । नचात्राल्लोपस्य स्थानिवत्त्वम् स्वरविधौ तन्निषेधात् ।

लोलूयं लोलूयम् (५०)—लूञ् धातोः यङन्ताण्णमुल् "नित्यवीप्सयोः" इति द्वित्वम् अत्र प्रथमः लोलूयशब्दः "आदिर्णमुल्यन्यतरस्याम्" इति आद्युदात्तः लू इति स्वरितः ततश्चत्वारः प्रचयाः । पक्षे लित्स्वरोऽपि भवति ।

लूयते केदारः स्वयमेव (४५)—लू धातोः "अचः कर्तृयकि" इति सूत्रेण उपदेशेऽजन्तानां कर्तृयकि परे आद्युदात्तो वा भवतीत्यर्थकेन आदिमध्यौ पर्यायेणोदात्तौ "तास्यनुदात्तेत्" इत्यादिसूत्रेण 'ते' इत्यस्यानुदात्तत्वम् । लूयते केदारः स्वयमेव । पक्षे (लूयते केदारः स्वयमेव) इति ।

मा॒ हि॒ ची॒करताम् (४९) 'कृ' धातोर्णिचि अनुबन्धलोपे लुङि तसि तस्य तामादेशे च्लौ "णिश्रिद्रुस्रुभ्यः कर्तरिचङ्" इति च्लेश्चङादेशेऽनुबन्धलोपे कृ + इ + अ + तामिति स्थिते "चङि" इति द्वित्वेऽभ्यासत्वेऽभ्यासकार्ये वृद्धौ रपरत्वे उपधाह्रस्वे "णेरनिटि" इति णेर्लोपेऽडागमे प्राप्ते "न माङ्योगे" इति तन्निषेधे सन्वद्भावादिकार्ये मा हि चीकरताम्' इत्यत्रादुपदेशात्परत्वेन लसार्वधातुकानुदात्तत्वे कृते चङ एव स्वरे प्राप्ते "चङ्यन्यतरस्याम्" इति सत्रेण धात्वकार उदात्तः पक्षान्तरे चङुदात्तः । इति धातुस्वरः ।

अथ प्रातिपदिकस्वरः

चतुरः कल्पयन्तः (४६)—चतेरुरन् प्रत्यये निष्पन्नचतुर् शब्दस्य शसि रूपम्। अत्र "ञ्नित्यादिर्नित्यम्" इति नित्वादाद्युदात्तत्वे प्राप्ते तम्प्रबाध्य "चतुरः शसि" इत्यन्तोदात्तत्वे 'चतुरः' कल्पयन्तः इति।

चतस्रः पश्य (४२)—चतेरुरन्प्रत्यये अत्र नित्वात् "ञ्नित्यादिर्नित्यम्" इति आद्युदात्तत्वम्। ततः चतसृ + अस् इति स्थिते परत्वात् "अचरि ऋतः" इति रेफादेशे तकाराकारस्योदात्तत्वं प्राप्नोति सच अचिर ऋतः इति रादेशस्य पूर्वविधौ स्थानिवत्त्वान्नेह भवति। न च "स्वरविधौ स्थानिवत्त्वनिषेध इति वाच्यम्" "स्वर-दीर्घयलोपेषु लोपाजादेश एव न स्थानिवत्" इति नियमेन तन्निषेधात्।

अध्वर्युभिः पञ्चभिः (४५)—"झल्युपोत्तमम्" इति सूत्रेणोपोत्तमस्योदात्तत्वे 'अध्वर्युभिः पञ्चभिः" इति।

सर्वम् सर्वे, सर्वस्य (३३)—एषु "सर्वस्य सुपि" इति सूत्रेण सर्वशब्दस्याद्युदात्तत्वे 'सर्वम्' इत्यादयः सिद्धयन्ति।

सौवर्यः सप्तम्यस्तदन्तसप्तम्यः (३०)—ननु "भीह्रीभृहुमदजनधनदरिद्राजागरां प्रत्ययात्पूर्वं पिति" इति सूत्रे पूर्वग्रहणाभावेनैव सिद्धे पूर्वग्रहणं व्यर्थमिति चेन्न—"सौवर्यः सप्तम्यस्तदन्तसप्तम्यः" इति ज्ञापनार्थं तस्यावश्यकत्वात्। तेन "सर्वस्य सुपि" इत्यस्य सुबन्तस्य सर्वस्येत्यर्थात् 'सर्वप्रियः' इति इत्यादौ स्वरसिद्धिः "ञ्नित्यादिर्नित्यम्" इत्यत्र ञिदन्तस्य निदन्तस्येत्यर्थलाभश्च।

अयं पन्थाः (४९)—पथिन् शब्दात् सौ "पथिमथ्यृभुक्षामात्" इत्यकारादेशे "थोन्थः" इति न्थादेशे रुत्वे विसर्गे 'पन्थाः' इत्यत्र 'पथिमथो सर्वनामस्थाने" इति सूत्रेणाद्युदात्तत्वे 'पन्था' इति।

अन्तश्च तवै युगपत् (३२)—इति सूत्रस्वरूपम्। तवैप्रत्ययान्तस्याद्यन्तौ युगपदाद्युदात्तौ स्तः इत्यर्थः। 'हर्षसे दातवा उ' इत्युदाहरणम्।

दातवा उ (३७)—ददातेः "कृत्यार्थे तवैकेनकेन्यत्वनः" इत्यनेन तवै प्रत्यये दा + तवै + उ इति जाते ऐकारस्याऽऽयादेशे "लोपः शाकल्यस्य" इति

यकारस्य लोपे दातवा उ इति जाते "अन्तश्च तवै युगपत्" इति सूत्रेण तवैप्रत्ययान्तस्याद्यन्तयोर्युगपदुदात्तयोः कृतयोः 'दातवा उ इति । यत्र केवलं 'दातवैं' इति तत्र सन्धिकार्यं न कर्तव्यमिति ।

जयोऽश्वः (२५)—जयत्यनेन 'जयः' इति विग्रहे जिधातोः "एरच्" इति सूत्रेण अच् प्रत्ययेऽनुवन्धलोपे गुणेऽयादेशे 'जय' इत्यस्य प्रातिपदिकत्वे सौ रुत्वे विसर्गे 'जयः' इति साधुः । अत्र "जयः करणम्" इति जयशब्द आद्युदात्तो भवति ।

चञ्चा (२६)—इयं तृणमयपुरुषस्य संज्ञा । अत्र "संज्ञायामुपमानम्" इति सत्रेणाद्युदात्वम् ।

स्वरविधौ प्रत्ययलक्षणम् (३०)—चञ्चेव चञ्चेत्यत्र कनि कनो लुपि प्रत्ययलक्षणेन नित्वात् "ञ्नित्यादिर्नित्यम्" इत्यनेनैकाद्युदात्वे सिद्धे "संज्ञायामुपमानम्" इदं सूत्रं व्यर्थं सत् ज्ञापयति—"क्वचित् स्वरविधौ प्रत्ययलक्षणं न भवति" इति ।

निष्ठा च द्व्यजनात् (३६)—निष्ठान्तस्य द्व्यचः संज्ञायामादिरुदात्तो नत्वाकार इत्यर्थः । 'दत्तो': इत्युदाहरणम् ।

आशितम् (४४)—अत्र कर्तृवाची आशितशब्दः आद्युदात्तः इत्यर्थकेन "आशितः कर्ता" इति सूत्रेणाद्युदात्तत्वम् ।

रिक्तः (५२)—रिचिर् विरेचनेऽस्मात् निष्ठाक्ते प्रत्ययेऽनुबन्धलोपे 'रिक्त' इत्यस्य प्रातिपदिकत्वे सौ रुत्वे विसर्गे 'रिक्तः' घट इत्यर्थे "रिक्ते विभाषा" इति सूत्रेण विभाषयाद्युदात्तो रिक्तः इति । संज्ञायां तु "निष्ठा च द्व्यजनात्" इति नित्यमदाद्युदात्तत्वं पूर्वविप्रतिषेधेन । एवञ्च रिक्तः, रिक्तः इति भवतः ।

तुभ्य हिन्वानः (३९)—युष्मद्शब्दात् ङेविभक्तौ "ङे प्रथमयोरम्" इत्यमि "तुभ्यमह्यौ ङयि" इति तुभ्यम्' अत्र 'ङयि च' इत्याद्युदात्तत्वम् ।

मह्यं वातः पवताम् (३५)—मह्यमित्यत्र "ङयि च" इति सत्रेण ङेपरे आद्युदात्तत्वम् ।

युञ्जन्त्यस्य काम्या (४५)—अत्र कर्मणिङन्तादचो यत्' इति यति टापि 'काम्या' अत्र "यतोऽनावः" इति यत्प्रत्ययान्तस्य द्व्यच आद्युदात्तत्वे 'काम्या' इति ।

ईड्यो नूतनैरुत (५०)—ईडितुं शक्य इति विग्रहे 'ईड्' धातोः "ऋहलोर्ण्यत्" इति ण्यत् प्रत्ययेऽनुबन्धलोपे 'ईड्य' इत्यस्य प्रातिपदिकत्वे सौ रुत्वे विसर्गे "ईडवन्दवृशंसदुहां ण्यतः" इति सूत्रेण 'ईड्य' इत्यस्याद्युदात्तत्वे 'ईड्यः' इति भवति ।

वार्यम् (२६)—वृङ् संभक्तौ धातोः ऋहलोर्ण्यद् इति ण्यति "ईडवन्दवृशंसदुहां ण्यतः" इति सूत्रेण आद्युदात्तत्वे सिद्धम् । ण्यतः द्व्यनुबन्धत्वेन यद् ग्रहणेनाग्रहणात् वचनम् ।

इन्धानः (३१)—अयं "विभाषा वेण्विन्धानयोः" इति सूत्रेण वैकल्पिकाद्युदात्तो भवति । अत्र इन्धानशब्दो यदि चानशन्तस्तदा चित्वादन्तोदात्तः । यदा च शानजन्तस्तदा लसार्वधातुकाऽनुदात्तत्वेकृते उदात्तनिवृत्तिरेण मध्योदात्तः "श्नसोरल्लोपः" इत्युदात्तस्य श्नमोऽकारस्य लोपात् सर्वथाप्यप्राप्तमाद्युदात्तत्वं पक्षे विधीयते ।

शरावती (४१)—शरास्सन्त्यस्याम् इति शरावती नाम नदीति विग्रहे शरशब्दात् "नद्यां मतुप्" इति सूत्रेण मतुपि अनुबन्धलोपे "मादुपधायाश्च मतोर्वोऽयवादिभ्यः" इति सूत्रेण मकारस्य वकारे "शरादीनाञ्च" इति सूत्रेण दीर्घे ङीपि सौ सुलोपे 'शरावती' इत्यत्र "मतोः पूर्वमात्संज्ञायां स्त्रियाम्" इति सूत्रेण मतोः पूर्वस्याकारस्योदात्तत्वे 'शरावती' इति ।

वेत्रवती (५१)—अत्र "अन्तोऽवत्याः" इति सूत्रेणावतीशब्दस्यान्त उदात्तः तेन वेत्रवती इति ।

इति प्रातिपदिकस्वरः ।

अथ फिट् (प्रातिपदिक) स्वरे प्रथमः पादः।

फिट्सूत्राणां पाणिनीयैरुपादेयत्वम् (५१)—फिडिति पूर्वाचार्यप्रसिद्धया प्रातिपदिकमुच्यते तदाह "फिषोन्त उदात्तः" इति सूत्रार्थे 'प्रातिपदिकं फिट' इति।

ननु कथमपाणिनीयानि सूत्राणि पाणिनीयव्याकरणे प्रयुक्तानि इति चेत् शृणु पाणिनीयसूत्रैः समन्वयस्यैव हेतुत्वात्। तथा च "शताच्च ठन्यतावशते" इति सूत्रे कैयटः–"नियतकालाश्च स्मृतयो व्यवस्थाहेतवः" इति मुनित्रयमतेनाद्यत्वे साध्वसाधुप्रविभागः इति। नैतत् 'अपाणिनीयान्यपि फिट्सूत्राणि पाणिनीयैराश्रीयन्ते' इति भाष्याज्ज्ञापनात्। तथा च "आद्युदात्तश्च" इति सूत्रे भाष्यं "प्रातिपदिकस्य चान्तः" इति प्रकृतेरन्तोदात्तत्वं शास्तीति। तथा तस्मिन्नेव सूत्रे प्रत्ययाद्युदात्तत्वस्याऽवकाशः; यत्रानुदात्ता प्रकृतिः समत्वं सिमत्वमिति। नहि "फिषोऽन्त उदात्तः" त्वत्त्वसमसिमेत्यादिफिट्सूत्रानादरण प्रकृतेरन्तोदात्तत्वं सम्भवतीति दिक्।

पाटलः (४१)—पाटलेति ओषधिविशेषस्य संज्ञा। अत्र लघावन्त इति गुरो रुदात्तत्वे प्राप्ते "पाटलापालङ्काम्बासागरार्थानाम्" इति सूत्रेणान्तोदात्तः।

गेहम् (२८)—अत्र "नब्विषयस्यानिसन्तस्य" इति सूत्रेणाद्युदात्ते प्राप्ते "गेहार्थादामस्त्रिताम्" इत्यनेनान्तोदात्ते 'गेहम्' इति भवति।

ध्यपूर्वस्य स्त्रीविषयस्य (३१)—धकारयकारपूर्वो योऽन्त्योऽच् स उदात्तः स्यात् इत्यर्थः। 'अन्तर्धा' इत्युदाहरणम्।

जाया (३९)–अत्र "ध्यपूर्वस्य स्त्रीविषयस्य" इति सूत्रेण 'अन्त्योच्' उदात्तः।

क्षत्रिया (४०)—अत्र "यान्तस्यान्त्याम् पूर्वम्" इति फिट्सूत्रेण मध्योदात्तत्वे क्षत्रशब्दात् "क्षत्राद्घः" इति सूत्रेण घविधानेन "आद्युदात्तश्च" इति सूत्रेण प्रत्ययस्याद्युदात्तत्वे वा 'क्षत्रिया' इत्यत्र मध्योदात्तो भवति।

नखम् (५१)—अत्र "स्वाङ्गशिटामदन्तानाम्" इति फिट्सूत्रेणाद्युदात्तत्वे प्राप्ते तम्प्रबाध्य "खान्तस्याश्मादेः" इति फिटसूत्रेणान्तोदात्तत्वे नखम् इति।

सुखम् (५२)—अयं "खान्तस्याश्मादेः" इति सूत्रेणान्तोदात्तः ।

बंहिष्ठः (३२)—अतिशयेन बहुलः बंहिष्ठः इति व्युत्पत्तौ बहुलशब्दात् "अतिशायने तमबिष्ठनौ" इति सूत्रेण बहुलशब्दात् इष्ठन् प्रत्ययेऽनुबन्धलोपे "प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्रप्द्राघिवृन्दाः" इति सूत्रेण बंहिरित्यादेशे नित्वात् "ञ्नित्यादिर्नित्यम्" इत्याद्युदात्तत्वे प्राप्ते तम्प्रबाध्य "हिष्ठवत्सरतिशत्थान्तानाम्" इति सूत्रेणान्तोदात्तत्वे 'बंहिष्ठः' इति भवति

परिवत्सरः (४२)—अत्र अव्ययपूर्वपदप्रकृतिस्वरं बाधित्वा "हिष्ठवत्सरतिशत्थान्तानाम्" इति सूत्रेणान्तोदात्तत्वं 'परिवत्सरः' इति ।

दक्षिणो (बाहुः) (४४)—अत्र "स्वाङ्गाख्यायामादिर्वा" इति सूत्रेण दक्षिणस्याद्यन्तयोः पर्यायेणोदात्तयोः कृतयोः 'दक्षिणो बाहुः' 'दक्षिणो बाहुः' इति भवति ।

कृष्णो नोनाव वृषभः (५०)—अयं "वर्णानां तणतिनितान्तानाम्" इति आद्युदात्तत्वे प्राप्ते तम्प्रबाध्य "कृष्णस्यामृगाख्याचेत्" इति सूत्रेणान्तोदात्तः ।

पृष्ठम् (४४)—अत्र "स्वाङ्गशिटामदन्तानाम्" इत्याद्युदात्तत्वे प्राप्तं तम्प्रबाध्य "पृष्ठस्य च" इति सूत्रेण वान्तोदात्तः । पृष्ठम्, पृष्ठम् । इति ।

कृत्तिकानक्षत्रम् (४२)—अत्र "नक्षत्राणामब्विषयाणाम्" इत्यन्तोदात्तत्वे प्राप्ते "न कुपूर्वस्य कृत्तिकाख्या चेत्" इति निषेधे "लघावन्ते द्वयोश्च बह्वषो गुरुः" इति सूत्रेणाद्युदात्तत्वम् ।

घृतम् (३४)—अयं "नब्विषयस्यानिसन्तस्य" इति सूत्रेणाद्युदात्तत्वे प्राप्ते तम्प्रबाध्य "घृतादीनां च" इत्यन्तोदात्तत्वे 'घृतम्' इति ।

ज्येष्ठः (४७)—वृद्धशब्दस्य 'वृद्धस्य च' इति सूत्रे इतष्ठिनि ज्यादेशः "ज्येष्ठकनिष्ठयोर्वयसि" इति सूत्रेणान्तोदात्तः ।

कनिष्ठः । युवशब्दात् युवाल्पयोः कनन्यतरस्याम् इति कनादेशे ज्येष्ठ कनिष्ठयो र्वयसि इति अन्तोदात्तत्वम् ।

इति फिट्स्वरे प्रथमः पादः ।

अथ फिट्स्वरे द्वितीयः पादः ।

नब्विषयस्यानिसन्तस्य (३७)—इति सूत्रस्वरूपम् । इसन्तवर्जितस्य नित्यनपुंसकस्यादिरुदात्तः स्यात् इत्यर्थः । यथा—वने नवा यः ।

नप् (४४)—नपुंसकम् इत्यर्थः ।

तिलाः (३३)—अत्र "तृणधान्यानां च द्व्यषाम्" इति सूत्रेणाद्युदात्ते कृते 'तिलाः' । द्व्यषामित्यस्य द्व्यचामित्यर्थः ।

गोधूमाः । अत्र न द्व्यच् किन्तु बह्वच् । तेन तृणधान्यानां इत्यस्याप्रवृत्त्या 'लघावन्ते-इति मध्योदात्तत्वम् ।

पञ्च (५२)—अत्र "षः सङ्ख्यायाः" इति सूत्रेणाद्युदात्ते 'पञ्च' इति ।

स्वाङ्गशिटामदन्तानाम् (३८)—इति सूत्रस्वरूपम् । स्वाङ्गवाचिनामदन्तानां सर्वनाम्नामादिरुदात्तः स्यात् इत्यर्थः । उदाहरणानि कर्णाभ्यां चिबुकादधि । ओष्ठाविव मधु । विश्वो विहायाः ।

शिट (३२)—'सर्वनाम इत्यस्य शिट् इति संज्ञा प्राचाम् ।

वृकः (४२)—अयं "प्राणिनां कुपूर्वम्" इति सूत्रेणाद्युदात्तः ।

कन्दुकः (४२)—अत्र "खय्युवर्णं कृत्रिमाख्या चेत्" इति सूत्रेण खयि परे उवर्णस्योदात्तत्वे 'कन्दुकः' इति ।

तस्य नाक्षः (४८)—अयं "अक्षस्यादेवनस्य" इति सूत्रेण आद्युदात्तः ।

लघावन्ते द्वयोश्च बह्वषो गुरुः (३३)—इति सूत्रस्वरूपम् । अन्ते लघौ द्वयोश्च लघ्वोः सतोर्बह्वच्कस्य गुरुरुदात्तः स्याद् इत्यर्थः । यथा—कल्याणः । कोलाहलः, इति ।

कल्याणः (४५)—अयं "लघावन्ते द्वयोश्च बह्वषो गुरुः" इति सूत्रेण पर्यायेणादिमध्यावुदात्तौ । ततश्च 'कल्याणः' 'कल्याणं इति भवति ।

कोलाहलः कोलाहलः (२६)—अत्र "लघावन्ते द्वयोश्च बह्वषो गुरुः" इत्यनेन बह्वच्कस्य गुरुरुदात्तः ।

मल्लिकाः (२८)–अत्र "स्त्रीविषयवर्णाक्षुपूर्वाणाम्" इति सूत्रेणाद्युदात्तः ।

तित्तिरिः (२७)–अत्र "शकुनीनां च लघुपूर्वम्" इति पूर्वं लघुरुदात्तः ।

केकयः (३७)—अत्र "जनपदशब्दानामषान्तानाम्" इत्यनेनाद्युदात्तत्वे 'केकयः' इति ।

पललम् (३६)—अत्र "हयादीनामसंयुक्तलान्तानामन्तः पूर्वं वा" इति सूत्रेणाद्युदात्तत्वे 'पललम्' इति । अनेनैव अन्त्यात्पूर्वस्योदात्तत्वे 'पललम्' इति भवति ।

कृषिः (३४)—अत्र द्व्यच्कत्वात् "इगन्तानां च द्व्यषाम्" इति सूत्रेणाद्युदात्तत्वे 'कृषिः' इति ।

इति फिट्स्वरे द्वितीयः पादः ।

अथ फिट्स्वरे तृतीयः पादः ।

रसना (४२)—अत्र "स्वाङ्गानामकुर्वादीनाम्" इति अकुर्वादीनां पाठादत्रास्य सूत्रस्याप्राप्तौ "स्वाङ्गशिटामदन्तानाम्" इति सूत्रेणाद्युदात्तत्वे 'रसना' इति ।

सुगन्धितेजनाः (४५)—अत्र "सुगन्धितेजनस्य ते वा" इति सूत्रेण आदिर्द्वितीयं ते शब्दश्चेति त्रयः पर्यायेणोदात्ताः। तेन 'सुगन्धितेजनाः' 'सुगन्धितेजनाः' 'सुगन्धितेजनाः' इति ।

सुनाथा सभा (४६)—अत्र "थान्तस्य च नालघुनी" इति सूत्रेण नाशब्दो लघु च उदात्तौ ।

ईषान्तस्य हयादेरादिर्वा (३५)—इति सूत्रस्वरूपम् । ईषान्तस्य (हयिति हल्संज्ञा) हलादेरादिरुदात्तो वा स्यात् इत्यर्थः । 'हलीषा' 'लाङ्गलीषा' इत्युदाहरणे ।

हलीषा (५२)—अत्र "ईषान्तस्य हयादेरादिर्वा" इति सूत्रेण विभाषयाद्युदात्तत्वम् ।

ऊशीरदाशेरः (४६)—उशीरदाशेरकपालपलालशैवालश्यामाकशारीरशरावहृदयहिरण्यापत्यदेवराणाम् इति सूत्रस्वरूपम्। एषाम् उशीर,दाशेर, कपालप्रभृतीनां शब्दनामादिरुदात्तः स्यात् इत्यर्थः।

इति फिट्स्वरे तृतीयः पादः।

अथ फिट्स्वरे चतुर्थः पादः।

पारावतः (४२) – अत्र "पारावतस्योपोत्तमवर्जम्" इति सूत्रेण उदात्तत्वे क्रमेण 'पारावतः' पारावतः, 'पारावतः' इति भवति।

स्थालीपाकः (५२)—अत्र "धूम्रजानुमुञ्जकेशकालवालस्थालीपाकानामधूजलस्थानाम्" इत्युदात्तत्वे 'स्थालीपाकः" इति।

न्यर्बुदम् (२८)—अत्र "न्यर्बुदव्यल्कशयोरादिः" इत्यादिस्वरितत्वे 'न्यर्बुदम्' इति भवति।

तिल्यम् (४२)—तिलानां भवनं क्षेत्रं तिल्यमित्यत्र "तिल्यशिक्यकाश्मर्यधान्यकन्याराजमनुष्याणामन्तः" इति सूत्रेणान्तस्वरिते 'तिल्यम्' इति भवति।

स्तरीरुत्वत् (५०)—अत्र "त्वत्त्वसमसिमेत्यनुच्चानि" इत्यनेनानुदात्तः।

उत त्वः पश्यन् (४५)—अत्र "त्वत्त्वसमसिमेत्यनुच्चानि" इत्यनेनानुदात्तः।

स्वाहा (३३)—अत्र "निपाता आद्युदात्ताः" इति सूत्रेण आद्युदात्तत्वे "स्वाहा" इति।

तन्नोमिमृभवो यथा (४८) - अत्र 'यथा' शब्दः पादान्तेऽनुदात्तः स्यादित्यर्थकेन "यथेति पादान्ते" इति सूत्रेणानुदात्तत्वे तन्नेमिमृभवो यथा इति।

पटुपटुः (५१)—अत्र "प्रकारादिद्विरुक्तौ परस्यान्त उदात्तः" इति सूत्रेणान्तोदात्तत्वे "पटुपटुः" इति। न च "कर्मधारयवदुत्तरेषु" इति कर्मधारयवद्भावादेव "समासस्य" इत्यन्तोदात्तत्वे सिद्धे व्यर्थमिदमिति वाच्यम्, तस्य पाणिनीयात् पूर्वं प्रवृत्तत्वेनाऽदोषात्।

दिवेदिवे (५१)—अत्र प्रकारादिद्वित्वादन्यस्मिन् द्वित्वे 'शेषं सर्वमनुदात्तम्' इति सूत्रेण द्विरुक्तस्य परमनुदात्तम् ।

इति फिट्स्वरे चतुर्थः पादः ।

अथ प्रत्ययस्वरः ।

अग्निः । अङ्गशब्दात् 'अङ्गेर्निर्नलोपश्च' इति निप्रत्यये न लोपे च कृते 'आद्युदात्तश्च' इति प्रत्ययस्याद्युदात्तत्वम् ।

न यो युच्छति । युच्छधातुः प्रमादे वर्तते । अत्र 'धातोः' इत्यन्तोदात्तः, तिपि शपि 'उदात्तादनुदात्तस्य' इति स्वरितत्वम्, 'स्वरितात् संहितायामनुदात्तानाम्' इति तिपः प्रचयः (एकश्रुतिः) ।

नभन्तामन्यके समे (४४)—अत्र अन्यशब्दात् 'अव्ययसर्वनाम्नामकच् प्राक् टेः' इति सूत्रेणाकच्प्रत्यये अन्यकशब्दस्य प्रथमाबहुवचने अकचः परा 'टिः' "चितः सप्रकृतेर्बह्वकजर्थम्" इति सूत्रेणान्तोदात्ता जाता ।

कौञ्जायनाः (३२)—कुञ्जस्यापत्यानि बहूनि इति विग्रहे "गोत्रे कुञ्जादिभ्यश्च्फञ्" इति सूत्रेण च्फञ्प्रत्यये अनुबन्धलोपे तद्धितान्तत्वात् प्रातिपदिकत्वे सुपो लुकि फस्यायनादेशे वृद्धौ "व्रातच्फञोरस्त्रियाम्" इति सूत्रेण ञ्यप्रत्यये "ञ्यादयस्तद्राजाः" इति तद्राजसंज्ञायां "तद्राजस्य बहुषु तेनैवास्त्रियाम्" इति सूत्रेण लुकि विभक्तिकार्ये "तद्धितस्य" इति सूत्रेणान्तोदात्ते "कौञ्जायनाः" इति ।

न च "चितः सप्रकृतेर्बह्वकजर्थम्" इत्यनेनैवान्तोदात्तत्वे सिद्धे सूत्रमिदं व्यर्थमिति वाच्यम्, ञित्स्वरबाधनार्थमस्यावश्यकत्वात् ।

यदाग्नेयः (३५)—अग्निशब्दात् "अग्नेर्ढक्" इति सूत्रेण ढकि प्रत्यये तद्धितान्तत्वात् प्रातिपदिकत्वे सुपो लुकि आद्यचो वृद्धौ ढस्य "आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्" इति सूत्रेण ढस्यैयादेशे विभक्तिकार्ये "कितः" इति सूत्रेणान्तोदात्ते 'आग्नेयः' इति ।

वाचा विरूपः (४७)—अत्र "सावेकाचस्तृतीयादिर्विभक्तिः" इति सूत्रेण 'वाचा' इत्यत्र तृतीया विभक्तिरुदात्ता ।

परमवा॒चा (४४)—अत्र "अन्तोदात्तादुत्तरपदादन्यतरस्यामनित्यसमासे" इति सूत्रेण विभाषया तृतीया विभक्तिरुदात्ता । पक्षे वाशब्द उदात्तः ।

प्रष्ठौ॒हः (४४)—अत्र "छन्दसि सहः" "वहश्च" इति ण्विप्रत्यये सर्वापहारे 'वाह [ऊठ्' इत्यूठि प्रष्ठौह इति "गतिकारकोपपदात् कृत्" इति सूत्रेणान्तोदात्तः । प्रष्ठवाह् शब्दस्य शसि रूपमिदम् । तेनात्र एकाजन्तोदात्तेभ्यः पराऽसर्वनामस्थान-विभक्तिरुदात्ता स्यादित्यर्थकेन "ऊडिदम्पदाद्यप्पुम्रैद्यु॒भ्यः" इति सूत्रेणोदात्तत्वम् । अत्र प्रष्ठौहशब्दस्यानेकाच्त्वेऽपि ऊढशब्दस्यैकाच्त्वमेवेति न दोषः ।

अक्षद्यु॒वां (३०)—अक्षैर्दीव्यतीति विग्रहे क्विपि सर्वापहारेऽन्तरङ्गत्वादूठि यणादेशे उपपदसमासे कृत्स्वरेणान्तोदात्तत्वे 'अक्षद्यु॒वा' इति । "ऊडिदंपदाद्यप्पुम्रैद्यु॒भ्यः" इति सूत्रे "ऊठ्युपधाग्रहणं कर्तव्यम्" इत्युक्तम् । अत्र उपधाभूत ऊठ् गृह्यते न त्वन्त्यः । पञ्चमीनिर्देशात् परस्यैव ग्रहणे प्राप्ते वार्तिकम् तेन अक्षद्यु॒वेत्यादौ विभक्तेराद्यु॒दात्तत्वं न भवति ।

अहरहर्जायते मा॒सि मासि (२७)—अत्र मासीति प्रयोगे "ऊडिदंपदाद्यप्पुम्रैद्यु॒भ्यः" इति सूत्रेणासर्वनामस्थानङिविभक्तेरुदात्तत्वे "अहरहर्जायते मासि मासि" इति ।

उपत्वाग्ने दि॒वे दि॒वे (३०)—अत्र "ऊडिदंपदाद्यप्पुम्रैद्यु॒भ्यः" इति सूत्रेणोदात्तत्वे "उपत्वाग्ने दिवे दिवे" इति ।

अष्टाभिर्दशभिः (३४)—अत्र "अष्टनो दीर्घात्" इति सूत्रेण भिसः उदात्तत्वे 'अ॒ष्टाभिः' इति । अत्र चाष्टन्शब्दे प्राप्तं "झल्युपोत्तमम्" इति प्रबाध्य विभक्तेरुदात्तत्वम् । 'अष्टभिः' इत्यत्र तु "झल्युपोत्तमम्" इत्यनेनैव स्वरः सिद्धो भवति ।

नन्वत्रापि "अष्टन आ विभक्तौ" इत्यनेनात्वं विकल्पस्य तद्विधावभावादितिचेत्, शृणु-इहस्थमेव दीर्घग्रहणमष्टः आत्वविकल्पं ज्ञापयति । अन्यथा दीर्घग्रहणमेव व्यर्थं स्यात् । ज्ञापयति च कृतात्वनिर्देशस्य षट्संज्ञाम् । अन्यथा ह्यात्व-पक्षेऽष्टनः

स्वरः सावकाशः परत्वादनात्वपक्षे षट्स्वरेणैव वाधिष्यते किं तेन दीर्घग्रहणेनेति दिक् ।

जानती (२९)—शत्रन्तजानतीत्यत्र "आद्युदात्तश्च" इत्यनेन शत्रन्तोदात्तत्वे "शतुरनुमो नद्यजादी" इति सूत्रेणैकारस्योदात्तत्वे 'जानती' इति ।

उदात्तयणो हल्पूर्वात् (४८)— उदात्तस्थाने यो यण् हल्पूर्वस्तस्मात् परा नदी अजादिश्च शसादिर्विभक्तिरुदात्ता स्यात् इति सूत्रार्थः । यथा—'चोदयित्री सूनृतानाम्' एषा ते नेत्री ।

चोदयित्री सूनृतानाम् (४३)— चोदयित्री इति तृजन्तत्वात् "चितः" इत्यन्तोदात्ते कृते "उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य" इति प्राप्ते तम्प्रबाध्य "उदात्तयणो हल्पूर्वात्" इति सूत्रेणोदात्तत्वे 'चोदयित्री' इति ।

नेत्री (४५)—अत्र तृजन्तस्य "चितः" इति सूत्रेणान्तोदात्तत्वे प्राप्ते "उदात्तयणो हल्पूर्वात्" इति सूत्रेणोदात्तत्वे 'नेत्री' इति ।

सेत्पृश्निः सुभ्वे (३०)—अत्र क्विन्तत्वेन कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तत्वेऽन्तोदात्तभूतस्य सुभूशब्दस्य चतुर्थ्येकवचने "ओः सुपि" इति यणादेशे "उदात्तयणो हल्पूर्वात्" इति सूत्रेणोदात्तत्वे प्राप्ते "नोङ्धात्वोः" इति तन्निषेधे "सुभ्वे इति ।

अक्षण्वन्तः (४४) —अक्षिशब्दान् मतुपि "अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः" इति "छन्दस्यपि दृश्यते" इत्यनङि ङकारस्येत्संज्ञायां लोपे च "अनो नुट्" इत्यस्यासिद्धत्वात् पूर्वं नलोपे ततो भूतपूर्वगत्या मतुपो नुटि उटावितौ "मादुपधायाश्च मतोर्वोऽयवादिभ्यः" इति मकारस्य वत्वे णत्वं "ह्रस्वनुड्भ्यां मतुप्" इति सूत्रेण नुटः परस्य मतुपः उदात्तत्वे 'अक्षण्वन्तः' इति ।

स्वरविधौ व्यञ्जनमविद्यमानवदित्येतदत्र नेष्यते (४५)—ननु 'मरुत्वान्' इत्यत्र "स्वरविधौ व्यञ्जनमविद्यमानवत्" इति परिभाषया तकारस्याविद्यमानवत्वेन ह्रस्वान्तात्परत्वस्य मतुपि सत्वेन 'ह्रस्वनुड्भ्यां मतुप्' इति स्वरापत्तिः स्यात् इत्यत आह–"स्वरविधौ व्यञ्जनमविद्यमानवत्" इत्येतदत्र नेष्यते ।

अयं भावः "नोत्तरपदेऽनुदात्तादावपृथिवीरुद्रपूषमन्थिषु" इति सूत्रे पृथिव्यादिपर्युदासो व्यर्थः । उदात्तत्वादेरज्धर्मतया पकारस्यैवादौ सत्त्वेनाऽनुदात्तादित्वा-

भावादिति तत्सामर्थ्येन स्वरविधाविति परिभाषा कल्प्यते, ततश्च पकारस्याविद्यमानत्वेनानुदात्तादित्वसत्वात् "देवता द्वन्द्वे च" इति प्राप्तप्रकृतिस्वरस्य निषेधप्राप्तौ पर्युदासः सार्थकः। एवञ्च ज्ञापकसाजात्यात् स्वरत्वव्याप्यधर्मावच्छिन्नोद्देश्यताके विधावेव स्वरविधावित्यस्य प्रवृत्त्या प्रकृते "ह्रस्वनुड्भ्यां मतुप्" इत्यस्य स्वरत्वव्याप्यधर्मावच्छिन्नोद्देश्यताकत्वाऽभावात् परिभाषाया अप्रवृत्तौ 'मरुत्वान्' इत्यत्र न स्वर इति।

न च इषुमानित्यत्र "ह्रस्वनुड्भ्याम् मतुप्" इत्यस्याऽप्रवृत्तयेऽन्तोदात्तादित्यनुवृत्तेरावश्यकतया अस्यापि स्वरत्वव्याप्यधर्मावच्छिन्नविषयतायाः प्रतिबन्धकं व्यञ्जनं न भवतीत्यर्थस्वीकारेणान्तोदात्तत्वबुद्धेः प्रतिबन्धासम्भवेऽपि ह्रस्वान्तत्वबुद्धेः प्रतिबन्धात् ह्रस्वनुड्भ्यामित्यस्याप्रवृत्तेः। अतएव नुड्ग्रहणं चरितार्थम्। अन्यथा ह्रस्वान्तत्वादेव सिद्धे तद् व्यर्थं स्यादित्यलम्।

नामान्यतरस्याम् (४२)—इति सूत्रस्वरूपम्। मतुपि यो ह्रस्वस्तदन्तादन्तोदात्तात्परो नामुदात्तो वा स्यात् इत्यर्थः।

चेनन्ती सुमतीनाम (५२)—सुष्ठुमतिर्यस्येति सुमतिशब्दो बहुव्रीहिः सुमतिशब्दस्य षष्ठीबहुवचने सुमतीनामत्र "नञ्सुभ्याम्" इति सूत्रेणान्तोदात्तत्वे "नामन्यतरस्याम्" इति सूत्रेण विकल्पेन नामुदात्तो जातः। तेन पक्षेऽनुदात्तस्य स्वरितत्वम्।

त्रिभिष्ट्वं देव (५२)—अत्र "षट्त्रिचतुर्भ्यो हलादिः" इति सूत्रेण त्रिशब्दात्परस्य हलादिविभक्तेरुदात्तत्वे भिसः उदात्तत्वं सिद्ध्यति। अत्र सूत्रे "अन्तोदात्तात्" इत्यस्यानुवृत्तिः। नास्ति अनुवृत्तौ पञ्चानां नवानां चतुर्णाम् इत्यत्र न स्यात् "त्रः सङ्ख्यायाः" इत्याद्युदात्तत्वात्। सप्तानामष्टानाम् इत्यत्र च स्यात्। अत्र च सप्तनाष्टन्शब्दौ घृतादित्वादेव "घृतादीनाञ्च" इत्यन्तोदात्ताविति दिक्।

क्व नूनम् (५१)—अत्र "किमोत्" इत्यति अनुबन्धलोपे तित्प्रत्ययस्यान्तः-स्वरितः स्यादित्यर्थकेने "तित्स्वरितम्" इति सूत्रेणान्तस्य स्वरितत्वे "क्वाति" इति सूत्रेण किमः क्वादेशे 'क्व नूनम्' इति।

तास्यनुदात्तेत् (४६) – "तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमह्न्विङोः" इति सूत्रस्वरूपम्। तास्यादीनां समाहारद्वन्द्वः। उपदेशग्रहणं सम्भवव्यभिचाराभ्यां ङिदद्भ्यां सम्बध्यते, नतु तास्यनुदात्तेद्भ्याम्। ङिदिति

-कर्मधारयः। उपदिश्यते इति उपदेशः। तस्याकारेण ङिता च विशेषणात्तदन्तविधिः। तथा च सूत्रार्थः—तासेरनुदात्तेतो ङिदन्तोपदेशादकारान्तोपदेशाच्च परं लसार्वधातुकमनुदात्तं स्यात् ह्निङौ वर्जयित्वा।

उदाहरणानि—तासि-कर्ता, कर्तारौ, कर्तारः। अनुदात्तेत्-य आस्ते। ङितः—अभिचष्टे अनृतेभिः। अदुपदेशात्-पुरुभुजा चनस्यतम्, वर्धमानं स्वे दमे। प्रत्युदाहरणानि-तास्यादिभ्यः किम्—अभिवृधे गृणीतः। उपदेशग्रहणात् नेह-'हतो वृत्राण्यार्या, लग्रहणं किम्-कतीह निघ्नानाः। सार्वधातुके किम्-शिश्ये, अह्निङोः किम्-ब्रूते। यदधीते।

य आस्ते (४१)—अत्र "तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमह्न्विङो" इति सूत्रेण लसार्वधातुके अनुदात्ते 'य आस्ते' इति।

इन्धे राजा (२७)—अत्र "तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमह्न्विङोः" इति सूत्रेणानुदात्तत्वे प्राप्ते "विन्दीन्धिखिदिभ्यो नेति वक्तव्यम्" इत्यनेन तन्निषेधे 'इन्धे राजा' इति।

यासिष्ट वर्तिरश्विनौ (४९ — या प्रापणे लुङ् थसस्तम् च्लौ सिचं प्रबाध्य यमरमनमाताम् इति इट्सकौ बहुलं छन्दस्यमाङ्योगेऽपि इत्यडभावः। "आदिः सिचोऽन्यतरस्याम्" इति सूत्रेणाद्युदात्तत्वे 'यासिष्ट वर्तिरश्विनौ' इति। पक्षे चिताः इति मध्योदात्तम्।

लुलविथ (४६)—लूञः लिटि थलि द्वित्वेऽभ्यासकार्ये इटि गुणेऽवादेशे "थलि च सेटीडन्तो वा" इति सूत्रेण चत्वारोऽपि पर्यायेणोदात्ताः भवन्ति।

अदाहवनीये (३६)-बाहुलकादधिकरणे प्रीणनार्थात् कर्मणि वा अनीयर् प्रत्यये ततो गतिसमासे कृदुत्तरपदप्रकृतिस्वरे "उपोत्तमं रिति" इति सूत्रेणोपात्तमस्योदात्तत्वे 'आ हवनीये' इति

एते प्रत्ययनिमित्तकस्वरत्वेन प्रत्ययस्वराः उच्यन्ते।

इति प्रत्ययस्वराः।

अथ समासस्वरः ।

यज्ञश्रियम् । यज्ञस्य श्रीः इति षष्ठीतत्पुरुषे श्रीशब्दे 'समासस्य' इत्यनेन उदात्तत्वे कृते आन्तरतम्यात् इयडुदात्तः ।

तुल्यश्वेतः । तुलया समितं 'नौवयोधर्म०' इति यति 'यतोऽनावः' इत्याद्युदात्तस्तुल्यशब्दः समासस्येति अन्तोदात्तत्वे प्राप्ते 'तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाप्रकृत्या' इति प्रकृतिभावे सिद्धम् ।

शस्त्रीश्यामा (२६)—शस्त्री इव श्यामा इति विग्रहे "उपमानानि सामान्यवचनैः" इति समासे "समासस्य" इति सूत्रेण अन्तोदात्ते प्राप्ते तम्प्रबाध्य "तत्पुरुषे" तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः" इति सूत्रेण पूर्वपदप्रकृतिस्वरत्वे 'शस्त्रीश्यामा' इति । अत्र शस्त्रीशब्दः गौरादिङीषन्तोदात्तः ।

मुहूर्तसुखम् (४६) मुहुर्त 'सुखमिति समासे' "कालाध्वनोरत्यन्तसंयोगे च" इति द्वितीया मुहूर्तशब्दः पृषोदरादित्वादन्तोदात्तः । "तत्पुरुषे तुल्यार्थतृतोयासप्तम्युपमानाव्ययद्वितीयाकृत्याः" इति सूत्रेण पूर्वपदप्रकृतिस्वरत्वम् ।

कृष्णसारङ्गः (४७)—कृष्धातोः, कृष्णे वर्णे इति नक्प्रत्ययान्तः कृष्णशब्दः । अत्र "वर्णो वर्णेष्वनेते" इति सूत्रेण पूर्वपदप्रकृतिस्वरे 'कृष्णसारङ्गः' इति । "कृष्णस्यामृगाख्याचेत्" इत्यन्तोदात्तो वेदे । भाषायां तु "वर्णानां तणतिनितान्तानाम्" इत्याद्युदात्तो भवति ।

अरित्रंगाधम् (४८)—अरित्रं नौकाष्ठं तस्य गाधं स्पृश्यमानतलम् अरित्रगाधम् तत्प्रमाणम् इत्यर्थः । गाध्यते इति गाधः 'गाधृ' प्रतिष्ठायाम् "कर्मणि घञ्" अर्धर्चादित्वात् क्लीवत्वम् । "अर्तिलूधूसूखनसहचर इत्रः" इति सूत्रेण इत्रप्रत्ययः । इत्रान्तोऽरित्रशब्दो मध्योदात्तः प्रत्ययस्वरेण, षष्ठीसमासे "समासस्य" इत्यन्तोदात्ते प्राप्ते "गाधलवणयोः प्रमाणे" इति पूर्वपदप्रकृतिस्वरत्वे 'अरित्रगाधम्' इति ।

गोलंवणम् (३३)—गम्धातोः "गमेर्डोः" इति सूत्रेण डोप्रत्ययेऽनुबन्धलोपे डित्वाट्टिलोपे षष्ठीसमासे "समासस्य" इति सूत्रेणान्तोदात्ते प्राप्ते तम्प्रबाध्य

"गाधलवणोः प्रमाणे" इति सूत्रेण पूर्वपदप्रकृतिस्वरे जाते 'गोलवणम्' इति। यावद् गवे दीयते तावदिति प्रमाणसूचकम्।

गमनचिरम् (४४)—गम्धातोर्ल्युटि अनादेशे गमनम्। तस्य 'लित्स्वरः' विशेषणसमासश्च। ततः "समासस्य" इत्यन्तोदात्तत्वे प्राप्ते "प्रतिबन्धि चिर-कृच्छ्रयोः" इति सूत्रेण पूर्वपदप्रकृतिस्वरत्वे 'गमनचिरम्' इति। गमनं करणविकलतया चिरकालभावि कृच्छ्रयोगि च प्रतिबन्धि जायते।

ननु विशेषणसमासः सामानाधिकरण्ये भवति, न चेह तदस्ति गमनशब्दस्य गतिवाचित्वाच्चिरशब्दस्य कालवाचित्वात् इति चेन्न, चिरकालवाचिनि गमनेऽत्र चिरशब्द वर्तते, गमनमत्र विशेष्यं तद्विशेषणे तु चिरकृच्छ्रे तत्र विशेष्यस्य पूर्व-निपातार्थं मयूरव्यंसकादित्वम्।

उच्चारपदेन प्रस्थितः (४०)—उच्चारो घञन्तस्तेन "थाथघञ्क्ताज-वित्रकाणाम्" इति सूत्रेणान्तोदात्तः। उच्चारस्य पदमिति षष्ठीतत्पुरुषसमासे "समासस्य" इति सूत्रेणान्तोदात्ते प्राप्ते "पदेऽपदेशे" इति सूत्रेण पूर्वपदप्रकृतिस्वरे 'उच्चारपदेन प्रस्थितः' इति। उच्चारः पुरीषक्रिया, तस्य पदेन अप्रक्षालितपदेन, प्रस्थितः गतः इत्यर्थः।

रज्जुशारदम् (५४)—सृजेः "सृजेरसुम् च" इति उः। स च नित् धातोर-सुमागमः सलोपश्च। तत्र सृजेरन्त्यादचः परेऽसुमि सलोपयणादेशेऽसुमः ऋकारस्य श्चुत्वे जश्त्वे च रज्जुरिति। तत्र प्रत्ययस्य नित्वात् "ञ्नित्यादिर्नित्यम्" इति सूत्रेण आद्युदात्तो भवति। अत्र समासे "समासस्य" इति सूत्रेण अन्तोदात्ते प्राप्ते तम्प्रबाध्य "शारदेनार्तवे" इति सूत्रेण पूर्वपदप्रकृतिस्वरत्वे 'रज्जुशारदम्' इति।

पितृसदृशः (४२)—पितृशब्दः तृजन्तः चित्स्वरेणान्तोदात्तः। पित्रा सदृश इत्यत्र समासे "समासस्य" इत्यन्तोदात्ते प्राप्ते तम्प्रबाध्य सादृश्यवाचिनि तत्पुरुषे पूर्वपदं प्रकृत्या एतयोरुत्तरपदयोरित्यर्थकेन "सदृशप्रतिरूपयोः सादृश्ये" इति सूत्रेण पूर्वपदप्रकृतिस्वरे 'पितृसदृशः' इति।

नन्वत्र "पूर्वसदृशसमोनार्थ" इति तृतीयासमासे कृते 'तत्पुरुषे तुल्यार्थ'—इत्येव सिद्धम्। न च तुल्यार्थयोगे षष्ठ्या अपि विहितत्वेन षष्ठीसमासार्थमिदमिति वाच्यम्। तत्रानभिधानात् षष्ठीसमासो नेत्यस्य सुवचत्वादिति चेन् मैवम्। अलुक्स-

मासानुरोधेन षष्ठीसमासस्वीकारस्यावश्यकत्वात् ।

मात्रोपज्ञोपक्रमच्छाये नपुंसके (३६)—मात्रादिषु परतो नपुंसकवाचिनि तत्पुरुषे पूर्वपदं प्रकृतिस्वरं स्यादित्यर्थः । यथा—भिक्षामात्रम् । पाणिन्युपज्ञम् । नन्दोपक्रमम् । इषुच्छायम् ।

पाणिन्युपज्ञम् (४५)—उपज्ञायते इत्युपज्ञा । अत्र "आतश्चोपसर्गे" इति सूत्रेण कर्मण्यङ् । पाणिनिशब्दः इञन्तत्वादाद्युदात्तः। तस्य उपज्ञा इति षष्ठीतत्पुरुषसमासे "उपज्ञोपक्रमम्" इत्यादिना नपुंसकत्वे "समासस्य" इत्यन्तोदात्ते प्राप्ते तम्प्रबाध्य "मात्रोपज्ञोपक्रमच्छाये नपुंसके" इति सूत्रेण पूर्वपदप्रकृतिस्वरत्वे "पाणिन्युपज्ञम्" इति सिद्धम् ।

छात्रप्रियोऽनध्यायः (४६)—गुरूणां दोषावरणं छत्रम् । "छत्रादिभ्यो णः" इति विहितणप्रत्ययान्तः छात्रशब्दः प्रत्ययस्वरेणान्तोदात्तः । तथा च समासे "समासस्य" इति सूत्रेणान्तोदात्ते प्राप्ते "प्रास्तौ च" इति सूत्रेण पूर्वपदप्रकृतिस्वरत्वे 'छात्रप्रियोऽनध्यायः' इति ।

गोस्वामी (५१)—गवां स्वामी इति विग्रहे। षष्ठीसमासे "समासस्य" इति सूत्रेण अन्तोदात्तत्वे प्राप्ते "स्वं स्वामिनि" इति सूत्रेण पूर्वपदप्रकृतिस्वरे 'गोस्वामी' इति ।

भूपतिः (३०)—भुवः पतिः इति विग्रहे समासे "समासस्य" इति सूत्रेणान्तोदात्ते "पत्यावैश्वर्ये" इति सूत्रेण प्रकृतिस्वरे प्राप्ते "न भूवाक्चिद्दिधिषु" इति तन्निषेधे 'भूपतिः' इति ।

भुवनपतिः (५२)—भुवनस्य पतिरिति विग्रहे षष्ठीतत्पुरुषसमासे "समासस्य" इत्यन्तोदात्ते "पत्यावैश्वर्ये" इति प्रकृतिस्वरे प्राप्ते "वा भुवनम्" इति विकल्पेन तन्निषेधे 'भुवनपतिः' इति । पक्षे पूर्वपदप्रकृतिस्वरत्वम् ।

गमनाबाधम् (४३)—आङ्पूर्वकलोडनार्थकल्वकारेत्संज्ञकबाधधातोः कर्मणि घञ् "ञ्नित्यादिर्नित्यम्" इति सूत्रेणाद्युदात्ते गमनशब्दो लित्स्वरेणाद्युदात्तः । गमनमाबाध्यते निकटतरमिति विशेषणसमासे मयूरव्यंसकादित्वात् वा समासे "समासस्य" इति सूत्रेणान्तोदात्ते प्राप्ते "आशङ्काबाधनेदीयस्सु सम्भावने" इति सूत्रेण पूर्वपदप्रकृतिस्वरत्वे 'गमनाबाधम्' इति ।

ग नेनेदीयः (४१)—अतिशयेनान्तिकं नेदीयः अन्तिकशब्दादतिशयेऽर्थे ईयसुनि प्रत्यये "अन्तिकबाढयोः" इत्यादिसूत्रेण नेदादेशे मयूरव्यंसकादित्वात् समासे "समासस्य" इति सूत्रेणान्तोदात्ते प्राप्ते "आशङ्काबाधनेदीयस्सु सम्भावने" इति सूत्रेण पूर्वपदप्रकृतिस्वरे 'गमननेदीयः' इति।

मद्रसविधम (४७)—मद्रस्य सविधम् इत्यत्र षष्ठीसमासे "समासस्य" इति सूत्रेणान्तोदात्ते प्राप्ते तम्प्रबाध्य सामीप्यार्थेषु सविधादिपूत्तरपदेषु पूर्वपदं प्रकृत्या स्यात्तत्पुरुषे इत्यर्थकेन "सविधसनीडसमर्यादसवेशसदेशेषु सामीप्ये" इति सूत्रेण पूर्वपदप्रकृतिस्वरे 'मद्रसविधम्' इति।

मद्रसवेशम् (३७)—मद्रस्य सवेशम् इति विग्रहे षष्ठीसमासे "समासस्य" इति सूत्रेणान्तोदात्ते प्राप्ते तम्प्रबाध्य सामीप्यार्थेषु सविधादिपूत्तरपदेषु पूर्वपदं प्रकृत्या स्यात् तत्पुरुषे इत्यर्थकेन "सविधसमर्यादसमर्यादसवेशसदेशेषु सामीप्ये" इति सूत्रेण पूर्वपदप्रकृतिस्वरे 'मद्रसंवेशम्' इति।

गमंज्येष्ठम् (४०)—गमनेन ज्येष्ठमिति समासे मयूरव्यंसकादित्वात् राजदन्तादित्वात् वा विशेषणस्य ज्येष्ठ इत्यस्य परनिपाते "समासस्य" इति सूत्रेणान्तोदात्ते प्राप्ते "अज्यावमकन्पापवत्सु भावे कर्मधारये" इति सूत्रेण पूर्वपदप्रकृतिस्वरे 'गमनज्येष्ठम्' इति।

कुमारश्रमणा (५१)—कुमारी श्रमणा इति विग्रहे "प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्" इति परिभाषया "कुमारः श्रमणादिभिः" इति सूत्रेण कुमारीशब्दस्य समासे पुंवद्भावे "समासस्य" इति सूत्रेणान्तोदात्ते प्राप्ते "कुमारश्च" इति सूत्रेण पूर्वपदकृतिस्वरे। कुमारशब्दात् पचाद्यच्विधानेन कुमारशब्दस्य "चितः" इत्यन्तोदात्ते "कुमारश्रमणा" इति।

कुमारप्रत्येनाः (४६)—प्रतिगतमेनोऽस्य प्रत्येनाः। कुमारश्चासौ प्रत्येनाः इति विग्रहे कर्मधारयसमासः। तत्र कुमारशब्दस्य अन्तोदात्ते प्राप्ते "आदिः प्रत्येनसि" इति सूत्रेण कुमारशब्दस्य आद्युदात्तत्वे 'कुमारप्रत्येनाः' इति।

पञ्चारत्निः (४५)-पञ्चारत्नयः प्रमाणमस्य पञ्चारत्निः। अत्र तद्धितार्थे द्विगुसमासे "प्रमाणे लो द्विगोर्नित्यम्" इति मात्रचो लुकि "समासस्य" इत्यन्तोदात्ते प्राप्ते

"इगन्तकालकपालभगालशरावेषु द्विगौ" इति सूत्रेण पूर्वपदप्रकृतिस्वरे 'पञ्चारत्नि' इति । अत्र पञ्चन् शब्द आद्युदात्तः ।

पञ्चदिष्टिः (३२)—पञ्च दिष्टिः प्रमाणमस्येति विग्रहे "समासस्य" इति सूत्रेण नित्यमन्तोदात्तत्वे प्राप्ते "दिष्टिवितस्त्योश्च" इति सूत्रेण वैकल्पिकपूर्वपद-प्रकृतिस्वरे "पञ्चदिष्टिः" इति । पक्षेऽन्तोदात्ते 'पञ्चदिष्टिः' इति रूपद्वयम् सिद्ध्यति ।

साङ्काश्यसिद्धः (३३)—सङ्काशशब्दात् "वुञ् छण्" इत्यादिसूत्रेण ण्यप्रत्ययेऽन्तोदात्तेऽनुबन्धलोपे आद्यचो वृद्धौ अकारस्य लोपे च ततः सङ्काश्ये सिद्धः इति विग्रहे समासे "समासस्य" इति सूत्रेणान्तोदात्ते प्राप्ते तम्प्रबाध्य "सप्तमी-सिद्धशुष्कपक्वबन्धेष्वकालात्" इति सूत्रेण पूर्वपदप्रकृतिस्वरे पूर्वपदन्त्वन्तोदात्तम् । 'साङ्काश्यसिद्धः' इति ।

भ्राष्ट्रपक्वः (३५)—ष्ट्रन्नन्तभ्राष्ट्रशब्दः नित्वादाद्युदात्तः । भ्राष्ट्रे पक्वः इति विग्रहे समासे "समासस्य" इत्यन्तोदात्ते प्राप्ते तत्प्रबाध्य "सप्तमी सिद्धशुष्कपक्वबन्धेष्वकालात्" इति सूत्रेण पूर्वपदप्रकृतिस्वरे 'भ्राष्ट्रपक्वः' इति ।

श्वाफल्कचैत्रकाः (४६)—श्वाफल्काश्च चैत्रकाश्चेति द्वन्द्वसमासे 'श्वफल्क-चैत्रकाभ्यामण्" इत्यणि णित्वादाद्यचो वृद्धावाद्युदात्तत्वे "समासस्य" इत्यन्तोदात्ते प्राप्ते तम्प्रबाध्य "राजन्यबहुवचनद्वन्द्वेऽन्धकवृष्णिषु" इति सूत्रेण पूर्वपदप्रकृतिस्वरे जाते 'श्वाफल्कचैत्रकाः' इति ।

द्वादश (५१)—द्वौ च दश च इति विग्रहे द्वन्द्वसमासे "द्व्यष्टनः संख्यायां" इति सूत्रेणात्वे द्वादश इत्यत्र "समासस्य" इत्यन्तोदात्तत्वे प्राप्ते तम्प्रबाध्य "सङ्ख्या" इति सूत्रेण पूर्वपदप्रकृतिस्वरे 'द्वादश' ईति ।

पाणिनीयरौढीयाः (४५)—पाणिनेः रौढेश्च छात्राः इति पाणिनीया रौढीयाः, पाणिनीयाश्च रौढीयाश्च इति पाणिनीयरौढीयाः । अत्र "वृद्धाच्छः" इति सूत्रेण छप्रत्यये "आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्" इति सूत्रेण छस्येया-देशे इकारस्य लोपे छस्वरेण मध्योदात्तयोः पाणिनीयाश्च रौढीयाश्चेति द्वन्द्वसमासे "समासस्य" इति सूत्रेणान्तोदात्ते प्राप्ते तम्प्रबाध्य "आचार्योपसर्जनश्चान्ते-वासिनि" इति सूत्रेण पूर्वपदप्रकृतिस्वरे 'पाणिनीयरौढीया' इति । अत्र रौढिशब्दात् "इञश्च" इत्यण्न "न द्व्यचः प्राच्यभरतेषु इति तन्निषेधात् ।

महान् व्रीहि०—(४६) "महान् व्रीह्यपराह्लगृष्टीष्वासजाबालभारभारतहैलिहिलरौरवप्रवृद्धेषु" इति सूत्रस्वरूपम्। महच्छब्दः प्रकृत्या व्रीह्यादिषु दशसु परेषु इत्यर्थः।

महाव्रीहिः (३१)—महांश्चासौ व्रीहिरिति विग्रहे समासे समासत्वात् प्रातिपदिकत्वे सुपो लुकि "आन्महतः समानाधिकरणजातीययोः" इति सूत्रेणात्वे "समासस्य" इति सूत्रेणान्तोदात्ते प्राप्ते तम्प्रबाध्य "महान् व्रीह्यपराह्लगृष्टीष्वासजाबालभारभारतहैलिहिलरौरवप्रवृद्धेषु" इति सूत्रेण व्रीहिपरे महच्छब्दस्य प्रकृतिभाव 'महाव्रीहिः' इति।

महावैश्वदेवम् (५०)—अत्र "वर्तमाने पृषन्महत्०" इत्यत्र निपातनात् महच्छब्दोन्तोदात्तः ततश्च समासे "आन्महतः" इत्यात्वे "समासस्य" इत्यन्तोदात्ते प्राप्ते तम्प्रबाध्य "क्षुल्लकश्च वैश्वदेवे" इति सत्रेण पूर्वपदप्रकृतिस्वरे "महावैश्वदेवम्" इति।

कुरुगार्हपत० (४९)—"कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्लीलदृढरूपपारेवडवातैतिलकद्रूः पण्यकम्बलो दासीभाराणाञ्च" इति सूत्रस्वरूपम्। एषां सप्तानां समासानां दासीभारादेश्च पूर्वपदं प्रकृत्या स्यात् इति सूत्रार्थः।

रिक्तगुरुः (४२)—रिक्तो गुरुः इति विग्रहे कर्मधारयसमासे "रिक्ते विभाषा" इति सूत्रेण रिक्तशब्दः आद्युदात्तः। ततश्च समासानन्तरं "समासस्य" इति सूत्रेणान्तोदात्ते प्राप्ते "कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्लीलदृढरूपापारेवडवातैतिलकद्रूःपण्यकम्बलो दासीभाराणाञ्च" इति सूत्रेण पूर्वपदप्रकृतिस्वरे 'रिक्तगुरुः' इति।

पारेवडवा (४४)—पारे वडवा इति विग्रहे निपातनादिवार्थे समासे विभक्त्यलोपे च पारशब्दः घृतादित्वादन्तोदात्तः। समासानन्तरं "समासस्य" इति सूत्रेणान्तोदात्ते प्राप्ते तम्प्रबाध्य "गुरुगार्हपत" इत्यादि सूत्रेण पूर्वपदप्रकृतिस्वरे 'पारेवडवा' इति।

पण्यकम्बलः (२७)—पण्यशब्दः "अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु" इति सूत्रेण यदन्तः निपातितः। "यतोऽनावः" इति सूत्रेणाद्युदात्तत्वे पण्यश्चासो कम्बलः इति समासे "समासस्य" इति सूत्रेणान्तोदात्ते प्राप्ते

त्तम्प्रवाध्य "कुरुगार्हपतरिक्तगुर्वसूतजरत्यलीलदृढरूपापारेवडवातैतिलकद्रूःपण्य-कम्बलो दासीभाराणाञ्च" इति सूत्रेण पूर्वपदप्रकृतिस्वरे 'पुण्यकम्बलः' इति।

यूपदारु (४५)—यूपाय दारु इति विग्रहे समासे "समासस्य" इति सूत्रेणान्तोदात्ते प्राप्ते "चतुर्थी तदर्थे" इति सूत्रेण चतुर्थ्यन्तपूर्वपदस्य पूर्वपद-प्रकृतिस्वरे 'यूपदारु' इति। अत्र निदिति दीर्घश्चेत्यनुवर्तमाने "कुयुभ्यां च" इति सूत्रेण यू शब्दात् पप्रत्यये दीर्घे च निष्पन्नयूपशब्दः नित्वादाद्युदात्तः।

गोहितम् (२९)—गवे हितम् इति विग्रहे समासे "समासस्य" इति सूत्रेणान्तोदात्ते प्राप्ते तम्प्रवाध्य "क्ते च" इति सूत्रेण पूर्वपदप्रकृतिस्वरे 'गोहितम्' इति।

श्रेणिकृताः—श्रिञ् धातोरौणादिके निन् प्रत्यये श्रेण्यादयः कृतादिभिः इति कर्मधारयसमासे नित्वात् श्रेणिशब्द आद्युदात्तः। "समासस्य" इत्यन्तोदात्तत्वे प्राप्ते तम्प्रवाध्य "कर्मधारयेऽनिष्ठा" इति सूत्रेण पूर्वपदप्रकृतिस्वरे 'श्रेणिकृताः' इति।

त्वोतासः (२८, ४१)—त्वया ऊताः = रक्षिता त्वोतासः। मपर्यन्तस्य "प्रत्ययोत्तरपदयोश्च" इति त्वादेशे छान्दसत्वाद् दकाराकारलोपे ऊता इति अवतेः क्ते "ज्वरत्वर" इत्यादिनोठि "एत्येधत्यूठ्सु" इति सूत्रेण छान्दसत्वाद् वृद्धेरि-डागमस्य चाभावे जसि "आज्जसेरसुक्" इत्यसुगि "तृतीया कर्मणि" इति सूत्रेण पूर्वपदप्रकृतिस्वरे "एकादेश उदात्तेनोदात्तः" सूत्रेण उदात्तत्वे ततः स्वरितप्रचये जाते 'त्वोतासः' इति।

रुद्रहतः (३८)—रुद्रेण हतः इति विग्रहे समासे "समासस्य" इत्यन्तोदात्ते प्राप्ते "तृतीया कर्मणि" इति पूर्वपदप्रकृतिस्वरे 'रुद्रहतः' इति। अत्र रुद्रशब्दः रगन्तत्वेनान्तोदात्तः।

गतिरन्तरः (५१)—कर्मार्थे क्तान्ते परेऽव्यवहितो गतिः प्रकृत्या स्यादित्यर्थः। यथा—पुरोहितम्।

पुरोहितम् (५१)—"पूर्वाधरावराणामसि पुरधवश्चैषाम्" इत्यसिप्रत्य-यान्तः प्रत्ययस्वरेणान्तोदात्तः पुरस् शब्दः। हितशब्दोपि धाञोनिष्ठायां "दधातेर्हिः" इति सूत्रेण ह्यादेशे प्रत्ययस्वरेणान्तोदात्तः। "पुरोऽव्ययम्" इति गतिसंज्ञायां "कुगतिप्रादयः" इति समासे समासान्तोदात्ते "तत्पुरुषे तुल्यार्थ" इत्यव्ययपूर्वपद-

प्रकृतिस्वरे, कृत्स्वरे, थाथादिस्वरे च पूर्वपूर्वोपमर्देन प्राप्ते "गतिरनन्तरः" इति पूर्वपदप्रकृतिस्वरे कृते सिद्धम् ।

अत्रानन्तरग्रहणफलम् (४०)—ननु गतिरनन्तर इति सूत्रे अनन्तरग्रहणाभावेऽपि सकलेष्टसिद्धावनन्तरग्रहणं किमर्थमिति चेन्न । इह च हृतशब्दस्य उच्छब्देन समासे पुरोहितमित्यत्रेव गतिस्वरेणाद्युदात्त उद्धृतशब्दः तस्य पुनरभिशब्देन समासः । तस्य "कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्" इति परिभाषया क्तान्तः उद्धृतशब्दः उत्तरपदम् । एवं समासान्तोदात्तत्वे प्राप्ते तद्बाधकाव्ययपूर्वपदप्रकृतिस्वरे तदपवादे कृत्स्वरे तदपवादस्थाथादिस्वरः प्राप्तस्तं प्रबाध्य प्रकृतिस्वरः स्यात् सोऽनन्तरग्रहणेन वार्यते ।

नन्वनन्तरग्रहणेनाप्यसौ दुर्वारः कृद्ग्रहणपरिभाषयोद्धृतशब्दस्य क्तान्तत्वेऽभेस्तदानन्तर्यसत्वादिति चेन्मैवम् । अनन्तरग्रहणसामर्थ्याद्धि धातोरनन्तरा गतिराश्रीयते अभिश्च न तथा ।

नन्वेवं मा भूदभेः स्वरः इष्टसिद्धिस्तु कथम् ? अभ्युद्धृतशब्दे हि उच्छब्दस्यस्वरः इष्यते "संसृष्टं धनमुभयं समाकृतम्" इति मन्त्रे समाकृतशब्दे आङः स्वरदर्शनात् । न चासौ प्रकृतसूत्रेण सिद्ध्यति, प्रथमसमासे तत्प्रवृत्तावपि द्वितीयसमासे थाथादिस्वरस्य प्राप्तेन च तं बाधित्वा गतिस्वरः प्रवर्तत इति वाच्यम् द्वितीयसमासे उदः पूर्वपदत्वाभावात् । अत्रोच्यते धातोरनन्तर इति व्याख्यानादेव पूर्वपदत्वं विनापि स्वरोऽयं प्रवर्तते । नहि क्तप्रकृतिभूतं धातुम्प्रति पूवपदत्वं गतेः सम्भवति तस्मादभ्युद्धृतं, समासकृतम् इति सिद्धम् ।

दूराद़ागतः (३०)—अत्र थ, अथ, घञ, क्त, अच्, अप्, इत्र, क, एतदन्तानां गतिकारकोपपदात् परेषामन्त उदात्तः स्यादित्यर्थकेन "थाथघञ्क्ताजवित्रकाणाम्" इति सूत्रेणान्तोदात्तं दूरादागतः इति ।

तवै चान्तश्च युगपत् (३८)—तवैप्रत्ययान्तस्यान्त उदात्तो गतिश्चानन्तरः प्रकृत्या युगपच्चैतदुभयं स्यादित्यर्थः । यथा—अन्वे तवा उ ।

अन्वेतवा उ (४८) — अत्र "तवै चान्तश्च युगपत्" इति सूत्रेण तवैप्रत्ययान्तस्यान्त उदात्तः गतिश्चानन्तरः प्रकृत्या युगपच्चैतदुभयम् जातम् । "उपसर्गाश्चाभिवर्जम्" इति सूत्रेण "अनु" राद्युदात्तः ।

द्विसुवर्णधनम् (४०)—द्वे सुवर्णे परिमाणमस्येति द्विसुवर्णं तदेव धनं द्विसुवर्णधनमत्र समासानन्तरं "समासस्य" इति सूत्रेणान्तोदात्ते प्राप्ते 'हिरण्य-परिमाणं धने" इति सूत्रेण वैकल्पिकपूर्वपदप्रकृतिस्वरे 'द्विसुवर्णधनम् इति । पक्षे समासस्वरेऽन्तोदात्ते 'द्विसुवर्णधनम्' इति ।

प्रथमवैयाकरणः (४५)—अत्र प्रथेरमजन्तः प्रथमशब्दः तेन समासे 'समासस्य" इत्यन्तोदात्ते प्राप्ते "प्रथमोऽचिरोपसम्पत्तौ" इति सूत्रेण प्रथमशब्दस्य विभाषया प्रकृतिभावे 'प्रथमवैयाकरणः' इति । सम्प्रति व्याकरणमध्येतुं प्रवृत्त इति तदर्थः । यत्र वैयाकरणानां मुख्यो यः स प्रथमवैयाकरणः इत्यर्थः । तत्र 'प्रथमवै ाकरणशब्दः नित्यमन्तोदात्त एवेति ।

आर्यकुमारः (२९)—आर्यश्चासौ कुमार इति विग्रहे कर्मधारयसमासे सुपो लुकि "समासस्य" इति सूत्रेणान्तोदात्ते प्राप्ते तम्प्रबाध्य "आर्यो ब्राह्मण-कुमारयोः" इति सूत्रेण पूर्वपदस्य आर्यशब्दस्य वैकल्पिकप्रकृतिभावे आर्यशब्दस्य ण्यदन्तत्वादन्तस्वरिते 'आर्यकुमारः' इति ।

आर्यब्राह्मणः (३८)—ण्यदन्तत्वात् आर्यशब्दः "तित्स्वरितम्" इति सूत्रेणान्तस्वरितः । आर्यश्चासौ ब्राह्मणः इति कर्मधारयसमासे "समासस्य" इति सूत्रेणान्तोदात्ते प्राप्ते "आर्यो ब्राह्मणकुमारयोः" इति सूत्रेण प्रकृतिस्वरे 'आर्य-ब्राह्मणः' पक्षे आर्यब्राह्मणः इति ।

राजब्राह्मणः (५२)—राजन्शब्दः कनिन्प्रत्ययान्तत्वादाद्युदात्तः तस्य ब्राह्मणशब्देन कर्मधारयसमासे "समासस्य" इति सूत्रेणान्तोदात्ते प्राप्ते "राजा च" इति प्रकृतिभावे 'राजब्राह्मणः' इति ।

राजप्रत्येनाः (५०)—अत्र प्रतिगतमेनः पापं यस्य सः प्रत्येनाः राज्ञः प्रत्येनाः इति विग्रहे समासे "समासस्य" इति सूत्रेणान्तोदात्ते प्राप्ते "षष्ठी प्रत्येनसि" इति सूत्रेण पूर्वपदप्रकृतिस्वरे 'राजप्रत्येनाः' इति ।

ग्रामनापितः (४६)—अत्र ग्रामस्य नापितः इति विग्रहे षष्ठीसमासे "समासस्य" इति सूत्रेणान्तोदात्ते प्राप्ते "ग्रामः शिल्पिनि" इति सूत्रेण विभाषया पूर्वपदप्रकृतिस्वरे 'ग्रामनापितः' इति ।

वैयाकरणहस्ती (४४)—अत्र वैयाकरणाय हस्ती इति विग्रहे समासे हारिण्यर्थे "सप्तमीहारिणौ धर्म्येऽहरणे" इति सूत्रेणाद्युदात्तः।

गवाध्यक्षः (४७)—गवाम् अध्यक्ष इति विग्रहे समासे "समासस्य" इति सूत्रेणान्तोदात्ते प्राप्ते तम्प्रबाध्य "विभाषाध्यक्षे" इति सत्रेण पूर्वपदमाद्युदात्तम्।

गोत्रान्तेवासिमाणव० (३६)—"गोत्रान्तेवासिमाणवब्राह्मणेषु क्षेपे" इति सूत्रस्वरूपम्। गोत्रवाचिनि, अन्तेवासिवाचिनि चोत्तरपदे माणव ब्राह्मणयोश्च क्षेपवाचिनि समासे पूर्वपदमाद्युदात्तं स्यात् इत्यर्थः। यथा—भार्यासौश्रुतः। कुमारीदाक्षाः। ओदनपाणिनीयाः। भिक्षामाणवः। भयब्राह्मणः।

भार्यासौश्रुतः (३६)—सुष्ठु शृणोति इति सुश्रुत् तस्यापत्यं सौश्रुतः। भार्याप्रधानः सौश्रुतः इति विग्रहे शाकपार्थिवादित्वादुत्तरपदलोपिसमासे "गोत्राऽन्तेवासिमाणवब्राह्मणेषु क्षेपे" इति सूत्रेण पूर्वपदस्याद्युदात्तत्वे 'भार्यासौश्रुत' इति। अत्र भार्याप्रधानत्वं क्षेपः।

दन्तलेखकः (४३) लिखधातोः "ण्वुल्तृचौ" इति ण्वुल्प्रत्ययेऽकादेशे दन्तलेखनेन जीविका अस्य इत्यर्थे "नित्यं क्रीडेति" समासे "समासस्य" इत्यन्तोदात्ते प्राप्ते "अके जीविकार्थे" इति सूत्रेण पूर्वपदस्याद्युदात्तत्वे 'दन्तलेखकः' इति।

उद्दालकपुष्पभञ्जिका (४५)—उद्दालकस्य च पुष्पभञ्जिका इति विग्रहे "नित्यं क्रीडे"ति समासे "समासस्य" इति सूत्रेणान्तोदात्ते प्राप्ते तम्प्रबाध्य प्राग्देशवाचिनां या क्रीडा तद्वाचिनि समासे अकप्रत्ययान्ते परे पूर्वमाद्युदात्तं स्यादित्यर्थकेन "प्राचां क्रीडायाम्" इति सूत्रेणाद्युदात्तत्वे "उद्दालकपुष्पभञ्जिका' इति।

तन्तुवायः (३३)—तन्तून् वयति इत्यर्थे 'वे' धातोः "ह्वावामश्च" इत्यणि आत्वे अनुबन्धलोपे 'आतो युक् चिण् कृतोः' इति युगागमेऽनुबन्धलोपे समासे "शिल्पिनि चाकृञः" इति सूत्रेणाद्युदात्तत्वे 'तन्तुवायः' इति।

गोपालः (३२)—गाः पालयतीत्यर्थे गोपालः इत्यत्र "गोतन्तियवं पाले" इति सूत्रेण पालशब्दे परे आद्युदात्तत्वे 'गोपालः' इति।

उपमाने शब्दार्थप्रकृतावेवेत्यत्र शब्दार्थप्रकृतौ पदस्य प्रयोजनम्। ननु उपमाने शब्दार्थप्रकृतावेवेति सूत्रं किमर्थमिति चेदुच्यते वञ्चुप्रलोभने धातोः णिनि प्रत्यये वृकवञ्ची इत्यत्र कृत्स्वर एव भवति। यदि सूत्रं न स्यादत्रापि स्यात्।

उपमानं शब्दार्थप्रकृतावेवात्रप्रकृतिग्रहणप्रयोजनम् (४४)—"उपमानं शब्दार्थप्रकृतावेव" इति सूत्रेऽसति प्रकृतिग्रहणे शब्दार्थात् परो यो णिनिस्तदन्ते उत्तरपदे आद्युदात्तं स्यात् इत्यर्थो विज्ञायेत तथा च यत्रापि धातूपसर्गसमुदायाच्छब्दार्थात् परो णिनिस्तत्रापि स्यात्। "कृद्ग्रहणे गतिकारकपूर्वपदस्यापि ग्रहणम्" इति परिभाषया णिन्नन्तोत्तरपदत्वाऽनपायात्। प्रकृतिग्रहणे तु न भवति। योऽत्र धातुर्नासौ शब्दार्थः यश्च शब्दार्थो धातूपसर्गसमुदायो न ततो णिनिर्विहितः इत्यभिप्रेत्य कौमुद्यां प्रकृतिरेव यत्रोपसर्गनिरपेक्षाः शब्दार्था तत्रैव यथा स्यात् इह मा भूत्—गर्दभोच्चारीति।

उष्ट्रक्रोशी (३८) उष्ट्र इव क्रोशति इत्यर्थे कर्तर्युपमाने इति णिनिः "उपमानं शब्दार्थप्रकृतावेव" इति सूत्रेण क्रोशीति णिन्यन्ते उत्तरपदे परे उपमानवाचिनः पूर्वपदस्योष्ट्र इत्यस्याद्युदात्तत्वे 'उष्ट्रक्रोशी' इति।

युक्तरोही (२९)—अत्र "समासस्य" इति सूत्रेणान्तोदात्ते प्राप्ते तम्प्रबाध्य "युक्तारोह्यादयश्च" इति सूत्रेणाद्युदात्ते 'युक्तरोही' इति।

मल्लग्रामः—मल्लानां ग्राम इति विग्रहे समासे समासत्वात् प्रातिपदिकत्वे सुपो लुकि "समासस्य" इति सूत्रेणान्तोदात्ते प्राप्ते तम्प्रबाध्य "ग्रामेऽनिवसन्तः" इति सूत्रेण ग्रामे परे पूर्वपदस्योदात्तत्वे 'मल्लग्रामः' इति।

ब्रह्मनगरम् (३६)—ब्रह्मणो नगरमिति विग्रहे समासे समासस्य इति अन्तोदात्तत्वं प्रबाध्य "अमहन्नवं नगरेऽनुदीचाम्" इति सूत्रेण नगरे परे पूर्वस्याद्युदात्ते 'ब्रह्मनगरम्' इति।

अधिकार्मम् (४२)—अत्र 'अर्मे चाऽवर्णं द्व्यच् त्र्यच्' इति सूत्रेण आद्युदात्ते प्राप्ते "न भूताधिकसञ्जीवमद्राश्मकज्जलम्" इति निषेधे 'समासस्य' इत्यन्तोदात्ते 'अधिकार्मम् इति।

गुडोदकम् (४७)—गुडमिश्रमुदकम् अत्र "उदकेऽकेवले" इति सूत्रेण पूर्वपदस्यान्तोदात्ते स्वरे कृते "स्वरितो वाऽनुदात्ते पदादौ" इति विभाषया स्वरिते 'गुडोदकम्' इति।

स्त्रीसभम् (३३)—स्त्रीणां सभेति विग्रहे समासे अन्तोदात्तं प्रबाध्य "सभायां नपुंसके" इति सूत्रेण पूर्वपदस्यान्तोदात्तत्वे 'स्त्रीसभम् इति।

नान्दीपुरम् (५२)—नान्द्याः पुरमिति विग्रहे समासे "पुरे प्राचाम्" इति सूत्रेण पूर्वपदस्यान्तोदात्तत्वे 'नान्दीपुरम्' इति ।

फलकपुरम् (३०)—फलकस्य पुरमिति विग्रहे "पुरे प्राचाम्" इति पुरे परेऽन्तोदात्तत्वे प्राप्ते "न हास्तिनफलकमार्देयाः" इति सूत्रेणान्तोदात्तत्वे 'फलकपुरम्' इति ।

अपरकृष्णमृत्तिका (४६)—अत्र "दिक्सङ्ख्ये संज्ञायाम्" इति सूत्रेण समासे 'समासस्य' इत्यन्तोदात्ते प्राप्ते तम्प्रबाध्य दिक्शब्दाः पूर्वपदानि अन्तोदात्तानि स्युर्ग्रामादिषूत्तरेषु इत्यर्थकेन "दिक्शब्दा ग्रामजनपदाख्यानचानराटेषु" इति सूत्रेण पूर्वपदस्य दिकशब्दवाचकस्यान्तोदात्ते 'अपरकृष्णमृत्तिका' इति ।

आचार्योपसर्जनश्चान्तेवासिनि (३७)—आचार्योपसर्जनान्तेवासिनि परे दिक्छब्दाः अन्तोदात्ताः भवन्ति इत्यर्थः । यथा—पूर्वपाणिनीयाः ।

उत्तरपदवृद्धौ सर्वं च (२७)– उत्तरपदस्येत्यधिकृत्य या वृद्धिर्विहिता तद्वत्युत्तरपदे परे सर्वशब्दश्चान्तोदात्तो भवति । यथा 'सर्वपाञ्चालकः । अपरपाञ्चालकः इति । अत्र उत्तरपदस्याधिकृत्य इत्यर्थकरणेन 'सर्वभासः 'सर्वकारकः' इत्यत्र नास्य प्रवृत्तिः अन्यथा उत्तरपदस्य वृद्धत्वादस्य प्रवृत्तिः स्यादेव ।

सर्वपाञ्चालकः (४१)—अत्र पूर्वकालैक इति समासे अवृद्धादपि बहुवचनविषयादिति वुञि अकादेशे दिशोऽमद्राणाम् इति उत्तरपदवृद्धौ "उत्तरपदवृद्धौ सर्वं च" इति सूत्रेण सर्वशब्दस्यान्तोदात्तत्वे "सर्वपाञ्चालकः' इति ।

विश्वकर्मा (३७)—विशेः क्विन् नित्वादाद्युदात्ते ततश्च बहुव्रीहिसमासे संज्ञात्वात् "बहुव्रीहौ विश्वं संज्ञायाम्" इति सूत्रेण पूर्वपदभूतस्य विश्वशब्दस्यान्तोदात्तत्वे 'विश्वकर्मा इति ।

विश्वेदेवाः (३४)—अत्र "समासस्य" इति सूत्रेण प्राप्तमन्तोदात्तम्बाधित्वा पूर्वपदप्रकृतिस्वरेण प्राप्तस्याद्युदात्तस्यापवादभूतेन "बहुव्रीहौ विश्वं संज्ञायाम्" इति सूत्रेण पूर्वपदभूतस्य विश्वशब्दस्यान्तोदात्ते 'विश्वदेवाः' इति ।

अविश्वदेवं सत्पतिम् (४२)—अत्र "समासस्य" इति सूत्रेण प्राप्तमन्तोदात्तम्बाधित्वा पूर्वपदप्रकृतिस्वरेण प्राप्तस्याद्युदात्तस्यापवादभूतेन "बहुव्रीहौ

विश्वं संज्ञायाम्" इति सूत्रेण पूर्वपदभूतस्य विश्वशब्दस्यान्तोदात्तत्वे 'अविश्वदेवं सत्पतिम्' इति ।

वृकोदरः (४४)—वृकस्येवोदरमस्येति विग्रहे समासे पूर्वपदप्रकृतिस्वरं बाधित्वा "उदाराश्वेषुषु" इति सूत्रेण पूर्वपदस्यान्तोदात्तत्वे 'वृकोदरः' इति ।

अनुदरः । न विद्यते उदरं यस्य स इति विग्रहे बहुव्रीहिसमासे 'क्षेपे' इति पूर्वपदस्यान्तोदात्तत्वे प्राप्ते 'नञ्सुभ्याम्' इति उत्तरपदान्तोदात्तत्वे च प्राप्ते । ततः घटोदरः इत्यत्र 'क्षेपे' सूत्रस्य सावकाशत्वात्, अयशाः, सुयशाः इत्यादौ 'नञ्सुभ्याम्' इत्यस्य च सावकाशत्वात् अनुदरः इत्यत्र द्वयोः प्राप्तौ तुल्यबलत्वेन विप्रतिषेधात् 'नञ्सुभ्याम्' इत्यनेन उत्तरपदान्तोदात्तत्वे सिद्धम् ।

प्रधौतपादः (४२)—प्रपूर्वकधाव्धातोः निष्ठाक्तप्रत्ययेऽनुबन्धलोपे "च्छ्वोः शूडनुनासिके च" इति सूत्रेणोठि "एत्येधत्यूठ्सु" इति सूत्रेण वृद्धौ प्रधौतशब्दस्य गतिस्वरेणाद्युदात्तत्वे 'प्रधौतपादः' इत्यत्र "निष्ठोपसर्गपूर्वमन्यतरस्याम्' इति सूत्रेण निष्ठान्तपूर्वपदस्यान्तोदात्तत्वे 'प्रधौतपादः' इति । अन्तोदात्तत्वाभावपक्षे 'प्रधौतपादः' इति ।

मत्स्यचूर्णम् (२७)—मत्स्यस्य चूर्णमिति विग्रहे षष्ठीसमासे "चूर्णादीन्यप्राणिषष्ठ्याः" इति सूत्रेऽप्राणिषष्ठ्याः इत्युक्तत्वात् नात्र षष्ठ्यन्तात्परस्य चूर्णस्याद्युदात्तत्वम् । "समासस्य च" इति सूत्रेणान्तोदात्ते 'मत्स्यचूर्णम्' इति ।

काण्ठपृष्ठः (२८)—कण्ठादीन्युत्तरपदानि संज्ञौपम्ययोराद्युदात्तानि स्युर्बहुव्रीहौ इत्यर्थकेन कण्ठपृष्ठग्रीवाजङ्घंच" इति सूत्रेणाद्युदात्ते 'काण्ठपृष्ठः' इति ।

सुग्रीवः (३२)—शोभना ग्रीवा यस्येति विग्रहे ग्रीवा संज्ञायाम् "कण्ठपृष्ठग्रीवाजङ्घञ्च" इति सूत्रेण उत्तरपदस्याद्युदात्तत्वे 'सुग्रीवः' इति ।

साम्राज्याय सुक्रतुः (५०)—सुष्ठु क्रतुः यस्येति विग्रहे समासे "क्रत्वादयश्च" इति सूत्रेण सोः परे आद्युदात्ते 'साम्राज्याय सुक्रतुः' इति ।

सुवीरेण (३०)—अत्र "वीरवीर्यौ च" इत्यनेन सूत्रेणाद्युदात्ते 'सुवीरेण' इति ।

उपकूलम् (३५)—कूलस्य समीपमिति विग्रहे अव्ययीभावसमासे "कूलतीरतूलमूलशालाऽक्षसममव्ययीभावे" इति सूत्रेणाद्युदात्तत्वे 'उपकूलम्' इति ।

उपशालम् (३६)—शालायाः समीप अव्ययीभावसमासे "कूलतीरतूलमूलशालाक्षसममव्ययीभावे" इति सूत्रेणोत्तरपदस्यायुदात्तत्वे उपशालम्' इति ।

ब्राह्मणशालम् । ब्राह्मणस्य शाला इति विग्रहे समासे 'विभाषा सेनासुराच्छायाशालानिशानाम्' इति नपुंसकत्वे ह्रस्वे प्रातिपदिककार्ये ब्राह्मणशालमित्यत्र तत्पुरुषेशालास्यामिति उत्तरपदस्यादेरुदात्तत्वे । ब्राह्मणशालम् इति ।

प्रजाकाण्डम् (४१)—प्रजासु काण्डमिवेति विग्रहे उपमितं व्याघ्रादिभिरिति समासे "समासस्य" इति सूत्रेणान्तोदात्ते प्राप्ते तम्प्रबाध्य "चेलखेटकटुककाण्डं गर्हायाम्" इति सूत्रेण काण्डस्याद्युदात्तत्वे 'प्रजाकाण्डम्' इति ।

दाण्डायनस्थलम् (२६)—दाण्डायनस्य स्थलमिति विग्रहे समासे "कूल सूदस्थलकर्षाः संज्ञायाम्" इति सूत्रेणाद्युदात्ते 'दाण्डायनस्थलम्' इति । अत्र लिङ्गविशिष्टपरिभाषया स्थली शब्दोऽपि गृह्यते ।

शितिपादः (४०)—शितिरिति 'वर्णानां तणतिनितान्तानाम्" इति सूत्रेणाद्युदात्तः पादशब्दश्च वृषादित्वात् "वृषादीनां च" इति सूत्रेणाद्युदात्तोऽत्र समासे "समासस्य" इति सूत्रेणान्तोदात्ते प्राप्ते तम्प्रबाध्य "शितेर्नित्याऽबह्वज्बहुव्रीहावभसत्" इति सूत्रेण शितेः परस्य नित्यावह्वचः उत्तरपदस्य प्रकृतिस्वरे 'शितिपादः' इति ।

उच्चैः कारम् (५२)—अत्र "गतिकारकोपपदात् कृत्" इति सूत्रेण "समासस्य" इति प्राप्तम्बाधित्वा प्रकृतिस्वरे 'उच्चैः कारम्' इति भवति ।

"गतिकारकोपपदात् कृत्" अत्र कृद्ग्रहणफलम् (५१) – ननु क्रियायोगे गतिसंज्ञाविधानात् क्रियानिरूपितस्यैव कारकत्वात् धात्वधिकारे सप्तमीनिर्दिष्टस्यैव उपपदसंज्ञाविधानाच्च क्रियावाचकधातोराक्षेपे तिङन्तयोगे समासाभावेन परिशेषात् कृदन्तयोगे एव समाससत्त्वेन स्वरप्रवृत्या कृद्ग्रहणं व्यर्थम् ।

न च 'सह सुपा' इत्यत्र सहेति योगविभागेन. कतिपयतिङन्तोत्तरपदस्य अनुव्यचलत् इत्यादेः समासस्य सत्वेन तत्र 'गतिकारकोपपदात् कृत्' इति स्वराप्रवृत्तये कृद्ग्रहणमिति वाच्यम्, प्रतिपदोक्तपरिभाषया गतित्वनिबन्धनसमासे एव गतिकारकेत्यस्य प्रवृत्या 'अनुव्यचलत्' इत्यत्र प्राप्त्यभावेन तदर्थं कृद्ग्रहणस्यानावश्यकत्वात् । न च निर्गतः कौशाम्ब्याः निष्कौशाम्बिरित्यत्र स्वरव्यावृत्तये कृद्ग्रहण-

मिति वाच्यम् 'यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसंज्ञाः' इति योगग्रहण-लभ्येन नियमेन निरो गतित्वाभावेन गतिसमासाभावात् स्वराप्रवृत्तौ दोषाभावात्। न च कौशाम्बीशब्दम्प्रति क्रियायोगः कारकञ्च क्रियायामेव सम्भवति। उपपदमपि धात्वधिकारे सप्तमीनिर्दिष्टं प्रत्ययनिमित्तमुच्यते। तदेवं गत्यादिभिरपि क्रिया-वाच्युत्तरपदमाक्षिप्यते, धातोश्च क्रियावाचित्वम् तस्माच्च द्वये प्रत्ययाः तिङः कृतश्च, तत्र तिङन्तेन समासाभावात् कृदन्तमेव सम्भवति। तस्मान्नार्थः कृद्ग्रहणेनेत्यत आह—"कृद्ग्रहणं विस्पष्टार्थम् इति" य एवं प्रतिवक्तुमसमर्थस्तं प्रति विस्पष्टार्थं क्रियते इत्यर्थः।

ननु विस्पष्टार्थमपि क्रियमाणे कृद्ग्रहणे आमन्तेन समासे प्रपचतितरामिति कृदन्तत्वाभावेन समासस्वरं बाधित्वाऽव्ययस्वर एव स्यादत आह—'प्रपचतित-रामित्यादि' इत्येके इत्यस्य कृद्ग्रहणं विस्पष्टार्थम्। आमन्ते च दोषाभाव इति केचिदाचार्या व्याचक्षते इति। प्रपचतिदेश्यार्थं त्विति। आदिशब्देन 'प्रपचति-कल्पम्' 'प्रपचतिदेशीयः' 'प्रपचतिरूपम' इत्येतेषां त्रयाणां ग्रहणम्। प्रपचतिदेश्यादौ अर्थः प्रयोजनं यस्य तत् यथोक्तम्। अयमभिप्रायः न विस्पष्टार्थं कृद्ग्रहणम्। अपि तु प्रपचतिदेश्यादौ यत्र सति शिष्टं स्वरान्तरं नास्ति तत्रापि स्वरो माभूदव्यय-पूर्वपदप्रकृतिस्वर एव यथा स्यादित्येवं तत् प्रयोजनमिति वदन्ति।

अत्र हरदत्तः—इदं तु वक्तव्यम्। प्रपचतितरामित्यादौ तरबन्तेन समासे पश्चा-दाम् भवन् प्रत्ययग्रहणपरिभाषया पचतितरस्यैव घान्तत्वात्तत एव स्यात्। तत्र को दोषः सोपसर्गस्य घान्तस्यैकपद्याभावादाम्। प्रपंचतितरां देवदत्तेत्यादावाम एकान्त-रमामन्त्रितमनन्तिके इत्येष विधिर्न स्यात् शेषनिघातश्च प्रशब्दस्य न स्याद्भिन्न-पदत्वात्। तस्मात् प्रशब्दस्यामन्तेन समासोऽङ्गीकर्तव्यो न तरबन्तेन। समास-त्वात् समुदायस्य प्रातिपदिकत्वे विभक्तावैकपद्यं भवति, स्वरे तु दोषप्रसङ्गात् कृद्ग्रहणमपि त्यक्तव्यमिति भाष्ये स्थितम्। एवं स्थिते प्रपचतिदेश्यादौ स्वरसिद्धये कृद्ग्रहणमावश्यकमिति दिक्।

उभे वनस्पत्यादिषु युगपत् (३४)—एषु पूर्वोत्तरपदे युगपत् प्रकृत्या स्यातां इत्यर्थः। यथा—वनस्पतिं वन आ। बृहस्पतिं यः।

शचीपतिम (२८)—अत्र षष्ठीसमासे "समासस्य" इत्यन्तोदात्ते प्राप्ते तम्प्रबाध्य "उभे वनस्पत्यादिषु युगपत्" इति सूत्रेण पूर्वोत्तरपदयोः युगपत् प्रकृतिभावेन तेन पतिरित्यत्र प्रत्ययस्वरेणाद्युदात्तो शचीत्यत्र शार्ङ्गरवादित्वात् ङीनि नित्त्वादाद्युदात्तत्वे 'शचीपतिम्' इति ।

आप इन्द्रावरुणौ (४९)—अत्र द्वन्द्वसमासे "देवता द्वन्द्वे च" इति सूत्रेणान्तोदात्ते प्राप्ते तम्प्रबाध्य "देवताद्वन्द्वे च" इति सूत्रेण युगपद् प्रकृतिभावे तेन "ऋजेन्द्राग्र" इति निष्पन्नः रनन्त इन्द्रशब्द "कृवृदारिभ्य उनन्" इति निष्पन्नः वरुणशब्दश्च उभौ आद्युदात्तौ ।

आवसथः (३८)—आङुपसर्गपूर्वकवस्धातोः "उपसर्गे वसेः" इति सूत्रेणाथ प्रत्यये "थाऽथघञ्क्ताजबित्रकाणाम्" इति सूत्रेणान्तोदात्ते 'आवसथः' इति।

प्रक्षयः (४१) प्रोपपदात् क्षि धातोः। "एरच्" इति सूत्रेणाच्प्रत्यये गुणेऽयादेशे प्रातिपदिकत्वे सौ रुत्वे विसर्गे प्रक्षयः। अत्र "थाऽथघञ्क्ताजवित्रकाणाम्" इति सूत्रेणान्तोदात्ते 'प्रक्षयः' इति ।

न च क्षयशब्दस्याच्प्रत्ययान्तत्वात् कृदुत्तरपदप्रकृतिस्वरेणैवान्तोदात्तत्वं सिद्धम् इति वाच्यम् । "क्षयो निवासे" इति क्षयशब्दस्याद्युदात्तत्वात् ।

कारकाद्दत्तश्रुतयोरेवाशिषि—ननु 'संज्ञायामनाचितादीनाम्' इत्यनेन कारकात् परयोर्दत्तश्रुतयोदन्तोदात्तत्वे सिद्धे कारकादित्यादिसूत्रं व्यर्थं सत् नियमार्थं यत् 'कारकात्क्तान्तस्यान्त उदात्त आशिषि संज्ञायां चेद्दत्तश्रुतयोरेव'। एवं च 'देवा एनं देयासुः' देवदत्तः इति प्रार्थितर्देवैर्दत्तः' इति विग्रहः, एवं विष्णुरेनं श्रूयात् इति विष्णुश्रुतः इति विग्रहे आशिषि लिङ्लोटौ' इति लिङ, उदाहरणे 'क्तिच्क्तौ च संज्ञायाम्' इति आशिषि क्तः सिद्धयति ।

न च सूत्रे एवकरणं किमर्थमिति वाच्यम् विपरीतनियमकारणार्थत्वात् । अन्यथा आशिषि संज्ञायां दत्तश्रुतयोरन्त उदात्तश्चेत्तर्हि कारकादेवेति विपरीतनियमापत्तौ संश्रुत इत्यादौ अन्तोदात्तत्वानापत्तेः ! तदुक्तं मूले-कारकावधारणं यथा स्यात् दत्तश्रुतावधारणं माभूत्' इति ।

सुप्तप्रलपितम्—अत्र सुप्तेन प्रलपितमिति विग्रहे समासे । "इत्थं भूतेन कृतमिति च" इति सूत्रेण क्तान्तस्योत्तरपदस्य (प्रलपितस्य) अन्तोदात्तत्वे

'सुप्तप्रलपितम्' इति। अत्र करोतिः क्रियासामान्येनाभूतप्रादुर्भावे एव। तेन प्रलपिताद्यपि कृतं भवति।

प्रमत्तगीतम् (४१)—अत्र "इत्थं भूतेन कृतमिति च" इति सूत्रेण क्तान्तस्योत्तरपदस्य (गीतस्य) अन्तोदात्तत्वं जायते।

अध्ययनपुण्यम् (४२) अध्ययने पुण्यमिति विग्रहे-'सुप्सुपा' इति सप्तमी-योगविभागाद् वा समासे "सप्तम्याः पुण्यम्" इति सूत्रेण सप्तम्यन्तात्परस्य पुण्यम् इत्युत्तरपदस्यात्तोदात्तत्वे 'अध्ययनपुण्यम्' इति।

माषोनम् (४३) माषेणोनमिति विग्रहे तृतीयातत्पुरुषसमासे "ऊनार्थकलहं तृतीयायाः" इति सूत्रेण तृतीयान्तात् परस्योनशब्दस्यान्तोदात्तत्वे माषोनम् इति।

तिलमिश्राः (४४) तिलेन मिश्रा इति विग्रहे तृतीयान्तात्परमनुपसर्गं मिश्रमन्तोदात्तं स्यादसन्धौ इत्यर्थकेन मिश्रं "चानुपसर्गमसन्धौ" इति सूत्रेणान्तो-दात्तत्वे 'तिलमिश्राः' इति।

अकार्णवेष्टकिकम् (३०)—'कर्णवेष्टकाभ्यां सम्पादि कार्णवेष्टकिकम् न कार्णवेष्टकिकमकार्णवेष्टकिकम्' इत्यत्र "सम्पादिनि" इति सूत्रेण ठञ् प्रत्ययेऽनुबन्ध-लोपे तद्धितान्तत्वात् प्रातिपदिकत्वे "सुपो धातुप्रातिपदिकयोः" इति सूत्रेण सुपो लुकि "ठस्येकः" इति ठस्येकादेशे "तद्धितेष्वचामादेः" इति सूत्रेणाचचौ वृद्धौ कार्णवेष्टकिकशब्दः निष्पन्नः तस्य नञ्समासे "नञो गुणप्रतिषेधे सम्पाद्यर्हहितालमर्थास्तद्धिताः" इति सूत्रेणान्तोदात्ते "अकार्णवेष्टकिकम्' इति।

अतीक्ष्णम् (२६)—न तीक्ष्णमिति विग्रहे। "विभाषा तृन्नन्नतीक्ष्ण-शुचिषु" इति सूत्रेण वैकल्पिकान्तोदात्तत्वे 'अतीक्ष्णम् इति समासे। पक्षे अव्यय-स्वरः इति।

तत्पञ्चमः (४१)—सः पञ्चमः एषा इति विग्रहे समासे "बहुव्रीहाविद-मेतत्तद्भ्यः प्रथमपूरणयोः क्रियागणने" इति सूत्रेण तच्छब्दात् परस्योत्तरपद-स्यान्तः उदात्तः।

देवमित्रः (४१) देवो मित्रं यस्येति विग्रहे समासे। मित्राजिनयोरुत्तर-पदयोरन्तः-उदात्तः स्यात् बहुव्रीहौ संज्ञायामित्यर्थकेन "संज्ञायां मित्राजिनयोः' इति सूत्रेणान्तोदात्ते 'देवमित्रः' इति।

कृष्णाजिनम् (४०)—कृष्णम् अजिनं यस्येति विग्रहे समासे मित्राजिनयो-रुत्तरपदयोरन्त उदात्तः स्यादित्यर्थकेन "संज्ञायां मित्राजिनयोः" इति सूत्रेणान्तोदात्ते 'कृष्णाजिनम्' इति ।

वस्त्रान्तरः (२८)—व्यवधानवाचकात् परमन्तरमन्तोदात्तमित्यर्थकेन "व्यवायिनोऽन्तरम्" इति सूत्रेणान्तोदात्तोऽस्मादेवज्ञापकात् अन्तरशब्दस्य परनिपाते 'वस्त्रान्तरः' इति ।

गौरमुखः (४७) गौरं मुखं यस्यासौ गौरमुखः इत्यत्र समासे "मुखं स्वाङ्गम्" इति सूत्रेण मुखमित्युत्तरपदस्यान्तोदात्ते 'गौरमुखः' इति ।

प्रक्षालितमुखः (४१) प्रक्षालितं मुखं यस्येति विग्रहे समासे । "निष्ठोप-मानादन्यतरस्याम्" इति सूत्रेण वैकल्पिकान्तोदात्तत्वे 'प्रक्षालितमुखः इति । पक्षे निष्ठोपसर्ग इति पूर्वपदान्तोदात्तत्वम् ।

दन्तजातः (५१)—अत्र दन्तः जातः अस्य इति विग्रहः तन प्रत्ययान्तो दन्तशब्दः, समासे "वा जाते" इति सूत्रेण विभाषया जातशब्दस्योदात्ते जाते 'दन्तजातः' इति। पक्षे पूर्वपदप्रकृतिस्वरः तत्र दन्तशब्दस्य 'स्वाङ्गशिटामदन्तानाम्" इति सूत्रेणाद्युदात्तत्वम् ।

बहुव्रीहिकः (३०)—अत्र बहुशब्दस्य "फिषोन्त उदात्तः" इति सूत्रेणा-न्तोदात्ते "बहोर्नञ्वदुत्तरपदभूम्नि" इति सूत्रेण नञः परस्योत्तरपदस्यैव स्वर-विधानेन 'नञ्सुभ्याम्' इति सूत्रेणोत्तरपदस्यान्तोदात्ते बहुव्रीहिक इति ।

तस्येदिमे प्रवणे (५०)—प्रकृष्टं वनमस्येति विग्रहे बहुव्रीहिसमासे तत्पुरुषे वा समासे "प्रमिरन्तः" इति णत्वे "समासस्य" इति बाधित्वा पूर्वपदप्रकृतिस्वरे प्राप्ते "वनं समासे" इति सूत्रेणोपसर्गादुत्तरपदस्य वनस्यान्तोदात्तत्वे 'तस्येदिमे 'तस्येदिमे प्रवणे' इति ।

अन्तर्वणो देशः (४३) अन्तः वनं यस्मिन् इति समासे "अन्तः इति सूत्रेण वनस्यान्तोदात्तत्वे "प्रनिरन्तः" इति णत्वे 'अन्तर्वणो देश इति ।

पर्यन्तः (३६) अन्तः शब्दः तत्र प्रत्ययान्तः परिगतः अन्त अस्येति विग्रहे समासे "अन्तश्च" इति सूत्रेणान्तोदात्तत्वम् ।

निरुपलम् (२९)—निर्गतः उपलः यस्मात् अथवा निर्गतः उपलः इति प्रादिसमासे सुपो लुकि निरुपलशब्दस्य "निरुदकादीनि च" इति सूत्रेणान्तोदात्ते 'निरुपलम्' इति ।

अनुज्येष्ठम् (२६)—अनुगतो ज्येष्ठमनुज्येष्ठस्तम् अनुज्येष्ठम् इत्यत्र समासे "अनोरप्रधानकनीयसी" इति सूत्रेणान्तोदात्तः ।

अनुपुरुषः (३३)—अन्वादिष्टः पुरुषः अनुपुरुषः इत्यत्र समासे 'पुरुषश्चान्वादिष्टः" इति सूत्रेणान्तोदात्ते 'अनुपुरुषः' इति ।

अत्यङ्कुशो नागः (४०)—अङ्कुशमतिक्रान्त इत्यत्यङ्कुशो नाग इति विग्रहे समासे समासप्रयुक्तकार्ये 'अत्यङ्कुशः' इत्यत्र अतेः परमकृदन्तं परशब्दश्चान्तोदात्तः स्यादित्यर्थकेन "अतेरकृत्पदे" इति सूत्रेणान्तोदात्ते 'अत्यङ्कुशो नागः' इति ।

प्रत्यंशुः (४६)—प्रतिगतः अंशुरिति 'प्रत्यंशुः' समासे "प्रतेरंश्वादयस्तत्पुरुषे" इति सूत्रेण 'अंशु' इत्यस्यान्तोदात्तत्वे 'प्रत्यंशुः' इति ।

प्रतिजनः (३०)—प्रतिग्रहः जनमिति विग्रहे समासे "प्रतेरंश्वादयस्तत्पुरुषे" इति सूत्रेणान्तोदात्ते 'प्रतिजनः' इति ।

उपाजिनम् (४१)—उपगतोऽजिनमिति प्रादिसमासे उपाद् द्व्यजजिनमगौराय इति सूत्रेणोपात् परस्याजिनस्यान्तोदात्तत्वे 'उपाजिनम्' इति ।

विभाषोत्पुच्छे (२७)—उच्छब्दात्परः पुच्छशब्दः अन्तोदात्तो वा स्यात् तत्पुरुषे इत्यर्थः । 'उत्क्रान्तः पुच्छादुत्पुच्छः' यदा तु पुच्छमुदस्यति उत्पुच्छयते "एरच्" उत्पुच्छस्तदा 'थाथादि' स्वरेण नित्यमन्तोदात्तो प्राप्ते विकल्पोयम् । सेयमुभयत्र विभाषा । तत्पुरुषग्रहणाभावे उदस्तं पुच्छं येन स 'उत्पुच्छः' इत्यत्र अन्तोदात्तत्वापत्तिः इति तत्पुरुषग्रहणमिति । अत्रतु बहुव्रीहिप्रकृतिस्वर एव भवति ।

त्रिपादूर्ध्वः (२८)—त्रयः पादाः यस्येति विग्रहे समासे "संख्यासुपूर्वस्य" इति सूत्रेण पादशब्दस्याकारस्य लोपे "द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ" इति सूत्रेणान्तोदात्ते 'त्रिपादूर्ध्वः' इति । त्रयः मूर्द्धानः अस्येति विग्रहे समासे ।

त्रिमूर्द्धानं सप्तरश्मिम् (४८)—अत्रापि "द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ" इति सूत्रेणान्तोदात्तो 'त्रिमूर्द्धानं सप्तरश्मिम्' इति। अत्र मूर्धशब्दः रन् प्रत्ययान्तः। तेनाद्युदात्तः।

द्वित्रिभ्यां पद्दन्मूर्धसु बहुव्रीहौ (३५)—अत्र सूत्रे 'मूर्धसु' इत्यकृत-समासान्त एव मूर्धन्शब्दः निर्दिष्टः तस्यैतत्प्रयोजनम् असत्यपि समासान्तेऽन्तोदात्तत्वं यथा स्यात्। एतदेव ज्ञापकमनित्यः समासान्तो भवतीति। यद्यकृतसमासान्तस्यो-पादानम्, तर्हि यदा समासान्तः क्रियते तदा न प्राप्नोति, कुतः शब्दान्तरत्वा-दितिचेन्न, बहुव्रीहिकार्यत्वात्, तदेकदेशत्वाच्च समासान्तेऽपि प्रवृत्तेः तस्य बहुव्रीहे-रेकदेशः समासान्तस्तस्य भावस्तस्मात्। तदेवं बहुव्रीहिकार्यत्वात्तदेकदेशत्वेनाश्रयणात् समासान्तस्येति यदा समासान्तः क्रियते तदापि विधिरयं भवत्येव।

चक्रसक्थः (४१)—चक्रं सक्थंयस्येति समासे बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् इति षच्, षजन्तः सक्थशब्दः। तेन समासान्तस्यषचश्चित्त्वान्नित्य-मेवान्तोदात्तत्वं भवति। "सक्थं चाक्रान्तात्" इति सूत्रे आक्रान्तग्रहणाभावेऽत्रापि सूत्रमिदं प्रवर्तेत तथा च चित्वान्नित्यमन्तोदात्तत्वं बाधेत यतः अत्र क्रान्तः सक्थ्यशब्दः।

परादिश्च परान्तश्च (४३)—

परादिश्च परान्तश्च पूर्वान्तिश्चापि दृश्यते।
पूर्वादयश्च दृश्यन्ते व्यत्ययो बहुलं यतः॥ १॥

इति श्लोकवार्तिकम्। एतस्योदाहरणानि—क्रमशः बोध्यानि—'तुविजाता उरुक्षया'। 'नि येन मुष्टिहत्यया'। 'यस्त्रिचक्रः'। 'विश्वायुर्धेहि'। वस्तुतः परादि-श्चेत्यस्योदाहरणं 'चोदयित्री सूनृतानाम्' इति।

परादिः—तुविजाता उरुक्षया। उरूणां क्षयो निवासः इति विग्रहः। 'क्षयो निवासे इति क्षयशब्दः आद्युदात्तः। 'समासस्य' इति अन्तोदात्तत्वे प्राप्ते तं प्रबाध्य कृदुत्तरप्रकृतिस्वरेणोत्तरपदाद्युदात्तत्वं प्राप्तं तस्यथाथादिस्वरेण बाधः। ततः 'परादिश्छन्दसि बहुलम्' इति बाहुलकेनोत्तरपदाद्युदात्तत्वम्। इदं तु माधवमतेन। यदा क्षिधातोः बाहुलकादधिकरणे एरच् इति अच् प्रत्ययान्तः

क्षमशब्दः। हरदत्तस्तु-घप्रत्ययान्तः क्षयशब्दः ततः थाथादिस्वराप्राप्त्या कृदुत्तरप्रकृतिस्वरेणैवेष्टसिद्धेः। तदा चोदयित्री सनृतानामित्युदाहरणम्। ऊनपरिहाणे चुरादिरदन्तो धातुः। ततः णिच् क्विप् सुतरामुनयति इति सन् प्रियं तच्च तद् ऋतं च इति सूनृतम्। अयस्मयादीनि इति मत्वात् पदत्वाभावेन न लोपो न। अत्र ऋतशब्दस्यादिरुदात्तः।

परान्तो यथा—नियेन मुष्टिहत्यया। मुष्ट्या हननं मुष्टिहत्या 'हनस्त च' इति क्यप् न लोपः तुक्। कृदुत्तरप्रकृतिस्वरे प्राप्ते तं प्रबाध्य 'परादिश्छन्दसि बहुलम्' इति परान्तस्य उदात्तत्वम्।

पूर्वान्तो यथा—यस्त्रिचक्रः। त्रीणि चक्राणि यस्येति समासे बहुव्रीहित्वात् पूर्वपदप्रकृतिस्वरः प्राप्तः। 'परादिश्छन्दसि बहुलम्' इति पूर्वान्तस्योदात्तत्वम्।

पूर्वादयो यथा—विश्वायुर्धेहि। विश्वमायुर्यस्मिन्निति बहुव्रीहिसमासे 'समासस्य' इत्यन्तोदात्ते प्राप्ते तं प्रबाध्य विश्वशब्दस्य क्वन् प्रत्ययान्तत्वेन पूर्वपदप्रकृतिस्वरेणाद्युदात्तः प्राप्तः 'परादिश्छन्दसि बहुलम्' ति पूर्वान्तः उदान्तः। वस्तुतस्तु-व्यत्ययो बहुलम् इत्यनेन सिद्धे 'परादिश्छन्दसि' इदं सूत्रं न कर्तव्यमिति दिक्।

इति समासस्वराः।

अथ तिङन्तस्वराः।

तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्ययोः (४२)—ननु किं कुत्सनाभीक्ष्ण्यग्रहणं गोत्रादीनां पाठविशेषणम्, एतयोरर्थयोर्गोत्रादीनि भवन्ति तानि च तिङः पराण्यनुदात्तानि भवन्ति, आहोस्विदनुदात्तविशेषणं तिङः पराणिगोत्रादीन्यनुदात्तानि भवन्त्येतयोरर्थयोरिति। इति संशये निर्णयमाह—'कुत्सनाभीक्ष्ण्यग्रहणं' पाठविशेषणम्। अयं चार्थो योगविभागाल्लभ्यते। "तिङो गोत्रादीनि" इत्येको योगोऽनुदात्तविधानार्थः। "कुत्सनाभीक्ष्ण्ययोः" इति द्वितीयो योगः। गोत्रादीनीत्येव।

परिभाषेयम्—इह शास्त्रे गोत्रादीनि कुत्सनाऽभीक्ष्ण्यविषयाण्येव ग्राह्याणि। तेनाचनचिदिवगोत्रादितद्धिताम्रेडितेष्वगतेरित्यत्र गोत्रादिग्रहणे कुत्सनादावेव कार्यं भवति।

अग्निमीळे (४७)—अग्निशब्दः "फिषोन्त उदात्तः" इति सूत्रेणाथवानि-प्रत्ययस्वरेणान्तोदात्तः, अम् सुप्त्वात् "अनुदात्तौ सुप्पितौ" इति सूत्रेणानुदात्तः "अमि पूर्वः" इति सूत्रकृतैकादेशः "एकादेश उदात्तेनोदात्तः" इत्यनेनोदात्तः 'ईळे' तु 'ईड' स्तुतौ लटि प्रथमपुरुषैकवचनम् प्रातिशाख्येन डस्य लत्वे "तिङ्ङतिङः" इति सूत्रेणातिङन्तादग्निशब्दात् परस्य ईळेशब्दस्य निघातः "उदात्तादनुदात्तस्य स्वरितः" इति ईकारस्य स्वरितत्वे 'अग्निमीळे' इति।

नच मकारेण व्यवधानम् इति वाच्यम् "स्वरविधौ व्यञ्जनमविद्यमानवत्" इति परिभाषणात्।

नह भोक्ष्यसे (४३)—"तिङ्ङतिङः" इति सूत्रेण निघातस्वरे अनुदात्ते, प्राप्ते "नह प्रत्यारम्भे" इति तन्निषेधे "तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुक-मनुदात्तमह्न्विङोः" इति सूत्रेण से इत्यस्य निघाते स्यप्रत्ययस्वरेण मध्योदात्तं पदं 'नह भोक्ष्यसे' इति प्रत्यारम्भः प्रतिषेधः।

सत्य भोक्ष्यसे (४४)—अत्र "तिङ्ङतिङः" इति सूत्रेण निघाते सर्वानु-दात्ते प्राप्ते "सत्यं प्रश्ने" इति सूत्रेण तन्निषेधे स्यप्रत्ययस्वरेण सत्यं भोक्ष्यसे' इति। मध्योदात्तम्।

आ हि ष्मा याति (४८)-अत्र ष्माप्रयोगे छान्दसत्वात् दीर्घे षत्वे तिङन्तत्वादनुदात्तस्य निषेधे 'आहिष्मा याति' इति। अत्र हिशब्दोवधारणे हेतौ स्मशब्दः निपातोऽपि यदित्वानुदात्तः।

आ हि रुहन्तम (४९)—अत्र रुहन्तमित्यत्र 'हि च' इति सूत्रेणानुदात्तस्य निषेधे 'आ हि रुहन्तम्' इति।

छन्दस्यनेकमपि साकाङ्क्षम् (३८)-हीत्यनेन युक्तं साकाङ्क्षमने-कमपि नानुदात्तं भवति। अनृतं हि मत्तो वदति पाप्माचैनं युनाति। इत्युदाहरणम् तिङन्तद्वयमप्येनिहन्यते।

यथा पचति शोभनम (२६)--अत्र तिङ्ङतिङः इति घाते प्राप्ते यावद् यथाभ्याम् इति तन्विघटे तस्य "पूजायां नानन्तरम्" इति सूत्रेण विवेचनानुदात्तत्वे सिद्धम् ।

यावत् प्रपचति शोभनम् (५०)--अत्र निघाते प्राप्ते तस्य यावद् यथाभ्याम् इति निषेधे तस्य 'पूजायां नानन्तरम्' इत्यस्योपरि "उपसर्गव्यपेतं च" इत्युक्तं तेनात्रापि अनुदात्तत्वे "पूजायां नानन्तरम्" इत्यनेनैव सिद्धे किमर्थमिदमिति वाच्यम् उपसर्गव्यवधानार्थमस्यावश्यकत्वात् ।

अहो कटं करिष्यति (२६)--अत्र अपूजाया "शेषे विभाषा" इति सूत्रेण वैकल्पिकानुदात्तो भवति । पक्षे प्रत्ययस्वरः । अपूजा शेषः ।

अधीष्व माणवक पुरा विद्योतते विद्युत् (२७)--अत्र प्रयोगे "तिङ्ङतिङः" इति सूत्रेण प्राप्तं विघातस्वरं वाधित्वा "पुरा च परीप्सायाम्" इति सूत्रेण वैकल्पिकानुदात्तत्वे "अधीष्व माणवक पुरा विद्योतते विद्युत्" इति। पक्षे द्योतते इति धातुस्वरेणाद्युदात्तत्वे 'तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमह्न्विङोः" इति लसार्वधातुकनिघाते 'अधीष्व माणवक पुरा विद्योतते विद्युत्' इति ।

किं क्रियाप्रश्नेऽनुपसर्गमप्रतिषिद्धम (३५)--क्रियाप्रश्ने वर्तमानेन शब्देन युक्तं तिङन्तं नानुदात्तं स्यादित्यर्थः । यथा--किं द्विजःपचत्याहोस्विद् गच्छति ।

किं द्विजः पचत्याहोस्विद्गच्छति (४८)--अत्र आहोस्विदेको निपात आद्युदात्तः ततः "किं क्रियाप्रश्नेऽनुपसर्गमप्रतिषिद्धम्" इति सूत्रेण निषेधे जाते ततो धातुस्वरेणाद्युदात्तत्वे किं द्विजः पचत्याहोस्विदगच्छति' इति ।

अत्र केचित् पूर्वं किं युक्तं तन्न निहन्यते उत्तरं तु न किं युक्तम् इति तन्निहन्यत एवेति । अन्ये तु यद्यप्येकस्याख्यातस्य समीपे किंशब्दः श्रूयते, तथापि सर्वस्य संशयविषयस्य तेन योग इति उभयत्रापि निषेधेन भाव्यमिति ।

अत्र हरदत्तः--अन्ये त्वाहुः पूर्वं किं युक्तमिति ते मन्यते--अस्तु द्वयोः संशयविषयत्वं किं तु श्रुतक्रियाविषय एव प्रश्नो द्योत्यते । क्रियान्तरविषयस्तु प्रश्नः आहोस्विदित्यनेन क्रियाप्रश्न इति चोच्यते । तस्मात्तस्यैव निघातप्रतिषेध इति ।

एहि मन्ये भक्तं भोक्ष्यसे भुक्तं तत्त्वतिथिभिः (४६)—अत्र "एहि मन्ये प्रहासे लट्" इति सूत्रेण एहि मन्ये इति युक्तस्य लृडन्तस्य अनुदात्तत्वनिषेधे तत्सिद्धम् । अत्र मन्यसे भोक्ष्ये इत्यर्थे "प्रहासे च मन्योपपदे" इत्यादिना 'मन्ये भोक्ष्यसे' इति पुरुषव्यत्ययः ।

जातु भोक्ष्यसे (४७)—अत्र "तिङ्ङतिङः" इति सूत्रेण निघातस्वरे प्राप्ते "जात्वपूर्वम्" इति सूत्रेण तन्निषेधे "तास्यानुदात्तेन् ङिददुपदेशाल्लसार्वधातुकमनुदात्तमह्निन्वङोः" इति सूत्रेण से इत्यस्य निघाते मध्योदात्ते पदे जातुशब्दस्य "निपाता आद्युदात्ताः" इति सूत्रेणाद्युदात्तत्वे 'जातु भोक्ष्यसे' इति ।

कटं जातु करिष्यति (२६)—अत्र कटशब्दः फिट्त्वात् "फिषोन्त उदात्तः" इति सूत्रेणान्तोदात्तः । जातुशब्दो निपातत्वात् "निपाता आद्युदात्ताः" इति सूत्रेणाद्युदात्तः करिष्यसि इत्यत्र "तिङ्ङतिङः" इति सूत्रेणानुदात्तः । "जात्वपूर्वम्" इति सूत्रेण निषेधस्तु न भवति सूत्रेऽपूर्वग्रहणात् । अत्र जातुपदात् पूर्वकपदं वर्तते ।

कश्चिद्भुङ्क्ते (३२)—अत्र "तिङ्ङतिङ" इति सूत्रेण निघातस्वरे प्राप्ते 'किं वृत्तं च चिदुत्तरम्" इति सूत्रेण तन्निषेधे 'कश्चिद्भुङ्क्ते' इति ।

आगच्छ देव ग्रामं प्रविश (२५)—अत्र तिङ्ङतिङ इति निघातस्य "लोट् च" इति सूत्रेण अनुदात्तत्वस्य निषेधे प्राप्ते तम्प्रबाध्य "विभाषितं सोपसर्गमनुत्तमम्" इति सूत्रेण वैकल्पिकानुदात्तत्वे तत् सिद्धयति । अत्र विशेति पक्षे निहतम् । पक्षे शप्रत्ययस्वरेणान्तोदात्तं, यदान्तोदात्तन्तदा "तिङि चोदात्तवति" इति सूत्रेण गतेर्निघातः ।

हन्त प्रविश (५१)—अत्र "तिङ्ङतिङ" इति सूत्रेण निघाते प्राप्ते तस्य "निपातैर्यद्यदि" इति नित्यनिषेधे प्राप्ते तम्प्रबाध्य 'हन्त च' इत्यनेन वैकल्पिकानुदात्तत्वे कृते 'हन्त प्रविश' इति । पक्षेऽन्तोदात्ते हन्त प्रविश' इति !

हन्त कुरु (२६)—अत्र "हन्त च" इति सूत्रेण वैकल्पिकानुदात्तस्य सोपसर्गे एव प्रवृत्तेरत्राप्रवृत्त्या 'निपातैर्यद्यदि' इति सूत्रेण निघातप्रतिषेधे 'हन्त कुरु' इति ।

आम पचसि देवदत्ता ३ (४७)—अत्र "आमन्त्रितस्य च" इति सूत्रेण सर्वस्यानुदात्तत्वे प्राप्ते "आम एकान्तरमामन्त्रितमनन्तिके" इति निषेधे "आमन्त्रितस्य च" इति सूत्रेणामन्त्रितस्याद्युदात्तत्वे "आम्पचसि देवदत्ता३' इति।

यद्धितुपरं छन्दसि (३१)—इति सूत्रस्वरूपम्। धकारयकारपूर्वो योऽन्त्योच् स उदात्तः स्यात् इत्यर्थः। यथा—अन्तर्द्धा। छाया। माया। जाया।

देवः पचतीव (२६)—अत्र देव इत्यस्य "फिषोन्त उदात्तः" इति सूत्रेणान्तोदात्तो ततश्चानुदात्तत्वे प्राप्ते "चनचिदिवगोत्रादितद्धिताम्रे डितेष्वगतेः" इति सूत्रेण निषेधे देवः पचतीव' इति।

देवः पचति च खादति च (४२)—अत्र देव इत्यस्य फिपोऽन्त उदात्त इति अन्तोदात्तत्वे जातेऽनुदात्तत्वे प्राप्ते "चादिषु च" इति सूत्रेण निषेधे तत्सिद्धम्।

हेति क्षियायाम् (२५)—हयुक्ता प्रथमा तिङ्विभक्तिर्नानुदात्ता स्यात् चियायाम् धर्म्मव्यतिक्रमे इत्यर्थः। यथा—'स्वयं ह रथेन याति ३ उपाध्यायं पदाति गमयति, उपाध्याये पदातौ गच्छति सति शिष्यस्य रथेन गमनं प्रतिपिद्धमिति धर्मव्यतिक्रमः।

उपाध्यायं पदाति गमयति (४६)—अत्र "हेति क्षियायाम्" इति सूत्रेण हयुक्ततिङन्तस्य अनुदात्तत्वे स्वयं ह रथेन याति ३ इत्यत्र निषेधेन 'उपाध्यायं पदाति गमयति' इत्यत्र निषेधाभावात् 'तिङ्ङतिङ इति निघातः। उपाध्याये पदातौ गच्छति सति शिष्यस्य रथेन गमनं प्रतिषिद्धमित्याचारभेदः।

वैवावेति च छन्दसि (२५)—आभ्यां युक्तं प्रथमं तिङन्तमनुदात्तं वा स्याच्छन्दसि। वै स्फुटार्थे क्षमायाञ्च वाव प्रसिद्धौ स्फुटार्थे च उदाहरणञ्चात्र 'अहर्वै देवानामासीत्' 'अयं वाव हस्त आसीत्'।

अहर्वै देवानामासीत् (४७)—अत्र "तिङ्ङतिङः" इति सूत्रेण प्राप्तनिघातस्वाधित्वा 'वैवावेति च छन्दसि"इति सूत्रेण वैयुक्तस्य तिङन्तस्य विभाषयाऽऽनुदात्तत्वे 'अहर्वै देवानामासीत्' इति।

अयं वाव हस्त आसीत् (५०)—अत्र "तिङ्ङतिङः" इति सूत्रेण निघाते प्राप्ते तम्प्रवाध्य 'आभ्यां युक्तं प्रथमं तिङन्तमनुदात्तं वा स्याच्छन्दसि' इत्यर्थकेन वैवावेति च छन्दसि" इति सूत्रेण विभाषयानुदात्तत्वे 'अयं वाव हस्त आसीत्' इति।

अजामेकां जिन्वति (४६)—जिविः प्रीणने धातुः इदित्वान्नुम्। लटि तिपि शपि 'जिन्वति' इति। तिङ्ङतिङः इति अनुदात्तत्वे प्राप्ते "एकान्याभ्यां समर्थाभ्याम्" इति सूत्रेण निषेधे 'अजामेकां जिन्वति' इति।

प्रजामेकां रक्षतिं (२६)—अत्रानुदात्तत्वे प्राप्ते "एकान्याभ्यां समर्थाभ्याम्" इति सूत्रेण निषेधे 'प्रजामेकां रक्षति' इति।

यो भुङ्क्ते (३१)—अत्र य इति प्रातिपदिकस्वरेणान्तोदात्तः ततश्च "तिङ्ङतिङः" इति सूत्रेण निघाते प्राप्ते "यद्वृत्तान्नित्यम्" इति सूत्रेणानुदात्तनिषेधे 'यो भुङ्क्ते' इति।

पूजनात् पूजितमनुदात्तं काष्ठादिभ्यः (२५)—पूजनेभ्यः काष्ठादिभ्यः पूजितवचनमनुदात्तं स्यात् इत्यर्थः। यथा 'काष्ठाध्यापकः' काष्ठादयोऽद्भुतपर्यायाः सन्तः पूजनवचनाः भवन्ति। काष्ठमध्यापयति इति विग्रहे।

काष्ठाध्यापकः (५१)—"मयूरव्यंसकादयश्च" इति समासे काष्ठादयोऽद्भुतपर्यायाः सन्तः पूजनवचनाः भवन्ति तेन "पूजनात्पूजितमनुदात्तं काष्ठादिभ्य" इति सूत्रे अनुदात्तत्वे 'काष्ठाध्यापकः' इति।

भाष्यादिमतेतु असमास एव। तेन दारुणाध्यापकः इति स्थितेः प्रकार लोपः संगतः।

पूजनात् पूजित० अत्र पूजितग्रहणप्रयोजनम् (३७)—पूजनात् पूजितमनुदात्तं काष्ठादिभ्यः इति सूत्रस्वरूपम्। पूजनस्य पूजितापेक्षत्वात् पूजनादित्येव पूजितग्रहणे सिद्धे पूजितग्रहणमनन्तरपूजितलाभार्थम्। एतदेव च ज्ञापकमिह प्रकरणे पञ्चमीनिर्देशेऽपि नानन्तर्यमाश्रीयते इति ज्ञापकफलञ्च 'यद्वृत्तान्नित्यम्' इत्यस्योदाहरणे 'यद्रचङ्वायुर्वाति' इत्यत्र व्यवहिते "यद्वृत्तान्नित्यम्" इति सूत्रकृतकार्यम् भवति।

सगतिरपि तिङ् (२८)—'सगतिरपि तिङ्' इति सूत्रस्वरूपम्। पूजनेभ्यः काष्ठादिभ्यस्तिङन्तं पूजितमनुदात्तम् इत्यर्थः। यथा 'यत्काष्ठां प्रपचति'।

पचति पूति (४३)—अत्र यथा "कुत्सने च सुप्यगोत्रादौ" इति सूत्रेणानुदात्तत्वे 'पचति पूति' इति।

गतिर्गतौ (२५)—गतौ गतिरनुदात्तः स्यादित्यर्थः। यथा 'अभ्युद्धरति'

अभ्युद्धरति (५१)—अत्र "गतिर्गतौ" इति सूत्रेणानुदात्तत्वे 'अभ्युद्धरति' इति।

यत् प्रपचति (५२)—अत्र "तिङि चोदात्तवति" इति सूत्रेण गतेरनुदात्तत्वे 'यत्प्रपचति' इति।

तिङि चोदात्तवति—नन्वत्र तिङ्ग्रहणाभावेऽपि गत्याक्षिप्तक्रिया वाचकस्योदात्तवतीति विशेषणात् आमन्द्रैरित्यत्र निघातनिवृत्तिसिद्धौ तिङ् ग्रहणं व्यर्थम्। न च कृदन्तेऽतिव्याप्तिरिति वाच्यम् कृत्स्परे सति गतेर्निघातस्येष्टत्वात् इति चेन्न।

तिङ्ग्रहणाभावे धातुरेव क्रियावाचकत्वात् गतिसंज्ञानिमित्तमिति यत्र धातोरेवोदात्तत्वम्। यत् यजति इत्यादौ तत्रैव निघातः स्यात्। तत्र हि यच्छब्दयोगात् निपातैर्यद्यद् इति निषेधात् तिङ्ङतिङः इत्यस्याप्रवृत्तिः। तत्सत्वे तु यं धातुं प्रति गतित्वं तद्घटिते तिङन्ते इत्यर्थात् तिङन्तस्य निघातनिमित्तत्वात् तिङन्तस्योदात्तत्वमपेक्ष्यते इति 'यद् प्रकरोति'। इत्यादौ धातोः शेपनिघातेनानुदात्तत्वेऽपि तिङन्तस्य उप्रत्ययस्वरेण मध्योदात्तत्वात् गते निघातः सिद्धः इतिदिक्।

इति तिङन्तस्वराः

अथ स्वरसञ्चारप्रकारः

अग्निमीळे पुरोहितम् (३६)—अत्र अग्निशब्दो अव्युत्पत्तिपक्षे माधवमते "फिषोन्त उदात्तः" इति सूत्रेणान्तोदात्तः। वस्तुतस्तु फिषः इत्यस्य इगन्तानाञ्च इसषाम् इत्यनेन बाधात् "घृतादीनाञ्च" इति सूत्रेण घृतादित्वादन्तोदात्तः। व्युत्पत्तिपक्षे तु निप्रत्ययस्वरेणान्तोदात्तः। अम् सुप्त्वात् 'अनुदात्तौ सुप्पितौ" इति सूत्रेणानुदात्तः। "अमिपूर्वः" इत्येकादेशस्तु "एकादेश उदात्तेनोदात्तः" इति सूत्रेणोदात्तः अग्निशब्दात् परस्य तिङन्तस्य ई ळे शब्दस्य "तिङ्ङतिङः" इत्यनेन

निघातः "ऌङ्" स्तुतौ धातोः लडुत्तमैकवचनस्येटि, टेरेत्वम् 'द्वयोश्चास्य स्वरयोः' इति प्रातिशाख्येन डस्य ळत्वम् सत्यपि धातुत्वादाद्युदात्तत्वे संहिताविवक्षायां निघाते "उदात्तादनुदात्तस्य स्वरितः" इत्यनेनेकारः स्वरितः "स्वरितात्संहितायाम्" इति 'ळे' इत्यस्य प्रचयाऽपरपर्याया एकश्रुतिः।

पुरः शब्दोऽन्तोदात्तः "पूर्वाधरावराणामसिपुरधवश्चैषाम्" इत्यसिप्रत्ययस्वरात् हितशब्दोऽपि धाधातोः निष्ठायां "दधातेर्हिः' इति सूत्रेण आदेशे प्रत्ययस्वरेणान्तोदात्तः। "पुरोऽव्ययम्" इति गतिसंज्ञायां "कुगतिप्रादयः" इति सूत्रेण समासे समासाऽन्तोदात्ते "तत्पुरुषे तुल्यार्थ" इत्यव्ययपूर्वपदप्रकृतिस्वरे, "गतिकारकोपपदात् कृत्" इति कृदुत्तरपदप्रकृतिस्वरे याथादिस्वरे च पूर्वपूर्वोपमर्देन प्राप्ते "गतिरनन्तरः" इति पूर्वपदप्रकृतिस्वरः। पुरःशब्दस्योकारस्य संहितायां प्रचये प्राप्ते "उदात्तस्वरितपरस्य सन्नतरः" इत्यनुदात्ततरः।

यज्ञस्य। यज् धातोः 'यजयाचयत्त्छप्रच्छरक्षोतङ्' इति तङ् तस्य प्रत्ययस्वरः विभक्तेः सुप्त्वाद्- 'अनुदात्तौ सुप्पितौ' इति अनुदात्तत्वे स्वरितोवाऽनुदात्ते पदादौ इति स्वरितत्वम्।

देवम्। दिव् धातोः 'पचादित्वादचि' फिट्स्वरेण, प्रत्ययस्वरेण चित्स्वरेणस्वरे वाऽन्तोदात्तत्वम्।

ऋत्विक् (२८) ऋतावुपपदे यजेः 'ऋत्विक्दधृग्०' इत्यादिना क्विन् 'वचिस्वपिः' इति सम्प्रसारणम् यणि कृदुत्तरपदप्रकृतिस्त्रोणान्तोदात्तः।

होतारम्। हुधातोः तृन् प्रत्यये नियतप्रत्ययस्वरेणान्तोदात्तः।

रत्नधातमम्। रत्नशब्दः 'नब्विषयस्यानिश्रन्तस्य' इति आद्युदात्तः। रत्नानि दधाति इति रत्नधाः। समासस्वरेण समासस्य इत्यनेन कृदुत्तरप्रकृतिस्वरेण कान्तोदात्तः। तमपः पित्वात् अनुदात्तत्वे स्वरितप्रचयौ। इति।

इति स्वरसञ्चारप्रकारप्रकरणं समासम्।

स्वरवैदिक-प्रश्नपत्राणि

१९३१

१—ऋक्वता गणेन । आध्वं नो देवाः । या खर्वेण पिबति तस्यै खर्वः । निष्टर्व्यम् । अवयाः । प्रण आयूंषि तारिषत् । कुशिकासो अवस्यवः । सोमः सधस्थम् । पीत्वी सोमस्य ववृधे । ददिर्गाः । पाथ्यो वृषा । रथीरभूत् । एषां मध्ये नवसु प्रयोगेषु यानि विशेषकार्याणि तानि शास्त्रनिर्देशपुरस्सरं लेख्यानि ।

२—नेतराच्छन्दसि । उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य । यद्धितुपरं छन्दसि । ध्यपूर्वस्य स्त्रीविषयस्य । एषामर्थां उदाहरणानि च लेख्यानि ।

३—एकश्रुतिः । सन्नतरः । उपग्रहः । नप् । एषां शब्दानामर्थाः प्रदर्शनीयाः ।

४—हिंसन्ति । इन्धानः । जाया । स्वाहा । त्रिभिष्ट्वम् । मद्रसविधम् । महाव्रीहिः । मल्लग्रामः । उपकूलम् । देवमित्रः । यो भुङ्क्ते । काष्ठाध्यापकः । आग्नेयः । एषां मध्ये नवसु प्रयोगेषु ससूत्रनिर्देशं स्वरविशेषाः प्रतिपादनीयाः ।

१९३२

१—मनुष्वदग्ने । दाति प्रियाणि । ब्रह्मवाहस् । गृभाय जिह्वया मधु । दातवा उ । अनुसखा सयूथ्यः । मघव्यः । कथा दाशेम । स तूताव ईषा अक्षो हिरण्ययः । अस्मे प्रयन्धि । अश्वायन्तो मघवन् । एषां मध्येऽष्टसु प्रयोगेषु यानि वैदिक-प्रक्रियाकार्याणि तानि शास्त्रनिर्देशपुरःसरं प्रदर्शनीयानि ।

२—ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे । स्वरितो वाऽनुदात्ते पदादौ । अन्तश्च तवै युगपत् । नञ्विषयस्यानिसन्तस्य । एषामर्थां उदाहरणानि च लेख्यानि ।

३—शिट् । अवग्रहः । न्यूङ्खाः । यद्वृत्तम् । एषां शब्दानामर्था लेख्याः ।

४—बोश्वाः । चिकीर्षकः । सर्वे । बंहिष्ठः पटुपटुः । कौञ्जायनाः । आहवनीये । पाण्यन्युपघ्नम् । पञ्चदिष्टिः । गोपालः । सुग्रीवः । आवसथः । हन्त प्रविश । एषां मध्येऽष्टसु प्रयोगेषु ससूत्रनिर्देशं स्वरविशेषाः प्रतिपादनीयाः ।

५—गतिकारकोपपदात्कृदिति सूत्रे कृद्ग्रहणप्रयोजनं प्रतिपादनीयम् ।

१९३३

१—वृषण्वसुः । वृत्रं हनति वृत्रहा । चक्राणा वृष्णिम् । अद्य ममार । ददिर्गाः । ईश्वरो विलिखः । चनो दधीत नाद्यो गिरो मे । सोम्यो ब्राह्मणः । ब्रह्मसामं भवति । उपप्रयन्तो अध्वरम् न मर्तः । त्मना देवेषु । देवासः । हरिवो मेदिनं त्वा । एषां मध्ये नवसु प्रयोगेषु यानि वैदिकप्रक्रियाकार्याणि तानि शास्त्रनिर्देशपूर्वकं प्रदर्शनीयानि ।

२—लोपस्त आत्मनेपदेषु । उदात्तस्वरितपरस्य सन्नतरः । लघावन्ते द्वयोश्च बह्वषो गुरुः । आचार्योपसर्जनश्चान्तेवासिनि । एषामर्था उदाहरणानि च लेख्यानि ।

३—सर्वस्य ईड्यः । तिलाः । स्वाहा । आग्नेयः । आहवनीये । गोलवणम् । साङ्काश्यसिद्धः । यूपदारु । तन्तुवायः । स्त्रीसभम् । कश्चिद्भुङ्क्ते । अनुपुरुषः । एषां मध्ये नवसु प्रयोगेषु ससूत्रनिर्देशं स्वरविशेषाः प्रतिपादनीयाः ।

४—तिङि चोदात्तवतीति सूत्रे तिङ्ग्रहणप्रयोजनं प्रतिपादनीयम् ।

१९३४

१—अक्रन्नुपासः । मर्यः । अब्जाः पताति विद्युत् । मध्वा जभार । न म्लेच्छितवै । सुमङ्गलीरियं वधूः । तृचं सूक्तम् । अभ्रयाँ अपः । इष्ट्वीनं देवान् । एषां मध्ये सप्तसु प्रयोगेषु यानि वैदिकप्रक्रियाकार्याणि तानि शास्त्रनिर्देशपूर्वकं प्रदर्शनीयानि ।

२—तयोर्दाहिलौ च च्छन्दसि । स्वाङ्गशिटामदन्तानाम् । उभे वनस्पत्यादिषु युगपत् । एषामर्था उदाहरणानि च लेख्यानि ।

३—चिकीर्षकः । पन्थाः । घृतम् । कृषिः । अष्टाभिः । क्व । कुमारश्रमणा । विश्वदेवः । अध्ययनपुण्यम् । गौरमुखः । एषां सप्तसु ससूत्रनिर्देशं स्वरविशेषाः प्रतिपादनीयाः ।

४—'उपमानं शब्दार्थप्रकृतावेव' इति सूत्रे प्रकृतिग्रहणप्रयोजनं प्रतिपादनीयम् ।

५—यद्योभावप्रसन्धानमुकारादि परं पदम् । स्वरान्तं तादृशं विद्याद् यदन्यद्व्यक्तमूष्मणः ॥ इत्यस्य सुस्पष्टं व्याख्या कार्या ।

६—विवृतिः । अयोगवाहाः । रङ्गः । स्वासी । नादी । एषामर्थाः स्पष्टीकरणीयाः ।

१९३५

१—क्षेत्रस्य पतिना । आध्वं नो देवाः । अघायुः । वायवे पिबध्यै । समुद्रिया अप्सरसः । तं प्रत्नथा । एष स्य भानुः । rारन्धि । दक्षिणतः शये । मोषुणः । एषां मध्ये सप्तसु प्रयोगेषु यानि वैदिकप्रक्रियाकार्याणि तानि शास्त्रनिर्देश-पुरस्सरं प्रदर्शनीयानि ।

२—प्रकृत्यान्तः पादमव्यपरे । ईषान्तस्य हयादेरादिर्वा । किं क्रियाप्रश्नेऽनुप-सर्गमप्रतिषिद्धम् । एषामर्था उदाहरणानि च लेख्यानि ।

३—हिंसन्ति । मह्यम् । कल्याणः । आग्नेयः । त्रिभिष्टम् । आष्ट्रपक्वः । आर्य-ब्राह्मणः । उष्ट्रकोशी । उपकूलम् । प्रत्यंशुः । एषां मध्ये सप्तसु प्रयोगेषु ससूत्रनिर्देशं स्वरविशेषाः प्रतिपादनीयाः, स्वरचिह्नानि च प्रदर्शनीयानि ।

४—"द्वित्रिभ्यां प्राद्दन्मूर्धसु बहुव्रीहौ" इति सूत्रेऽकृतसमासान्तस्य मूर्धन्शब्दस्य ग्रहणे प्रयोजनं प्रतिपाद्य फिट्सूत्राणां पाणिनीयैरुपादेयत्वं समर्थनीयम् ।

५—यमस्वरूपं सुस्पष्टं प्रतिपाद्यताम् ।

६—अचोऽस्पृष्टा यणस्त्वीषन्नेमस्पृष्टाः शलः स्मृताः ।
शेषाः स्पृष्टा हलः प्रोक्ता निबोधाऽनुप्रदानतः ।
अस्पृष्टादिस्वरूपप्रतिपादनपुरस्सरमस्यव्याख्या कार्या ।

१९३६

१—नैनं हिन्वन्त्यपि वाजिनेषु । आ प्रा द्यावा पृथिवी । दधिक्राः । मरते पतिः । प्रभ्वी । वेशोभगीनः । सुमङ्गलीः । पूषा अविष्टु । नूमर्तः । गत्वाय । प्रमिणन्ति व्रतानि । एषां मध्ये सप्तसु प्रयोगेषु वैदिकप्रक्रियाकार्याणि शास्त्र-निर्देशपुरस्सरं प्रदर्शनीयानि ।

२—अनसन्तान्नपुंसकाच्छन्दसि । स्वाङ्गशिटामदन्तानाम् । गोत्रान्ते वासिमाणव-ब्रह्माणेषु क्षेपे । स्वरितो वाऽनुदात्ते पदादौ । एषामर्थाः उदाहरणानि च लेख्यानि ।

३—देवीम् । शरावती । पललम् । नेत्री । पाणिनीयरौढीयाः । ब्रह्मनगरम् । प्रधौतपादः । पर्यन्तः । एषां मध्ये पञ्चसु प्रयोगेषु ससूत्रनिर्देशं स्वरविशेषाः प्रतिपादनीयाः, स्वरचिह्नानि च प्रदर्शनीयानि ।

४—(क) "अग्निमीळे पुरोहितम्" इत्यस्मिन् पादे स्वरचिह्नैः सह स्वरसञ्चार-प्रकारः प्रदर्शनीयः।

(ख) 'गतिकारकोपपदात् कृत्' अत्र कृद्ग्रहणप्रयोजनं सुस्पष्टं प्रतिपादनीयम्।

५—मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्।
सुस्पष्टं व्याख्यायतां स्वशब्दैः।

६—"अयोगवाहा विज्ञेया आश्रयस्थानभागिनः"। सविशदमेतद् व्याख्याय अयोगवाहाः के ? कथञ्च तेषामयोगवाहत्वमिति निरूपणीयम्।

१९३७

१—गामस्य तदहः सभायां दीव्येयुः। शुन्धध्वं दैव्याय कर्मणे देवयज्यायै। अद्य ममार। दातवा उ। सप्तदशाक्षरश्छान्दस्यः। दाधार यः पृथिवीम्। अयं सो अध्वरः। सुश्चन्द्र दस्म। नाभा पृथिव्याः। गृष्टिः ससूव स्थविरम्। त्रिभिष्टं देव सवितः। एषां मध्ये सप्तसु प्रयोगेषु वैदिकप्रक्रियाकार्याणि शास्त्रनिर्देशपूर्वकं प्रदर्शनीयानि।

२—मतुवसो रु सम्बुद्धौ छन्दसि। नब्विषयस्यानिसन्तस्य। आचार्योपसर्जन-श्चान्तेवासिनि। उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य।
एषामर्था उदाहरणानि च लेख्यानि।

३—चिकीर्षकः। केकयः। दातवै। अक्षण्वन्तः। भद्रसवेशम्। पुरोहितम्। उद्दालकपुष्पभञ्जिका। विश्वकर्मा। एषां मध्ये पञ्चसु प्रयोगेषु ससूत्रनिर्देशं स्वरविशेषाः प्रतिपादनीयाः, स्वरचिह्नानि च प्रदर्शनीयानि।

४—(क) "शृणोत ग्रावाणः" इत्यत्र "ऋचि तुनुघ" इत्यनेन दीर्घत्ववारणप्रकारः प्रदर्शनीयः।

(ख) "पूजनात्पूजितमनुदात्तम् काष्ठादिभ्यः" अत्र पूजितग्रहणप्रयोजनं प्रतिपादनीयम्।

५—त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः सम्भवतो मताः।

प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वम्भुवा ।

सुस्पष्टमेतद् व्याख्याय वर्णानां त्रिषष्टित्वं च कथमिति सप्रपञ्चं निरूपणीयम् ।

६--ऊष्मणोऽष्टविधा गतयः सोदाहरणं निरूपणीयाः ।

१९३८

१--वृत्रं हनति वृत्रहा । अघायुः । पपिः सोमम् । याते अग्ने रक्षस्या तनूः । कथा दाशेम । अग्न आँ अपः । शृणुधी गिरः । अधः स्विदासीत् । तमसस् पारमस्य । पितृयाणम् । पृतनासु साह्ला । एषां मध्ये सप्तसु प्रयोगेषु वैदिकप्रक्रियाकार्याणि शास्त्रनिर्देशपूर्वकं प्रदर्शनीयानि ।

२--वहुलं छन्दस्यमाङ्योगेऽपि । छन्दस्यनेकमपि साकाङ्क्षम् । तवै चान्तश्च युगपत् । स्वाङ्गशिटामदन्तानाम् । एषामर्था उदाहरणानि च लेख्यानि ।

३--शरावती । रुद्रहतः । आर्यब्राह्मणः । वृकोदरः । समपादः । दक्षिणः (बाहुः) आवसथः । उष्ट्रक्रोशी । एषां मध्ये पञ्चसु प्रयोगेषु ससूत्रनिर्देशं स्वरविशेषाः प्रतिपादनीयाः स्वरचिह्नानि च प्रदर्शनीयानि ।

४--गतिकारकोपपदात्कृत् इति सूत्रे कृद्ग्रहणप्रयोजनं प्रतिपादनीयम्, अथवा निपातस्य चेत्यनेनैव त्वादीनां दीर्घत्वे ऋचितुनुघेत्यादिसूत्रे तेषां ग्रहणस्य वैयर्थ्यं निरस्यताम् ।

५--अनुस्वारो विसर्गश्च ᳵक ᳵपौ चापि पराश्रितौ इत्यादि सुस्पष्टमेतद्व्याख्याय दुःस्पृष्टशब्दार्थो निरूप्यताम् ।

६--अयोगवाह । यम । रङ्ग । नादिन् । श्वासिन् ।
इत्येतेषां शब्दानामर्थाः सोदाहरणं स्पष्टीकर्तव्याः ।

१९३९

१--उपसंवादाशङ्कयोश्च । तयोर्य्वावचि संहितायाम् । निष्ठा च द्व्यजनात् । मात्रोपज्ञोपक्रमच्छाये नपुंसके । एषां सूत्राणामर्थाः लेख्याः ।

२--उक्थशासः । मादयैते । ब्रह्मसामम् । ज्या इयम् । वार्त्रघ्नमितरम् । पीत्वी सोमस्य । भरता जातवेदसम् । ब्रह्मचारिणमिच्छते । वर्चस्याः । तृचं सूक्तम् ।

वास्त्व्यम् । एषां मध्ये सप्तसु प्रयोगेषु वैदिकप्रक्रियाकार्याणि शास्त्रनिर्देशपूर्वकं प्रदर्शनीयानि ।

३—तुभ्यम । शरावती । जाया । कल्याण: । आहवनीये । भार्यासौश्रुत: । उपशालम् । अग्निम् । एषां मध्ये पञ्चसु प्रयोगेषु ससूत्रनिर्देशं स्वरविशेषाः प्रतिपादनीयाः स्वरचिह्नानि च प्रदर्शनीयानि ।

४—उपग्रहः । स्फिग् । नप् । प्रचयः । इति सञ्ज्ञाशब्दान् व्याख्याय दार्धर्ति० इति 'ग्रसित' इति सूत्रं समग्रमुद्धरणीयं व्याख्यातव्यञ्च । अथवा —'तयोर्य्वावचि संहितायाम्' इति सूत्रारम्भप्रयोजनं सुस्पष्टं प्रतिपादनीयम् ।

५—उदात्तादिस्वराणां 'नवपदशय्या' (नवपदसञ्ज्ञा इति पाठान्तरम्) स्वरूपं सोदाहरणं स्पष्टीकर्तव्यम् ।

अथवा—व्याकरणाङ्गानां वेदपुरुषस्य मुखत्वादिकं केनाभिप्रायेणेति सयुक्तिकं प्रतिपादनीयम् ।

६—वर्णानां त्रिषष्टित्वं चतुःषष्टित्वं च कथमिति सप्रपञ्चं निरूपणीयम् ।

१९४०

१—घृतस्य यजते । तारिषत् । अपलुपं नाशकत् । ओजस्या तनूः। रेवान् । चक्रा जरसम् । जनीयन्तो न्वग्रहः । अद्यामावास्येत्यात्थ३। अग्निचित् भाया३त् । नृमणाः ।

एतेषां मध्ये पञ्चसु वैदिकविशेषकार्याणां सप्रमाणमुल्लेखो विधेयः ।

अथवा—'तद्वानासामुपधानो मन्त्र इतीष्टकासु लुक् च मतोः' 'अङ्ग इत्यादौ च' इति सूत्रे सोदाहरणं व्याख्याय, अकृत्सार्वधातुकयोः' इति दीर्घेणैव लक्ष्ये सिद्धे "अश्वाघस्यात्" इति सूत्रस्य फलमस्ति नवेति विवेचनीयम् ।

२—'सति शिष्टस्वरवलीयस्त्वमन्यत्र विकरणेभ्यः' इत्यस्य फलप्रमाणे समुल्लिख्य खलप्व्याशा । क्षत्रिया । पटुपटु । उच्चारपदेन प्रस्थितः । सुगन्धितेजनाः । एतेषु स्वरविशेषाः सशास्त्रं प्रदर्शनीयाः ।

३—गमनज्येष्ठम् । द्विसुवर्णधनम् । शितिपादः । कृष्णाजिनम् । अत्यङ्कुशो नागः । एषु ससूत्रं स्वरान्निर्दिश्य 'तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्योः' इति सूत्रे कुत्सनाऽभीक्ष्ण्यग्रहणं कस्य विशेषणमिति सफलमभिधीयताम् ।

४—'तास्यनुदात्तेन्ङित्०' 'कुरुगार्हपतरिक्त०' इति सूत्रद्वयं सार्थकं वर्णयित्वा 'गतिरनन्तरः' इत्यत्र 'अनन्तर' ग्रहणस्य प्रयोजनं विशदं निरूपणीयम् ।

५—'अग्निः सोमः प्र वो वीर्य्यं हविषां स्वर्बृहस्पतिरिन्द्राबृहस्पती' अत्र स्वरान् प्रदर्श्य ।

अनुस्वारे विवृत्यां तु विरामे चाक्षरद्वये ।
द्विरोष्ठ्यौ तु विगृह्णीयात् यत्रौकारवकारयोः ।
इति कारिका सुस्पष्टं व्याख्येया । अथवा —
कीदृशो रङ्गवर्णः तदुच्चारणप्रकारश्च कः इति, ऊष्मणां कति गतय इति च निगद्य—यद्योभावप्रसन्धानमुकारादिपरं पदम् ।
स्वरान्तं तादृशं विद्याद्यदन्यद्व्यक्तमूष्मणः ॥
इति पद्यस्याशयो निरूपणीयः ।

१९४१

१—यवाग्वाऽग्निहोत्रं जुहोति, मर्यः, इयं ते नव्यसी मतिः, आहुवध्यैः, सोमस्येव मौञ्जवतस्य भक्षः, यज्ञं विप्रस्य मावतः, ते नो अवन्तु, दृतिं न शुष्कं सरसी शयानम्, रिषण्यति, रायस्पोषं यजमानेषु—एषु वैदिककार्य्याणि लेख्यानि ।

अथवा

'देवसुम्नयोर्यजुषि काठके' 'क्षियाशीःप्रैषेषु तिङाकाङ्क्षम्' इत्यनयोर्वाक्यार्थौ निर्वर्ण्य 'इको यणचि' इत्यनेन यण्सिद्धिमाशङ्क्य 'तयोर्य्वावचि संहितायाम्' इति सूत्रस्य मूलोक्तानि फलानि पूर्वपूर्वफलेऽरुचिप्रदर्शनपुरस्सरं वर्णनीयानि ।

२—'स्वरितो वानुदात्ते पदादौ' इत्यत्र व्यवस्थितविभाषायाः प्रयोजनं प्रदर्श्य, क्षैप्रप्रश्लेषाभिनिहितशब्दानामर्थानभिधाय, देवीं वाचम्, अयमग्ने जरिता, ममत्तु नः परिज्मा, शरावती—एतेषु असाधारणकार्याणि ससूत्रं प्रतिपादनीयानि ।

३—फिट्सूत्राणां पाणिनीयैरुपादेयत्वं प्रसाध्य पृष्ठम्, दिवेदिवे, आस्ते, गमननेदीयः, प्रक्षयः, प्रक्षालितमुखः, चक्रसक्थः, देवमित्रः—एषां पञ्चसु स्वरविधायकानि शास्त्राणि ब्रूत ।

४—लुलविथ, रज्जुशारदमुदकम्, पार्णिनीयरौढीयाः, त्वोतासः, सर्वपाञ्चालकः, प्रजाकाण्डम्, प्रमत्तगीतम्, तत्पञ्चमः, उपाजिनम्—एषां पञ्चसु प्रयोगेषु केन केन शास्त्रेण कःस्कः स्वर इत्यभिधेयम्। स्वर चिह्नानि च प्रदर्शनीयानि।

५—(क) मारुतस्तूरसि चरन्मद्रं जनयति स्वरम्।
प्रातःसवनयोगं तं छन्दो गायत्रमाश्रितम्॥
कण्ठे माध्यन्दिनयुगं मध्यमं त्रैष्टुभानुगम्।
तारं तार्तीयसवनं शीर्षण्यं जागतानुगम्॥
इमे सुस्पष्टं व्याख्येताम्।

(ख) यद्योभावप्रसन्धानमुकारादिपरं पदम्।
स्वरान्तं तादृशं विद्याद् यदन्यद् व्यक्तमूष्मणः॥
पद्यमेतत्प्रकृतानुसन्धानेन व्याख्यायताम्।

१९४२

१—वृषणश्वः, तारिषत्, रक्षस्या, सुश्चन्द्र दस्म, सर्वमा इदम्, हन्त ते ददामि, अप्स्वग्ने सधिष्टव, एषु पञ्चसु वैदिककार्य्याणि लेख्यानि।

अथवा

(क) प्रजनयामकः, इन्द्रेण युजा तरुषेम वृत्रम्, यद्वद्वतो निवतः, एतेषु सूत्रोपन्यासपूर्वकं कार्य्यविशेषा दर्शनीयाः।

(ख) 'आपो जुषाणो वृष्णो वर्षिष्ठेऽम्बेऽम्बालेऽम्बिके पूर्वे' 'नित्यं छन्दसि' आभ्यां किं कार्य्यं विधीयते।

२—अग्निमीळे, अयं पन्थाः, यासिष्टं वर्तिरश्विना, रिक्तगुरुः, अधिकार्मम्, अध्ययनपुण्यम्, क्वावरं मरुतः, वृकः, कुमारप्रत्येनाः, आविश्वदेवं सत्पतिम्, अत्र केषुचित् पञ्चसु सूत्रनिर्देशपुरस्सरं स्वरविशेषा लेखनीयाः।

३—(क) 'अग्नीत्प्रेषणे परस्य च' 'नामन्यतरस्याम्' अनयोरर्थमुपवर्णय।
(ख) 'कृद्ग्रहणं स्पष्टार्थम्' इत्यस्याशयो निरूप्यताम्।
(ग) 'कुत्सनाभीक्ष्ण्यग्रहणं पाठविशेषणम्' इत्यस्य फलं प्रदर्शनीयम्।

अथवा

गीरुद्रेभ्यो अवपथाः, गर्भं माता सुधितं वक्षणासु, चतस्रः पश्य, पितृसदृशः, प्रधौतपादः; अपवीणम्, देवः पचति च खादति च, काष्ठाध्यापकः, पुरोहितम्, रत्नधाः, आद्यप्रयोगयोर्वैदिककार्य्यं शेषेषु केन कः स्वर इति ब्रूत ।

४—पाटला, परिवत्सरः, कृत्तिका नक्षत्रम्, कन्दुकः, रसना, पारावतः, तिल्यम्, एषु ससूत्रं स्वरानभिधाय उदात्तानुदात्तस्वरितानां चिह्नानि अङ्कनीयानि ।

५—(क) 'स्वरा विंशतिरेकश्च' इति शिक्षोक्ताः स्वरा विभज्य प्रदर्शनीयाः ।

(ख) अर्धमात्रा तु कण्ठ्या स्यादेकारैकारयोर्भवेत् ।
ओकारौकारयोर्मात्रा तयोर्विवृतसंवृतम् ॥
हृदयादुत्करे तिष्ठन् कांस्ये समनुस्मरन् ।
मार्दवञ्च द्विमात्रञ्च जघन्वाँ इति निदर्शनम् ॥
इति पद्यद्वयं व्याख्येयम् ।

१९४३

१—मनुष्वदग्ने, यवाग्वाग्निहोत्रं जुहोति, अक्षन्नमीमदन्त हि, स्तर्या, अब्जाः, गृभाय, अपलुपं नाशकत्, ऋतव्याः, पञ्चथम्, कथा दाशेम । एषु केचन सप्त प्रयोगा विशेषसूत्रोपन्यासपुरस्सरं साधनीयाः ।

२—भय्यः, उरु णस्कृधि, परमे व्योमन्, दिवं सुपर्णो गत्वाय, हरिवो मेदिनं त्वा, एतान् संसाध्य तयोर्य्वावचि संहितायामिति सूत्रस्य प्रयोजनं कौमुदीकारपङ्क्त्युल्लेखपुरस्सरं साधु प्रतिपाद्यताम् ।

३—सतिशिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्य इत्यत्र प्रमाणमुक्त्वा उच्चैरधीयान, खलप्व्याशा, सरस्वति शुतुद्रि, ममत्तु नः परिज्मा, नखम् । एषु स्वरविधायकानि सूत्राणि लिखित्वा स्वरसंचारः क्रियताम् ।

४—चोदयित्री, कृष्णसारङ्गः, गमनाबाधम्, श्रेणिकृताः, दन्तलेखकः, मापोनम्, अन्तर्वणो देशः, नह भोक्ष्यसे, आम् पचसि देवदत्त, पचति पूति । एषु स्वरविधायकानि सूत्राणि लेख्यानि ।

५—त्रिषष्टिं चतुष्षष्टिञ्च वर्णान् लिखित्वा—"अनुस्वारयमानां च नासिकस्थानमुच्यते। अयोगवाहा विज्ञेया आश्रयस्थानभागिनः" इति पद्यं व्याख्याय अयोगवाहशब्दार्थ उच्यताम्।

६—"दाराक्षतलाजासूनां बहुत्वञ्च", "मनुद्वपक्क्कोऽकर्तरि" इति सूत्रद्वयं सोदाहरणं व्याख्याय सक्तु, अप्सरस्, शब्दयोः कस्मिन् लिङ्गे साधुत्वमिति सप्रमाणं प्रतिपाद्यताम्।

१९४४

१—वृषण्वसुः, सखिश्च, मा त्वाग्निर्ध्वनयीत्, पृतनाषाट्, मन्त्रं वोचेमाग्नये, न म्लेच्छितवै, उदेतोः, सभेयो युवा, सोम्यो ब्राह्मणः, या ते अग्ने रक्षस्या तनूः। एतेषु कानपि रेखाङ्कितान् पञ्च प्रयोगान् साधयित्वा "इन्धिभवतिभ्यां च" इति सूत्रं प्रत्याख्यायताम्।

२—मूर्धन्वतीरुपदधाति, प्रबाहुवा, स्विन्नः स्नात्वी मलादिव, वधीं वृत्रम्, पितृयाणम्। एतेषु रेखाङ्कितानि पदानि विशेषकार्यविधायकसूत्रैः संसाध्य "सुप्तिङुपग्रहलिङ्गनराणाम्"इति कारिका उदाहरणप्रदर्शनपुरस्सरं व्याख्येया।

३—गोपायतं नः, वोऽश्वाः, आशितम्, दक्षिणो बाहुः, सुगन्धितेजनाः, पृष्ठम्, परमवाचा, रज्जुशारदमुदकम्। एतेषु रेखाङ्कितपदेषु स्वरसंचारं विशेषसूत्रोपन्यासपुरस्सरं विधाय "प्रकृतिग्रहणं किं प्रकृतिरेव यत्रोपसर्गनिरपेक्षा शब्दार्था तत्रैव यथा स्यात्" इति पङ्क्तिर्व्याख्यायताम्।

अथवा

द्रवत्पाणी, प्रष्ठौहः, यासिष्टं वर्तिरश्विनौ, अरित्रगाधम्, अक्षण्वन्तः; नभन्तामन्यके समे—एषु रेखाङ्कितेषु विशेषसूत्रोपन्यासपुरस्सरं स्वरसंचारं विधाय सन्नतर, प्रश्लेष, क्षिप्र, नप्, शब्दानामर्थान् लिखत।

४—गमनचिरम्, पाणिनिरौढीयाः, पारेवडवा, वैयाकरणहस्ती, वृकोदरः, तिलमिश्राः, अजामेकां जिन्वति, सत्यं भोक्ष्यसे। एतेषु स्वरसंचारं विशेषसूत्रोपन्यासपुरस्सरं विधाय गतिकारकोपपदात् कृदिति सूत्रघटककृद्ग्रहणस्य प्रयोजनमुच्यताम्।

५—हकारं पञ्चमैर्युक्तमन्तः स्थाभिश्च संयुतम् ।
उरस्यं तद्विजानीयात्कण्ठ्यमाहुरसंयुतम् ॥
कुतीर्थादागतं दग्धमपवर्णं च भक्षितम् ।
न तस्य पाठे मोक्षोऽस्ति पापाहेरिव किल्विषात् ॥

इति पद्यद्वयं व्याख्याय वेदस्य षडङ्गानि कानि के च तत्र विषया इति प्रतिपाद्यताम् ।

६—अन्यूप्रत्ययान्तो धातुः, घञवन्तः, इति सूत्रद्वयं सोदाहरणं व्याख्याय प्रावृट्-विप्रुट्-शब्दयोः कस्मिन् लिङ्गे साधुत्वं कौ चानयोरर्थौ इति प्रतिपाद्यतताम् ।

१९४५

१—घृतस्य यजते, प्राण आयूंषि तारिषत्, गवामिव श्रियसे, छन्दस्यः, दाधार यः पृथिवीम्, उरो अन्तरिक्षम्, एतान् संसाध्य "यजुषि पादाभावादतन्तः-पादार्थ वचनम्" अस्य क आशयः ।

२—'तयोर्य्वावचि संहितायाम्' इति सूत्रं सोदाहरणं व्याख्यायेको यणचि सूत्रेणै-वास्य गतार्थत्वे किमर्थमिदं सूत्रमिति सम्यगभिधीयताम् ।

अथवा

सुपां सुलुक्, द्व्यचोऽतस्तिङः, कव्यध्वरपृतनस्यर्चि लोपः इति सूत्राणि व्याख्यायन्ताम् ।

३—द्रवत्पाणी शुभस्पती, प्र य आरुः, व्यचच्चयत्स्वः लूयते केदारः स्यमेव, अध्वर्युभिः पञ्चभिः, युञ्जन्त्यस्य काम्या, कल्याणः, सुगन्धितेनजनाः, उत त्वः पश्यन्, वाचा विरूपः, एषा नेत्री, एषु सप्तसु स्वरान् प्रसाध्य "स्वरविधौ व्यञ्जनमविद्यमानवत् इत्येतदत्र न मरुत्वानिन्द्र, नियुत्वान् वायवागहि" अस्याभिप्रायो वर्णनीयः ।

४—सदृशश्वेतः; पाणिन्युपज्ञम्, पञ्चारत्नयः पाणिनीयरौढीयाः, यूपदारु, अन्वेतवा उ, प्रथमवैयाकरणः, उद्दालकपुष्पभञ्जिका, एषु षण्णां स्वरसाधुत्वं तल्लेखन-प्रकारं च प्रदर्श्य गतिकारकोपपदात् कृत्, इति सूत्रे कृद्ग्रहणफलं प्रतिपादयत ।

५—मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम् ।

प्रातः सवनयोगं तं छन्दो गायत्रमाश्रितम् ॥
कण्ठे माध्यंदिनयुगं मध्यमं त्रैष्टुभानुगम् ।
तारं तार्तीयसवनं शीर्षण्यं जागतानुगम् ॥

इमे सुस्पष्टं व्याख्याय शिक्षादीनां वेदाङ्गत्वं वेदावयवत्वेन प्रकारान्तरेण वेति विचार्य्यताम् ।

१९४६

१—वृषणश्वः, अक्रन्नुषासः, मा त्वाग्निर्ध्वनयीत्, वीरुधः पारयिष्णवः, प्रियः सूर्ये प्रियो अग्ना भवाति, गृभ्णामि ते, जरसा मरते पतिः, एतान् संसाध्य वैदिकप्रयोगाणां लौकिकप्रयोगानतिरेकात् वैदिकप्रक्रियायाः पृथगुल्लेखे युक्तिः प्रदर्शनीया ।

२—ऋतव्याः, शन्तातिः, श्रिता नो ग्रहाः, यत्रा नश्चक्रा, सत्येनोत्तभिता भूमिः, वध्यन्ती वेदागनीगन्ति कर्णाम्, अक्षण्वन्तः, अभिरूपक ३ अभिरूपक रिक्तं ते आभिरूप्यम्, सुपेशसस्करति, महाँ इन्द्रो य ओजसा, एषु केऽपि सप्त संसाध्याः ।

अथवा

"नसत्तनिषत्तानुत्त–" "अङ्गयुक्तं तिङाकाङ्क्षम्" "प्रतिश्रवणे च" "दाश्वान् साह्वान् मीढ्वांश्च" इमानि सूत्राणि सोदाहरणानि व्याख्येयानि ।

३—आ ते पितर्मरुताम्, तमोशानासः, चतुरः कल्पयन्तः, ईड्यो नूतनैरुत, लुलविथ, छात्रप्रियोऽनध्यायः, श्वाफल्कचैत्रकाः, सुप्तप्रलपितम्, प्रत्यंशुः, एहि मन्ये भक्तं भोक्ष्यसे भुक्तं तत्त्वतिथिभिः, अजामेकां जिन्वति–एषां केष्वपि सप्तसु प्रयोगेषु स्वरविधायकानि सूत्राणि लेख्यानि ।

४—मुहूर्तसुखम्, ग्रामनापितः, अपरकृष्णमृत्तिका, शोणा धृष्णू नृवाहसा, उपाध्यायं पदातिं गमयति, एषु प्रयोगेषु स्वरविशेषान् प्रदर्श्य—

परादिश्च परान्तश्च पूर्वान्तश्चापि दृश्यते ।
पूर्वादयश्च दृश्यन्ते व्यत्ययो बहुलं ततः ॥

इति श्लोकवार्त्तिकस्योदाहरणानि लिखत ।

५—अनुस्वारयमानाञ्च नासिकास्थानमुच्यते ।

अयोगवाहा विज्ञेया आश्रयस्थानभागिनः ॥
यथा सौराष्ट्रिका नारी तक्रँ इत्यभिभाषते ।
एवं रङ्गाः प्रयोक्तव्याः खे अराँ इव खेदया ॥

इमौ श्लोकौ व्याख्येयौ ।

१९४७

१—वृषण्वसुः, सुगन्धिश्च मे, विदामक्रन्, अद्य ममार, सभेयः नभस्यो मासः, सोम्यं मधु, यो जागार, भय्यः, एषु कानपि पञ्च प्रयोगान् वैदिकसूत्रोद्धरण-मुखेन निष्पाद्य तत्र लौकिकप्रयोगाः कथं भवन्तीति निर्दिश्यताम् ।

२—प्रथमं दध्र आपः, सरसी शयानम्, ब्राह्मणासः, अर्लर्षि युध्म खजकृत्पुरन्दर, महाँ इन्द्रः, ये ३ यजामहे, हन्त ते ददामि३, अग्न३यिन्द्रम्, अभी षु णः । एषु किमपि प्रयोगपञ्चकं ससूत्रनिर्देशं निष्पाद्य "वयस्यासु मूर्ध्नो मतुप्" इति सूत्रमनुवर्त्तनाऽऽवर्त्तनाभ्यां व्याख्यायताम् ।

३—'गोपायतं नः' इत्यत्र स्वरसङ्घर्षक्रममुद्भाव्य व्यवस्थाप्य च तमिति स्वरि-तमादाय शेषनिघातशङ्का सप्रमाणं निराक्रियताम् ।

४—देवीं वाचम्, स्वपन्ति, वेत्रवती, ज्येष्ठः, वाचा विरूपः, कृष्णसारङ्गः, मद्र-सविधम्, पुरोहितम्, गवाध्यक्षः, गुडोदकम्, आप इन्द्रावरुणौ, गौरमुखः, एषु क्वचित् सप्तसु प्रयोगेषु स्वोपन्यस्तसूत्रैर्नामनिर्देशेन स्वरान् विधाय जपन्युङ्खसामशब्दानामर्था लिख्यन्ताम् ।

५—अग्निमीले, जातु भोक्ष्यसे, ग्राम् पचसि देवदत्त३ ।
एषु स्वरप्रक्रियां प्रदर्श्य क्वचित् प्रयोगेषु स्वरत्रयचिह्नमुल्लिख्यताम् ।

६—पाठकानां गुणदोषौ निर्दिश्य, निम्ननिर्दिष्टश्लोकः सोदाहरणं व्याख्यायताम्—

अलाबुवीणानिर्घोषो दन्तमूल्यः स्वरानुगः ।
अनुस्वारस्तु कर्त्तव्यो नित्यं होः शषसेषु च ॥

१९४८

१—अक्रन्, तारषित्, गुग्गुलूः, मावतः, त्री रुद्रेभ्यो अवपथाः, उरु णस्कृधि, एमसि, तरुतारम्, उपरि स्विदासी३त्—एषु पञ्चानां सप्रमाणं सिद्धिं प्रदर्श्य—नोनयति०, वेशोयश०, मन्त्रे सोमाश्वेन्द्रिय०, सुपां सुलुक्०, तयोर्य्वावचि०—एषु चतुर्णां सूत्राणां सोदाहरणमर्थाः प्रदर्श्यन्ताम् ।

२—नोदात्तस्वरितोदय०, त्यागराज०, तास्यनुदात्तेत्०, न भूताधिक०, नाचार्यराजर्त्विक्०, निपातैर्यद्यदि०—एषु पञ्चानामर्थमुदाहरणानि च विलिख्य, तेऽवदन्, कर्णाभ्यां छुबुकादधि, चोदयित्री सूनृतानाम्, शस्त्रीश्यामा, सावर्णिमाण्डूकेयौ, कुसूलबिलम्, इन्द्राबृहस्पती, पुत्रासो यत्र पितरो भवन्ति—एषां षट्सु स्वरसिद्धिः प्रतिपाद्यताम् ।

नाभि—रज्जु—अर्चिष्—ब्रह्मन्—कुशा—नेत्र शब्दानां लिङ्गमभिधीयताम् ।

१९४९

१—वृषणश्वः, सग्धिश्चमे, शुन्धध्वं दैव्याय, गृभ्णामि, पतयालूः, माधव्यः, उभयतोदतः, वर्षिष्ठे अधिनाके, वितत्रिरे, सोमोह्वरितः, सुम्नयुः ।

एषु दशानां सप्रमाणं साधुत्वमभिधाय ऋचितुनु० भावलक्षणेस्थेण् सुप्तिङुपग्रह० एषां त्रयाणामुदाहरणान्यर्थाश्च लेख्याः ।

यद्वा—तुमर्थेसेसे० मन्त्रेघ सह्वर० तद्धानासा० श्रुशृणु० एषां सोदाहरणमर्थमभिधाय—गामस्य तदहः सभायां दीव्येयुः, जरसा मरते पतिः, पूर्व्यासः, बहुप्रजाः, गभीरस्यां उग्रपुत्रे, यजध्वैनं इमानि साधय ।

२—सुबामन्त्रिते० अन्तोदात्तादुत्तरपदा० कुरुगार्हपत० थाथघञ्क्ता० स्फिगपूत० गत्यर्थलोटाल्लृण्नचेत्० एषु पञ्चानां सोदाहरणमर्थमुक्त्वा—

आते पितर्मरुताम्, जागर्षि त्वम्, कृषन्नित्फाल आशितम्, ज्येष्ठ आह चमसा, पललम्, नभन्तामन्यकेसमे, अभिचष्टे अनृतेभिः, अन्वेतवा उ, गोकर्णः धर्ता वज्री पुरुष्टुतः, त्रिषादूर्द्ध्वः, तयोरन्यः पिप्पलं स्वाद्वत्ति, उशन्तिहि, एषां दशसु स्वरसिद्धिरुद्भावनीया स्वरलेखनपुरस्सरम् ।

३—मिन्यन्त-तलन्त–उकारान्त–शब्दानाम्, भूमि-इषु-यूष-तूल-मृत्युशब्दानां च लिङ्गनिर्णयः प्रमाणीक्रियताम् ।

१९५०

१—नैनं हिन्वन्त्यपि वाजिनेषु, अक्षन्नमीमदन्तहि, प्रण आयूंषि तारिषत्, ततुरिः, याते अग्ने रक्षस्या तनुः, शिवतातिः, सुमङ्गलीः, अपांत्वेमन्, प्रथमं दध्र-आपः, कनिक्रदज्जनुषम्, हरिवो मेदिनं त्वा, एषु दशानां सप्रमाणं साधुत्वम-भिधाय, छन्दसि लुङ्लङ्लिटः, अक्षरसमूहे छन्दस उपसंख्यानम्, प्रकृत्या-न्तःपादमव्यपरे, एषु द्वयोः सोदाहरणमर्था लेख्याः ।

अथवा

वयस्यासु मूर्ध्नो मतुप्, साढ्यै साढ्वा साढेति निगमे, विचार्यमाणा-नाम्, प्लुतावैच इदुतौ, एषां सोदहरणमर्थमभिधाय, यवाग्वाग्निहोत्रं जुहोति, मित्रवयं च सूरयः, सभेयः, अभ्रआँ अपः, वधीं वृत्रम्, अन्वापनीफणत्, एते प्रयोगाः साधु साधनीयाः ।

२—स्वरितात्संहितायामनुदात्तानाम्, तास्यनुदात्तेत्, राजन्यबहुवचनद्वन्द्व०, उपमानं शब्दार्थप्रकृतावेव, नाव्ययदिक्शब्द०, पूजनात्पूजितमनुदात्तम्०, एषु पञ्चानां सोदाहरणमर्थमुक्त्वा, गोपायतं नः, माहि चीकरताम्, इन्धानो अग्निम्, घृतं मिमिक्षे, न्यङ्ङुत्तानः, ब्रह्मबन्ध्वा, रज्जुशारदम् पञ्चारत्निः, छात्रि शालम्, गार्गीबन्धुः, अभिमुखम्, आहि रुहन्तम्, एषां नवसु स्वर-लेखनपुरस्सरं स्वरसिद्धिः प्रदर्शनीया ।

५—अशनि, तिथि, इषुधि, संग्रामशब्दानाम्, योपध, पोपध, लोपध, त्रान्त, शब्दानां च लिङ्गमभिधीयताम् ।

१९५१

१—वृषण्वसुः, त्राध्वं नो देवाः, अघायुः, दिदृक्षेण्यः, ऋतव्याः, शुनमष्ट्राव्यचरत्, आशिरं दुह्रे, श्रुधी हवम्, विराजं गोपतिं गवाम्, अस्तुश्रौ३ पट् सूर्यो नो दिवस्पातु, एषु दशानां सप्रमाणं साधुत्वमभिधाय, उपसंवादाशङ्कयोश्च, ऋचितुनुघ:,० तयोर्य्वावचि संहितायाम्, एषु द्वयोः सोदाहरणमर्था लेख्याः ।

अथवा

व्यत्ययो वहुलम्, मत्वर्थे मासतन्वोः, तन्वादीनां छन्दसि वहुलम्, क्षियाशीः प्रैषेषु तिङाकाङ्क्षम्, एषां सोदाहरणमर्थमभिधाय, अज्ञत वा अस्य दन्ताः, मन्त्रं वोचेमाग्नये, सोम्य मधु, तृचं सूक्तम्, यो नः पिता जनिता, अधा शतक्रत्वो यूयम्, सहोर्जा तरित्रतः, देवां अच्छा सुमती, एते साधु साधनीयाः।

२—सुवामन्त्रिते पराङ्गवत्स्वरे, बहुव्रीहौ प्रकृत्या पूर्वपदम्, उत्तरपदवृद्धौ सर्वं च, ज्ञातिकालसुखादिभ्योऽनाच्छादनात्०, तिङो गोत्रादीनि०, गत्यर्थलोटाल्ण्नचेत्०, एषु, पञ्चानां सोदाहरणमर्थमुक्त्वा, देवीं वाचम्, ममत्तु नः परिज्मा, ईड्यो नूतनैरुत, वने न वायः, उतत्त्वः पश्यन्, द्युभिरक्तुभिः, कठाध्वर्युः, सावर्णिमाण्डूकेयौ, आर्यकुमारः वृद्धकुमारो, धतांवज्री पुरुष्टुतः, उशन्ति हि, एषां नवसु स्वरलेखनपुरस्सरं स्वरसिद्धिः प्रदर्शनीया।

५—श्रोणि, दुन्दुभि, सक्तु, मान, शब्दानां, तूल, दैव, पट्ट, शृंग शब्दानां च लिङ्गमभिधीयताम्

१९५२

१—समीधे, पृतनाषाट्, अघायुः, सभेयः, ऋतव्याः, मधव्यः, शिवतातिः, अत्र पञ्चानां साधुत्वं विधेयम्, व्याख्येयं वा छन्दसि निष्टर्क्येति सम्पूर्णं सूत्रं सोदाहरणम्।

२—विशिनः, प्रत्नथा, चिखाद, पुरुषः, ततुरिः, अवीवृधत्, भुवरिति, दिवस्पातु, एषु पञ्च साधनीयाः, प्रदर्शनीयं वा 'दाधर्तिदर्धर्तीति' सूत्रघटकप्रयोगाणां साधुत्वम्।

३—आगच्छ भो माणवक, जागर्षित्वम्, रिक्तः सुखम्, पञ्च, हलीपा स्थालीपाकः, एतेषु पञ्चसु स्वरविधायकविशेषसूत्राणि लिखन्तु।

४—त्रिभिष्ट्वं देव, भुवनपतिः, राजब्राह्मणः, नान्दीपुरम् उच्चैः कारम्, यत्प्रपचति, इह पञ्चसु स्वरविशेषान्निर्दिशन्तु।

५—अष्टौ वर्णजनकस्थानानि कानि? पाठकगुणाः के? चत्वारो यमाः के? के अनुनासिकाः? इदं सर्वं पाणिनीयशिक्षानुसारेण निर्दिश्य 'आत्मा बुद्धया

समेत्यार्थान्' इत्यारभ्य 'वर्णान् जनयते' इत्यन्तेन शिक्षाग्रन्थेन वर्णितोऽर्थः स्वगीर्वाणगिरा वर्णनीयः ।

१९५९

१—यवाग्वाऽग्निहोत्रं जुहोतीत्यत्र विभक्तिकार्य्यम्प्रदर्श्याग्निहोत्रघटकहोत्रशब्दे कस्मिन्नर्थे कः प्रत्ययः ? चतुर्थ्यन्तेन षष्ठ्यन्तेन वाऽग्निशब्देन सह होत्रशब्दस्य समासः ? अग्निहोत्रशब्दः कस्य कस्य अर्थस्य वाचकः ? लक्ष्यदर्शनद्वारा व्युत्पत्या च ज्ञापनीयः ? तत्र यवागूशब्दस्य भेदेन—आहोस्विदभेदेनान्वयः । यदि अभेदेनान्वयस्तर्हि समानविभक्तिकनामार्थत्वाभावादयुक्तः ? पक्षद्वये जुहोतिपदार्थश्च कः ? इति सर्वं युक्तियुक्तं विवेचनीयम् ।

२—नैनं हिन्वन्त्यपि वाजिनेषु । मर्य्यः । पशूनामीशे । वाजसनेयिनः । ओजस्या तनूः। रथीरभूत् । अयं सो अध्वरः। एते प्रयोगास्सूत्रनिर्देशपूर्वकं संसाधनीयाः।

३—चिच्युषे । अपावृधि । दार्विया । वरूतारम् । अवीवृधत् । तरित्रतः । ओ३पगव । अग्न३इ पत्नीवः । उरुणस्कृधि । एषु स्वेच्छया षट् साध्याः ।

४—अग्नेत्रातः । क्वावरम्मरुतः । प्रयआरुः । जागर्षित्वम् । दत्तः । माया । कृष्ण ऋषिः । महिषः । कुलायः । एषु धातुप्रत्ययफिट्स्वरान् प्रदर्शयत ।

५—इन्द्रो दधीचः । राया वयम् । कर्त्ता । समपादः । गमनचिरम् । आष्ट्रपक्वः । महागृष्टिः । राजनापितः । परमगिरिः । अमरम् । द्विशूर्पः प्रहरणम् । एषु मध्ये सप्तानामेव समासादिस्वराः प्रदर्शनीयाः ।

६—विस्पष्ट-विचित्र-व्यक्त-सम्पन्न-पण्डित-कुशल-चपल-निपुण-शब्दा गुण-वाचकाः द्रव्यवाचकाः वा । अत्रापि स्वमत्या पञ्चानां विग्रह-पुरस्सरं समास-प्रत्ययस्वरान् साधयन्तु सूत्रनिर्देशपूर्वकम् ।

७—शित्यंशः । गोक्रीतः । गोमुखः । अपनाम । पतिजनः । अङ्ग कुरु । कतरश्चित् । उशन्ति हि । पञ्चस्वेव समासतिङन्तस्वरविशेषान् यथाशास्त्रं साधयन्तु ।

१९६०

१—वृषण्वसुः । सग्धिश्चमे । स्पर्धन्ते वा उ देवहूये । प्रण आयूंषि तारिषत । विशण्विरे । उदेतोः । इमे प्रयोगाः साध्यन्ताम् ।

२—वर्चस्याः। मूर्धन्वतोरुपदधाति। छन्दस्यः। कथादाशेम। वसुभिर्नो अव्यात्। एतान् संसाध्योदाहरणप्रदर्शनपूर्वकमङ्ग इत्यादौ चेतिसूत्रार्थः प्रदर्श्यताम्।

३—वर्धीवृत्रम्। देवा अदुह्र। वोभूतु। ओ३श्रा३वय। महाँइन्द्रः। प्रदिवो-अपस्कः। अग्नेरक्षाणः। एतेषु चतुरः प्रयोगान् साधून् विधाय तयोर्व्वावचि-संहितायामिति सूत्रस्यावश्यकत्वमुपपाद्यताम्।

४—शुभस्पतो। खलप्व्याशा। वोदंज्योतिर्हृदये। दिवे दिवे। दधाना इन्द्र। सर्वे नन्दन्ति यशसा युञ्जन्त्यस्य काम्या। शरावती। मुनीवती। एतेषु सप्तस्वेव सूत्रनिर्देशपूर्वकं स्वराः साध्यन्ताम्।

५—फिट्सूत्राणामाश्रयणे प्रमाणम्प्रदर्श्य गेहम्, वलिः, ललाटम्। न्यङ्ङुत्तानः। तिस्रोद्यावः, लुलविथ, यदाहवनीये। एतेषु पञ्चस्वेव स्वराः साध्यन्ताम्।

६—अयज्ञोवा एषः। कठाध्वर्युः पञ्चारत्निः। राजब्राह्मणः। एतेषु स्वरान्विधाय सप्तमीहारिणौ धर्म्येऽहरण इति सूत्रं सोदाहरणपदकृत्यं व्याख्यायताम्।

७—वहुव्रीहिकः। न्यस्तः। प्रतिराजा। त्रिपादूर्ध्वः। काष्ठाध्यापकः। अभ्युद्धरति यत्प्रपचति। एतेषु पञ्चस्वेव स्वरान् संसाध्य तिङि चोदात्तवतीत्यत्र तिङी-त्यस्य ग्रहणं समर्थ्यताम्।

१९६२

१—मन्त्रग्रहणं ब्राह्मणस्याप्युपलक्षणमित्यस्याभिप्रायमुक्त्वा अज्ञत वास्यदन्ताः। चिकयामकः। इन्द्रेण युजा तरुषेम वृत्रम्। मन्त्रं वोचेमाग्नये। ईश्वरो-विलिखः। उदेतोः। इमे प्रयोगाः साध्यन्ताम्।

२—शौनकिनः। तमुत्वा पाथ्योवृषा। शिवतातिः। मघवानमीमहे। अर्कमानृचुः। उरोन्तरिक्षम्। साधवः क्रियन्तामिमे।

३—प्रथमं दध्रआपः। वधींवृत्रम्। विद्मातमुत्संयत आवभूथ। माद्भिः—शरद्भिः। हरिवते हर्यश्वाय। महां इन्द्रः। गोपा इन्द्रो नृपा असि। एते साध्यन्ताम्।

४—द्रवत्पाणी शुभस्पती। खलप्व्याशा। दधानाइन्द्रे। ईड्योनूतनैरुत। शरावती। अहीवती। एतेषु ससूत्रनिर्देशं स्वराः साध्यन्ताम्।

५—गेहम् । वह्निः । ललाटम् । न्यङ्कुत्तानः । एतेषु स्वरान् संसाध्य फिट्-सूत्राणामपि स्वरनियामकत्वे प्रमाणमुपन्यस्यताम् ।

६—यदाहवनीये । धनदायाद्यः । कुमारचातकाः । द्वादश । मुकुटे कार्षापणम् । एतेषु स्वरान साधयित्वा कपि पूर्वमित्यतः पूर्वमित्यनुवर्त्तमाने ह्रस्वान्तेऽन्त्यात्पूर्वमित्यत्र पूर्वग्रहणस्यावश्यकत्वं समर्थ्यताम् ।

७—त्रिपादूर्ध्वः । अग्निमीळे । जातु भोक्ष्यसे । इतो वा सातिमीमहे । यो भुङ्क्ते । एतेषु ससूत्रनिर्देशं स्वरान् प्रदर्श्य पूजनात् पूजितमनुदात्तं काष्ठादिभ्य इति सूत्रं व्याख्यायताम् ।

१९६३

१—वृषणश्वः, घस्तान्नूनम्, आप्राद्यावापृथिवी, अघायुः, योयजाति यजात इत्, ततुरिः, साधवः क्रियन्तामिमे ।

२—सभेयोयुवा, अनुभ्राता सगर्भ्यः; आश्विनीरुपदधाति, भागऋत्वियः, वाराही, हिरण्ययेन सविता रथेन, एते प्रयोगाः साध्यन्ताम् ।

३—धेनवो दुह्रे, ब्राह्मणासः, अश्वायन्तो मघवन्, हरिवोमेदिनं त्वा, यस्त्वायन्तं वसुना प्रातरित्वः, भुवस्तस्यस्वतवाँः पायुरग्ने, एते साधवः क्रियन्ताम् ।

४—देवींवाचम्, वोऽश्वाः, अग्निमीळे, दधासि रत्नं द्रविणं च दाशुषे, चिकीर्षकः; माहि चीकरताम्, एतेषु सूत्रनिर्देशपुरस्सरं स्वराः साध्यन्ताम् ।

५—चतुरः कल्पयन्तः, अन्तर्धा, दक्षिणो बाहुः, कुशाः, चञ्चेव चञ्चा, पारावतः पटु पटुः, एतेषु स्वरान् संसाध्य चतस्रः पश्येत्यत्र चतुरः शसीत्यस्याप्रवृत्तौ हेतुर्निर्दिश्यताम् ।

६—प्रष्ठौहः, चोदयित्री सूनृतानाम्, धनदायाद्यः, मद्रसविधम्, एतेषु स्वरान् प्रदर्श्य सपदकृत्यं सोदाहरणञ्चाचार्योपसर्जनश्चान्तेवासीति सूत्रं व्याख्यायताम् ।

७—पुरोहितम्, कुम्भोभगालम्, प्रतिराजा, आम्पचसि देवदत्त ३, देवः पचति च खादति च, एतेषु ससूत्रनिर्देशं स्वरान् साधयित्वा तिङि चोदात्तवतीत्यत्र तिङि ग्रहणस्य वैयर्थ्यमाशङ्क्य समाधीयताम् ।

१९६४

१—वृषण्वसुः, नैनं हिन्वन्त्यपि वाजिनेषु, सग्धिश्चमे, चिकयामकः, निष्टक्र्यं

चिन्वीत पशुकामः, आसाविषदर्शसानाय, सुप्रयसा मादयैते, एषु किमपि प्रयोगपञ्चकं वैदिकसूत्रोपन्यासेन निष्पाद्यताम् ।

२ - पिबध्यै, आसंस्थातोः सीदन्ति, वर्चस्याः, त्रिंशिनो मासाः, तृचं साम, शमीं च शम्यं च, मातरापितरा, एषु केचन पञ्चैव प्रयोगाः सत्रमनुसृत्य सम्पाद्यन्ताम् ।

३—प्रथमं दध्र आपः, परमेव्योमन्, देवाग्रदुह्र, ततुरिः, मात्वा वृका अघायवः, अक्षण्वन्तः, अग्ना३याशा; एष्वपि केऽपि पञ्चैव प्रयोगाः सूत्रमुद्धृत्य व्युत्पाद्यन्ताम् ।

४ —हरिवो मेदिनं त्वा, महाँ इन्द्रः वाचस्पति विश्वकर्माणम्, अभीषुणः, एषु किमपि प्रयोगत्रयं ससूत्रनिर्देशं निष्पाद्य "गोपायतं नः" इत्यत्र-बलाबल-विवेचनेन स्वरो व्यवस्थाप्यताम् ।

५—इमं मे गङ्गे यमुने, अग्न इन्द्र, अग्ने तेजस्विन्, इत्येतेषु वाक्येषु यथा-सम्भवं निघातं निघाताभावञ्च सूत्रनिर्देशेनोपपाद्य षष्ठ्यामन्त्रितकारक-वचनमिति वार्त्तिकं व्याख्याय तदुदाहरणयोः पराङ्गवद्भावफलमुद्भाव्य च तत्परिगणनफलमन्यथैव साध्यताम् ।

६—वीदंज्योतिः, स्वपन्ति, कर्षः, दत्तः, वेत्रवती, नखम्, कल्याणः, शकटिः, परमवाचा, अक्षण्वन्तः, एषु कस्मिंश्चित्प्रयोगपञ्चके प्राकरणिकसूत्रमुपन्यस्य तद्विहितः स्वरो नाम्ना निर्दिश्यताम् ।

७—यदाहवनीये, कृष्णसारङ्गः, गोस्वामी, यूपदारु, पुरोहितम्, मधुमैरेयः, कुशूलविलम्, प्रकारकः, माषोनम्, पचतिगोत्रम्, एषु यथाकामं केषु-चित्पञ्चस्वेव प्रयोगेषु सूत्रमुपस्थाप्य स्वरविशेषो नामग्राहमुद्भाव्यताम् ।

१९६५

१—वृषणश्च सच्चक्वतागणेन, अक्रन्नुषासः, गृहानजूगुपतंयुवम्, दित्यवाट्, अद्यममार, मन्त्रं वोचेमाग्नये, एषु केचन पञ्च प्रयोगा वैदिकसूत्रमुपन्यस्य निष्पाद्यन्ताम् ।

२—वक्षे रायः, मौञ्जं शिक्यम्, आश्विनोरुपदधाति, शिवतातिः, यज्ञं विप्रस्य मावतः, तातपिण्डानाम्, तेनो अवन्तु, एषु किमपि प्रयोगपञ्चकं वैदिकसूत्र-मुद्धृत्य व्युत्पाद्यताम् ।

३—वितंतिनरे कवयः, ऋजवः सन्तु पन्थाः, वर्धो वृत्रम्, देवासः, सोमोददद् गन्धर्वाय, गां मे देहि भोः ३, इन्द्र मरुत्व इह पाहिसोमम्, एष्वपि क्वचन प्रयोगपञ्चके ससूत्रनिर्देशं वैदिकप्रक्रिया प्रतिपाद्यताम् ।

४—तयोर्य्वावचि संहितायामितिसूत्रं सोदाहरणं व्याख्याय तत्सूत्रमिकोयणचीति सूत्रेण कुतो न गतार्थमर्हतीति समाधीयताम् ।

अथवा

इन्धिभवतिभ्यां चेति सूत्रं प्रत्याख्याय वयस्यासु मूर्ध्नोमतुविति सूत्रमनुवर्तनावर्तनाभ्यां सोदाहरणं व्याख्यायताम् ।

५—देवीं वाचम्, परशुना वृश्चन्, क्वावरं मरुतः, तमीशानासः, गार्ग्यस्य पिता यजते, दिवे दिवे, असि सत्यः, एषु क्वचन प्रयोगपञ्चकं प्राकरणिकसूत्रमुपादाय तद्विधीयमानस्वरविशेषो निर्दिश्यताम् ।

६—योऽग्निहोत्रं जुहोति, अध्वर्युभिः, पञ्चभिः, शरावती, उच्चैः, वलिः, वाचा विरूपः, किरिकाणः, एषु यथारुचि केषुचित्पञ्चस्वेव प्रयोगेषु सूत्रमनुसृत्य स्वरो नामग्राहमुद्भाव्यताम् ।

७—मद्रसविधम्, पुरोहितम्, गोविड़ालः, सर्वश्वेतः, कम्बलचोरम्, तिलमिश्राः, एषु क्वचित्प्रयोगत्रये विधीयकसूत्रोपन्यासेन स्वरविशेषमुद्भाव्य स्वरितोवाऽनुदात्ते पदादौ, उपोत्तमं रिति, गतिर्गतौ एषु किमपि सूत्रद्वयं सोदाहरणं व्याख्यायताम् ।

१९६६

१—अङ्गिरस्वदङ्गिरः, नैर्न हिन्वन्त्यपि वाजिनेषु, दार्वाघाटस्ते वनस्पतीनाम्, आप्रा द्यावापृथिवी, पावयामकः, कव्यवाहनः, अग्नाभवति, एषु किमपि प्रयोगपञ्चकं वैदिकसूत्रमुपन्यस्य व्युत्पाद्यताम् ।

२—गवामिव श्रियसे, हैमन्तिकम्, वैशन्तीभ्यः स्वाहा, वर्चस्याः, सर्वतातिम्, इद्वत्सरीयः, दाधारयः पृथिवीम्, एष्वपि केषुचित्पञ्चस्वेव प्रयोगेषु ससूत्रनिर्देशं वैदिकप्रक्रियोद्भाव्यताम् ।

३—वसुभिर्नो अव्यात्, कवपथः, प्रथमं दध्र आपः, देवा अदुह्र, ततुरिः, महाँ इन्द्रः, निष्टप्तं रक्षः, एष्वपि केऽपि पञ्चैव प्रयोगाः सूत्रमुद्धृत्य निष्पाद्यन्ताम् ।

४—सुप्तिङुपग्रहलिङ्गनराणामित्याद्याकारिकां व्याख्यामुखेनोदाहृत्य "प्रकृत्यान्तः-पादमव्यपरे","अनुदात्ते च कुधपरे" इत्यनयोरेकतरं किमपि सूत्रं सोदाहरण-प्रत्युदाहरणं व्याख्यायताम् ।

५—गोपायतं न इत्यत्र बलाबलविवेचनपुरस्सरं स्वरं व्यवस्थापयद्भिरायुष्मद्भिर्वि-भक्तिदले स्वरितस्य सति शिष्टत्वेन प्रकृतिदले शेषनिघातः कुतो नेति विविच्यताम्।

६—देवद्रीचीं नयत, यत्ते दिवो दुहितः, वोऽश्वाः, देवदत्तस्य पिता यजते, व्यचक्ष-यत्स्वः, स्वपन्ति, पाकः, एषु क्वचित्प्रयोगपञ्चके प्राकरणिकसूत्रमनुसन्धाय तद्विधीयमानस्वरनाम निर्दिश्यताम् ।

७—वेत्रवती, वने न वायः, यदाग्नेयः, क्व नूनम्, पाणिन्युपज्ञम्, पञ्चारत्निः, ग्रामनापितः, पुष्पहारी, वृकोदरः, गौरमुखः, अग्निमीले, एष्वपि केषुचित् पञ्चस्वेव प्रयोगेषु विधायकसूत्रमुपादाय नामग्राहं स्वरविधिर्व्यवस्थाप्यताम् ।

८—आमन्त्रितस्य चेति सूत्रद्वयं सोदाहरणं व्याख्यायताम् ।

१९६७

१—अङ्गिरस्वदङ्गिरः नैनं हिन्वन्त्यपि वाजिनेषु गामस्य तदहः सभायां दीव्येयुः, सुरुचो वेन आवः, चिक्रयामः, कव्यवाहनः, सुदाभा ।

एषु केऽपि पञ्च प्रयोगा वैदिकसूत्रमुपन्यस्य व्युत्पाद्यन्ताम् ।

२—आसाविषदर्शसानाय, वायवे पिवध्यै, हैमवतीभ्यः स्वाहा मूर्धन्वतीरुपदधाति, अथो अरिष्टतातये, तं प्रत्नथा, तृचं साम ।

एष्वपि किमपि प्रयोगपञ्चकमेव वैदिकसूत्रमुपादाय निष्पाद्यताम् ।

३—प्रकृत्यान्तः पादमव्यपरे, वा षपूर्वस्य निगमे, अनयोरेकतरं किमपि सूत्रं सोदाहरणं व्याख्याय शकुना इव पप्तिम श्रृणोत ग्रावाणः, मा त्वा वृका अघायवः, अपां रेतांसि जिन्वतोम्, हरिवो मेदिनं त्वा, महाँ इन्द्रः ।

एषु किमपि प्रयोगचतुष्टयं वैदिकसूत्रोपष्टम्भेन साध्यताम् ।

४—सुपां सुलुगितिसूत्रं सम्पूर्णमुल्लिख्य तद्विहिताः सुवादेशाः साकल्येनोदा-ह्रियन्ताम् ।

५—गोपायतं नः, इमं मे गङ्गेयमुने, परशुनावृश्चन्, वोऽश्वाः, देवदत्तस्य पिता यजते, स्वपन्ति, चिकीर्षकः ।

एषु क्वचित्प्रयोगपञ्चके प्राकरणिकं सूत्रमुद्धृत्य तद्विहितस्वरनाम निर्दिश्यताम् ।

६—नवभिर्वाजैर्नवतो च, शरावती, नरवम्, विश्वो विहायः, परमवाचा, व्याकरणकृच्छ्रम्, पितृसदृशः ।

एष्वपि केषुचित्पञ्चस्वेव प्रयोगेषु विधायकसूत्रोपन्यासेन तत्तस्वरो-नामग्राहमुपादीयताम् ।

७—सांकाश्यसिद्धः, उष्ट्रसादी, पुरोहितम्, मधुमैरेयः, सर्वश्वेतः, गार्गीबन्धुः, कम्बलचीरम्, प्रकारकः, अङ्ग कुरु ।

एष्वपि क्वचित्प्रयोगपञ्चक एव विधायकसूत्रम्पुरस्कृत्य स्वर-प्रक्रियोद्भाव्यताम् ।

१९६८

१—क्षेत्रस्य पतिना वयम्, नैनं हिन्वन्त्यपि वाजिनेषु, अक्रन्नुपासः, यत्सानोः सानुमारुहत्, उत नो गोषणि धियम्, नेज्जिह्मायन्तो नरकं पताम—एषु वैदिकवाक्येषु रेखाङ्कितपदानि सूत्रविशेषोपन्यासपुरस्सरं व्युत्पाद्यन्ताम् ।

२—सुप्तिङुपग्रहलिङ्गनराणां कालहलच्स्वरकर्तृयङां च । व्यत्ययमिच्छति शास्त्र-कृदेषां सोऽपि च सिध्यति वाहुलकेन । इमां कारिकां मूलरीत्या सोदाहरण साधु व्याख्याय, हैमन्तिकम्, यशोभगीनः, पञ्चथम्, कुशिकासो अवस्यवः, कद्रीची, ऋत्व्यम्—एषु केऽपि चत्वारः प्रयोगाः वैदिकप्रक्रियया साध्यन्ताम् ।

३—ग्रसितस्कभित...इति सूत्रं सम्पूर्णमूल्लिख्य प्रकृतिप्रत्ययादिपुरस्कारेणात्रत्याः प्रयोगा मलपद्धत्या निष्पाद्यन्ताम् ।

अथवा

ऊधरेव, औ३पगव, महाँ इन्द्रः, अभीषुणः—अत्र प्रयोगचतुष्टये विशेष-सूत्रोल्लेखेन वैदिकप्रक्रियामुद्भाव्य, 'तयोर्य्वावचि संहितायाम्' इति सूत्रम् 'इको यणचि, इत्यनेन गतार्थं न वेति संशयो दीक्षितप्रणाल्या अपाक्रियताम् ।

४—देवाः शरण्याः, अभ्यभिहि, दिवे दिवे, चिकीर्षकः, हृषसे दातवा उ, वेत्रवती एषु प्रयोगेषु ससूत्रनिर्देशं स्वरनामोल्लिख्य, अपाणिनीयानामपि फिट्सूत्राणा-मत्रोपादाने प्रमाणं प्रकाश्यताम् ।

५— अग्निः प्रष्ठौहः,कृष्णसारङ्गः, आतपशुष्कः, राजकुमारः,उष्ट्रक्रोशी, काण्डपृष्ठः, शशप्लुतम्, देवमित्रः, गौरसक्थः-—एषु सप्तस्वेव केषुचित् प्रयोगेषु स्वर-विधायकसूत्रोपष्टम्भेन स्वरविशेषो निर्दिश्यताम् ।

६—अग्निमीले, कश्चिद् भुङ्क्ते, देवः पचतिचन, यत्काष्ठं प्रपचति—एषु वाक्येषु तिङन्तस्वरं व्यवस्थाप्य यद्वृत्तकिंवृत्तशब्दयोरर्थौ निर्दिश्य "पूजनात् पूजित-मनुदात्तं काष्ठादिभ्यः" इति सूत्रं व्याख्यायताम् ।

१९७५

१—मनुष्वदग्ने, घस्तान्नूनम्, मा ह्र्मित्रस्य, उत नो गोपणिधियम्, अघायुः, अपलुपंनाशकत्—एषु रेखाङ्कितप्रयोगान् सम्यक् साधयत ।

२—शौनकिनः, पाथ्यः, सहस्विपः, ऋत्विपः, वृकतिः, तृनम्, उपप्रयन्तो अध्वरम्, ते नो अवत, कवपथः, आवः, त्मना—एषु षण्णां साधुत्वं सूत्रकार्यनिर्देश-पूर्वकं लिखत ।

३—उरूपा, देवाअद्रुह्, ततुरिः, पश्वे नृश्यो यथा गवे, अश्वापन्तो मघवन्, निपत्तमस्य चरतः, अकार्षै हि, अग्निचिद् भायात्, यस्त्वायन्तं वसुना प्रातरित्वः, नृमणाः—तेषु रेखाङ्किकेषु षट् प्रयोगान् सूत्रनिर्देशपूर्वकं साधूपपादयत ।

अथवा

देवद्रोचीं नयत देवयन्तः, वोऽश्वाः, गार्ग्यो यजते, स्वपन्ति, चिकीर्षकः, सर्वे नन्दति यशसा, युञ्जन्त्यस्य काम्या, मुनीवती इत्यत्र केषुचित् षट्सु, सूत्रो-पन्यासपूर्वकं स्वरान् निर्दिशत् ।

४—सुखम् , व्याघ्र,, विपणिः, शर्कटिः, प्रष्ठौहः, क्वनूनम्, गमनश्रेष्ठम्, यूपदारू, भार्या सौश्रुतः, उपकूलम्, सोमारुद्रौ—एषु षण्णां स्वरविशेषान् तत्तद्विधायक-सूत्रनिर्देशपुरसरं प्रकटयत ।

५—देवदत्तः, अपचः, मासजातः, द्विदन्, यदग्ने स्यामहं त्वम्, जातु भोक्ष्यसे, देव एव ग्रामं गच्छतु, अश्युद्धरति—एषु प्रयोगषट्के स्वरकार्यं प्रतिपादयत ।

अथवा

वैदिकप्रक्रियायाः प्रयोजनं साधु विविच्य स्वरस्य भेदं स्वरूपं च निरूपयत ।

हमारे महत्त्वपूर्ण छात्रोपयोगी प्रकाशन

जिनमें मूल पाठ के साथ संस्कृत-हिन्दी टीका, भूमिका नोट्स एवं अन्य छात्रोपयोगी सामग्री है।

अभिज्ञानशाकुन्तल	सुबोधचन्द्र पन्त	१०.००
उत्तररामचरित	आनन्द स्वरूप	१३.००
कादम्बरी (कथामुख)	रतिनाथ झा	३.००
काव्यदीपिका	परमेश्वरानन्द	६.००
किरातार्जुनीय	जनार्दन शास्त्री पाण्डेय (१-६ सर्ग)	७.००
चन्द्रालोक	सुबोधचन्द्र पन्त	६.००
नागानन्द नाटक	संसारचन्द्र	५.००
नीतिशतक	जनार्दन शास्त्री	३.००
प्रतिमानाटक	श्रीधरानन्द शास्त्री	३.५०
प्रसन्नराघव	रमाशंकर त्रिपाठी	८.००
बालचरित	कमलेशदत्त त्रिपाठी	२.५०
भट्टिकाव्य	पाण्डेय–शुक्ल (१–८ सर्ग)	१२.००
मृच्छकटिक	रमाशंकर त्रिपाठी	१८.५०
मालविकाग्निमित्र	संसारचन्द्र	७.५०
मेघदूत	संसारचन्द्र	७.००
रघुवंश	धारादत्त शास्त्री (१-११ सर्ग)	३०.००
रत्नावलीनाटिका	रमाशंकर त्रिपाठी	३.७५
रामाभ्युदययात्रा	श्यामाचरण पाण्डेय	६.००
वृत्तरत्नाकर	श्रीधरानन्द शास्त्री	५.००
वेणीसंहार	रमाशंकर त्रिपाठी	८.००
शिशुपालवध	जनार्दन शास्त्री पाण्डेय (१-४ सर्ग)	८.५०
स्वप्नवासवदत्त	जयपाल विद्यालंकार	७.५०
साहित्यदर्पण	शालिग्राम शास्त्री	२०.००
सौन्दरनन्दकाव्य	सूर्यनारायण चौधरी	१०.००
हितोपदेश-मित्रलाभ	विश्वनाथ शर्मा	५.००

मोतीलाल बनारसीदास

दिल्ली :: पटना :: वाराणसी